अङ्गोपाङ्गोपवेदाः स्युर्वेदस्यैवोपकारकाः ।
धर्मार्थकाममोक्षाणामाश्र(यस्य?याः स्युश्च)तुर्दश ॥

वेदाङ्गानि षडेतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्योतिषं कल्पं छन्दोविचितिरित्यपि ॥

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरित्यपि ।
चत्वार्येतान्युपाङ्गानि बहिरङ्गानि तानि वै ॥

आयुर्वेदोऽर्थवेदश्च धनुर्वेदस्तथैव च ।
गान्धर्ववेद इत्येवमुपवेदाश्चतुर्विधाः ॥

End :

निद्रा तृष्णा क्षुधा ज्ञेया मैथुनालस्यमग्निजाः ।
प्रचालं तरणारोहौ वायोरुत्थानरोधने ॥

कामक्रोधौ लोभभये मोहो व्योमगुणाः स्मृताः ।
उक्तोऽवधूतमार्गश्च कृष्णेनैवोद्धवं प्रति ॥

श्रीभागवतसंज्ञे तु पुराणे दृश्यते हि सः ।

सर्वदर्शनासिद्धान्तान् वेदान्तोक्तानिमान् क्रमात् ।
श्रुत्वार्थवित् सुसंक्षिप्तांस्तत्त्ववित् पण्डितो भवेत् ॥

Colophon :

शङ्कराचार्यरचिते सर्वसिद्धान्तसङ्ग्रहे ।
वेदान्तपक्ष एवायं यस्मिन् पक्षाः प्रतिष्ठिताः ॥

श्रीगुरुभ्यो नमः । शुभमस्तु ।

Author—Śaṅkarācārya.

Remarks—The Ms. is printed in VVPS.

---

## ॥ अपरोक्षानुभूतिः ॥

No. 1295 C. APAROKṢĀNUBHŪTI.

C. O. L. No. 2199 C.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 2''$. Leaves—4,

12 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—100. Incomplete.

Owner—Same as No. 1295 A.

Subject—Description of the reality of the Supreme Soul.

Beginning :

हरिः ।

शरदिन्दुविकासमन्दहासां
लसदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्या-
मरविन्दासनसुन्दरीमुपासे ॥

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेषा प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥

End :

उपादानं प्रपञ्चस्य मृद्भाण्डस्येव पश्यति ।
अज्ञानं चेति वेदान्तैस्तस्मिन् नष्टे क्वचित्सताम् ॥

यथा रज्जुं परित्यज्य सर्वं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमभिज्ञाय जगत्पश्यति मूढधीः ॥

रज्जुरूपे परिज्ञाते सर्पखण्डं न तिष्ठति ।
अधिष्ठानेऽपरिज्ञाते प्रपञ्चः शून्यतां व्रजेत् ॥

देहस्यापि प्रपञ्चत्वात् प्र... .... ...

Colophon :

Author—Śrī Śaṅkarabhagavatpāda.

Remarks—The work consists of only 114 stanzas. It is printed in VVPB.

---

## ॥ प्रबोधचन्द्रोदयव्याख्यानम् ॥

No. 1296. PRABODHACANDRODAYA-VYĀKHYĀNAM.

C. O. L. No. 789.

Substance—Paper. Size—$10\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—50. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—750.

Owner—C. O.

Subject—Same as No. 1293 B.

Beginning :

विष्णुं शुद्धचिदद्वितीयवपुषं शक्त्या त्वनिर्वाच्यया
विश्वस्थित्युदयात्ययान् विदधतं सत्त्वाद्यधिष्ठानतः ।
लक्ष्मीवाग्गिरिजाप्रियैः स्वविभवैर्लीलार्थमूरीकृतै-
र्वन्दे भक्तिमतामबोधतिमिरं निघ्नन्तमात्मस्थि(तः?तम्) ॥

श्रीमद्भरतनाथाख्यो व्याख्यां नारायणात्मजः ।
प्रबोधेन्दूदयस्यास्य करोत्यनतिविस्तराम् ॥

मध्याह्नेति । अनेन श्लोकेन परविद्याया विद्याया विषयं प्रयोजनं च सूचयति । शिष्टाचारानुविधानाय परदेवतोपासनानुरूपं मङ्गलमाचरति ।

End :

स एव विष्णुश्चाहमेवातर्कितफलाम् अस्यां विदिशि दिशि दिशि वा इदं फलं भविष्यतीत्येवमनिरूपितफलाम् । विदिशः कोणाः । दिशं दिशं प्रधानदिशम् । सायङ्ग्रहः यत्र देशे सायङ्कालो भवति स एव देशो गृहं यस्य सायङ्ग्रहः । मुनिर्मौनयुक्तः । भवितास्मि भविष्यामि । प्रशान्तारातिं प्रशान्तशत्रुं सप्रश्रयं सविनयं पुरुषमुपस्थापयति—उत्तिष्ठेति ।

इति ।

नारायणार्यपुत्रश्रीभरतेनातिधा(र्ष्ण्य?ष्ट्य)तः ।
व्याख्यायं रुचितालाय(?)विष्णुपादस्तवात्मिका ॥

Colophon :

इति भरतनाथस्य कृतौ प्रबोधचन्द्रोदयव्याख्यायां षष्ठोऽङ्कः ।

Author—Bharatanātha.

Remarks :

---

## ॥ बालमार्ताण्डविजयम् ॥

### No. 1297. BĀLAMĀRTĀṆḌAVIJAYAM.

C. O. L. No. 743.

Substance—Paper. Size—11″ × 9″. Pages—127. 20 lines per page and 16 letters per line. Script—Devanagarī. No. of Granthas—1300.

Owner—C. O.

Subject—A drama depicting the life of Mahārājā Mārtāṇḍa Varmā, the maker of modern Travancore.

Author—Devarājasūri.

Remarks—The work throws much light on the medieval history of Travancore. It has been published as No. 108 in TSS. The author has composed another drama entitled Snuṣāvijaya, which has not yet been published.

## ॥ बालरामायणव्याख्या ॥

No. 1298. BĀLARĀMĀYAṆAVYĀKHYĀ.

C. O. L. No. 383.

Substance — Paper. Size—14″ × 8″. Pages—79. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—800.

Owner—C. O.

Subject—Description of the story of Rāma.

Beginning :

श्रीः ।

यन्नाट्यं कृतवान् विद्वच्छेखरो राजशेखरः ।
बालरामायणाख्यस्य तस्य टीका विरच्यते ॥

प्रसक्तिः प्रसादः ।

'स्तोत्रश्लोको भवेन्नान्दी मङ्गलाशीस्समन्वितः' ।

अथवा—

नन्दी वृषस्सोऽपि महेश्वरस्य रङ्गत्वमादौ किल वै जगाम ।
तद्रङ्गमुद्दिश्य कृतास्तु पूजाः नान्दीति तां नाट्यविदो वदन्ति ॥

नाट्यशब्दो यद्यपि नृत्तगीतवाद्येषु त्रिषु वर्तते तथापि नृत्तस्य पृथगुपादानाद् गीतवाद्ये च प्रवर्तते ।

End :

आयिदकण्ठ( ? )सूदनवाराणसीसङ्कीर्तनेन सारितास्मि । अदूरस्थिताञ्जननिद्रता(?)मिथिला नाम नगरी भगवति ! मिथि-

लानगरि ! गुरुजनेन प्रणम्यते ! लंघितसागराद्धनूमतो दूरदर्शि-
दृष्टिः प्रतिभाति वत्स ! भरत ! उत्थाप्यतां ते वदनेन्दुः
भवत्वानन्दमन्दपरिस्पन्दा दृष्टिः वत्स शत्रुघ्न ! चिरं नन्द जननी-
जस्ते कुत्र प्रग्रीवः(?) ।

Colophon :

इति दशमोऽङ्कः ।

गोविन्दाचार्यशिष्येण द्विजपादाब्जसञ्ज्ञिना ।
बालरामायणस्यैषा टीकाख्या लिखिता मया ॥

Author—Text : Rājaśekhara.
Com : A disciple of Govindācārya.

Remarks :

---

## ॥ भगवदज्जुकीयं (भाषा) ॥

No. 1299. BHAGAVADAJJUKĪYAM (Bhāṣā).

C. O. L. No. 2378.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—89. 6—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1900.

Owner—Śaṅkaran Nampūdiripāḍ Avl., Melpāzhūr Illom, Velianāḍ.

Subject—A dramatic composition of the *Prahasana* type.

Beginning:

गणपतये नमः । अविघ्नमस्तु ।

സൂത്രധാരനെഴുന്നള്ളി സ്സൂ മത്തവിലാസത്തിലെ കണക്കെ സൂത്രധാരൻെറ അണ...പ്രസ്ഥാനവു.....ണം പരിണതിയും വേണം. ഇന്ദളം. സ്വരം മണിപൃഷ്ഠം ഏഴും ചൊല്ലി ക്രിയ തുടങ്ങൂ തത്ര പ്രഹേ ഹേതി ച എൻറു തുടങ്ങി പീഡയാമാസ ലീലയാ എൻറത്രെടം ശ്ലോകംപറയൂ രാവ...ണത്യാദി ചൊല്ലി അട്ടക്കുംവണ്ണമഴകുതായി ആടിക്കൊൾവു.

End:

സാന്നായ്യകുംഭികളുളവാകിൽ ഒമഃ കുഴി രണ്ടിലും സാദിപ്പൂ. അന്ധങ്ങളിരണ്ടിലുമമ്മിയുമമ്മിയുമമ്മിക്കുഴവി——മെ ·ശമ്യ യും വൃഷാരവും സാദിപ്പൂ. അഗ്നിഹോത്രസ്ഥാലിയും അന്വാ ഹാര്യസ്ഥാലിയും വലത്തെ ആസനത്തിന്മേലും ഇടത്തെ ആസ നത്തിന്മേലും സാദി ... ... ...

Colophon:

इति दिगम्बरमतम् ।

Author:

Remarks—Other works on similar lines are extant in Keraḷa under the designation Kūṭṭapāṭhakam. From Fol. 65 onwards are given quotations in Sanskrit to be recited during the performance. The last few FF. are broken and their halves lost.

## ॥ भगवदज्जुकीयं (सव्याख्यम्) ॥

### No. 1300. BHAGAVADAJJUKĪYAM with commentary.

C. O. L. No. 315.

Substance—Paper. Size—14″ x 8½″. Pages—136. 17—19 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1800.

Owner—C. O.

Subject—Same as No. 1299.

Beginning etc.—Text: Same as No. 1545, DCSMMPL. Com: Same as No. 1546, DCSMMPL.

Author:

Remarks—The commentary is elaborate but incomplete. It extends to the entrance of the Yamapuruṣa in the printed text.

---

## ॥ भाणविशेषः (विटनिद्रा) ॥

### No. 1301. BHĀṆAVIŚEṢA (Viṭanidrā.)

C. O. L. No. 303.

Substance—Paper. Size—14″ x 8½″. Pages—57.

19—20 lines per page and 17—19 letters per line.
Script—Devanāgarī. No. of Granthas—600.

Owner—C. O.

Subject—A Bhāṇa.

Beginning :

श्रीः ।

भाणविशेषः ।

...तः...

...प्राच्यैर्घृत्तेम...
...प्रणयिनिविचल...
...कुन्तघटितः पादाघ...
...थ...न ख विद्वत्सभाजना
...ये चिन्तयामि नैवमतो....

व्यवहरन् परागैश्चूतानानि विडम्बयन्
...नां कलहकलुषाणाम् ।
घटायिता वितत... ....
... ...विजयते ॥

इति निष्क्रान्तः ।

त्य... .... ... ...,भः

पिहानिर्वहितर्दि ।

End :

भरतवाक्यम्—

गिरां गतिमविज्ञाय भावं कवयतामपि ।
जनःपरीत्य...यतो न (नन्दुर्न्दतु) न निन्दतु ॥

किञ्च—

यावत्खण्डेन्दुमौलिं श्रयति गिरिसुता यावदास्ते मुरारे-
र्वक्षस्यक्षीणहारद्युतिमणिशबले देवता मङ्गलानाम् ।
यावद्वक्त्रेषु मैत्रीमुपनयति गिरामीश्वरी पद्मयोने-
स्तावल्लक्ष्मीप्रसूतिः स्वयमवतु भुवं रामवर्मा नरेन्द्रः ॥

Colophon :

निष्क्रान्तो विटनिन्द्राभाणः ।

Author :

Remarks—The opening few leaves are missing.

---

## ॥ भाषाकुसुममञ्जरी ॥

No. 1302 A. BHĀṢĀKUSUMAMAÑJARĪ.

C. O. L. No. 2005 A.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—22.
7—9 lines per page and 56 letters per line.
Script—Grantha. No. of Granthas—600.

Owner—K. Rāmasubba Iyer Avl., Āyikkuḍi.

Subject—A guide to the practice of Sanskrit conversation.

Beginning :

अविघ्नमस्तु ।

त्रिकालज्ञकवीन्द्रेण भाषाकुसुममञ्जरी ।
रचितेयं चिरं जीयात् सज्जनभ्रमरप्रिया ॥

वा—हे आर्य! अत्र भवन्तमभिवादयामि । आयुष्मान् भव सौम्य! कस्माद्देशादागतो भवान् ।

आर्य! इदानीं दक्षिणदेशादागतोऽहम् ।

सखे भवता के के देशा दृष्टाः ।

घूर्जरावन्तिसौवीरकाश्मीरबाह्लीकसौराष्ट्रकुक्कुरकुरुप्रमुखदेशा विलोकिताः ।

पुनः को देशोऽवलोकितः ।

पश्चात् कलिङ्गदेशो वीक्षितः पुनः केरदेशः प्रेक्षितः तुरुष्कदेशो निरीक्षितः परण्डवदेशश्च दृष्टः ।

End :

कार्षापणचतुष्कं गृहीत्वा पूगीफलताम्बूलानि च प्रतिगृह्यायाहि । इदानीं किं किं श्रूयते किं तूष्णीं स्थीयते । अभ्यस्तं वेदं (ग?गु)णनिकया दृढं विधेहि अनभ्यस्तानि शास्त्राणि पठ्यन्ताम् । निशितानि शास्त्राणि शिष्येभ्यः समुपदिश धर्ममार्गेण प्रवर्तय

नित्यानन्दकरं श्रेयो लभस्व कीर्तिं सम्पादय । बन्धून् धनधा-
न्याम्बरादिभिः परिपालय अहं च पुनरागामिष्यामि ।

Colophon :

समाप्तेयं भाषामञ्जरी ।

शोभकृन्मकरे मास्यष्टम्यां स्थिरवासरे ।
लिखितो रामकृष्णेन सतामानन्दवृद्धये ॥

Author—Trikālajña Kavīndra.

Remarks—The work is of great use to beginners in Sanskrit.

---

॥ प्रहसनम् ॥

No. 1302 B. PRAHASANAM.

C. O. L. No. 2005 B.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—6. 7 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—150. Incomplete.

Owner—Same as No. 1302 A.

Subject—A *prahasana*.

Beginning :

लम्बोदरस्य विगळत्कटिसूत्रलम्बि-
कौपीनपार्श्वविवृतो मदनध्वजोऽव्यात् ।
यं संभ्रमादुपसरन्नुरगभ्रमेण
चञ्च्वा विकर्षति षडाननयानबर्ही ॥

अपिच-

अलमखिलसुरेन्द्रैरस्तु पुत्रप्रभावो
गुरुतरमतिदीर्घं कुंभकर्णस्य शेफः ।
अहनि निशि च यस्योज्जृंभणे विन्ध्यबुद्ध्या
कलशजमृषिमुच्चैः क्रन्दतश्चन्द्रसूर्यौ ॥

नान्द्यन्ते सूत्रधारः— सामाजिकानवलोक्य सादरमञ्जलिं बध्वा पुष्पाञ्जलिं कृत्वा

End :

जा—अयि महापातकिन् विलाळहतक त्वमेवास्यार्यस्य शिखाछेदनाय विधिना सृष्टोऽसि ततस्ततः—

दीर्घ—

ततः शिखां मे कुपितश्चकर्त
वेदिं गतां स्वां स्वधितिं गृहीत्वा ।
आस्तामिदं सा मम भाग्यरेखया
तदोत्थितं मेहनमप्रलूय ॥

जा–न केवलं तव, किन्तु पुरसुन्दरीजनमदनमन्दिराणाम् ।

दीर्घ--- युक्तमुक्तं---

प्ररोहति शिखा लूना शाकिनीव दिने दिने।
न तल्लूनं तनुमतां क्वापि शेफः प्ररोहति ॥

नेपथ्ये–

Colophon :

Author :

Remarks—The work exhibits superb elegance of style.

---

॥ भीमपराक्रमः ॥

No. 1303. BHĪMAPARĀKRAMA.

C. O. L. No. 1694.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—49. 9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—Keśava Piṣāroḍi Avl., Kailāsapuram.

Subject—The story of Jarāsandha.

Beginning :

गौरीबाहुलताग्रह्ववलयांशुभिरञ्जसा।
कृष्णोऽप्यर्जुनतां नीतः कण्ठो भीमस्य पातु वः ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सहर्षं—अयमपूर्वाभ्युदयवृत्तान्तः प्राणसमायै समुपहर्तव्यः । यतः—

उत्सवस्य परा काष्ठा सूक्तिलाभो हि तद्विदाम् ।
सुहृद्भिः संविभागेन स सहस्रगुणायते ॥

परिक्रम्य नेपथ्यं प्रति ।

आर्ये ! यदि कल्याणाकर्णनकुतूहलि ते श्रवणयुगळं तदितस्तावदागम्यताम् ।

प्रविश्य—नटी

एसह्मि अवहिदा अय्यो कहेदु ।

सूत्रधारः—आर्ये ननु स्मरसि यत् सिद्धकनाम्ना त्रैकाल्यविदुषा कार्त्तान्तिकेन मां प्रति आदिष्टम् ।

"करिष्यते भीमपराक्रमाख्यं
काव्यं शतानन्दकवीन्द्रसूनुः ।
मनीषिणां संसदि तत्प्रयोक्ता
त्वं सम्पदां धाम भविष्यतीति" ॥

नटी—जाणामि जाणामि एदं । ता किं दाणीं कळणातं णिबन्धणं समाविता ।

सूत्रधारः—

आर्ये समापितं समर्पितं च मम करे तदिदमुक्तं च ।

अणुमपि गुणमुच्चैः कुर्वतां पण्डितानां
विवृणु तदिदमग्रे नेतरेषां कदाचित् ।
सफलयति यथाब्धौ शुक्तिरभ्रस्य वृष्टिं
प्रभवति न तथाहि क्वापि शम्बूकयूथम् ॥

End :

नारदः—किं वो भूयः प्रियमुपकरोमि ।

सर्वे—किमतःपरमुपकर्तव्यमस्ति ।

यन्निर्वोढा कुरुपरिवृढः साम्प्रतं सप्ततन्तुं
यच्चास्माभिर्न्यवधि मगधग्रामणीः स(ङ्ग्रमाऽङ्गराग्रे) ।
यच्चेदानीमवनिपतयः स्वास्तिमन्तः समस्ताः
तत् किं ब्रूमो भवदुपगमानुग्रहो ह्यत्र हेतुः ॥

तथापीदमस्तु । भरतवाक्यम् ।

वंशोदग्रे गुणिनि रमतां रत्नगर्भा नरेन्द्रे
शश्वच्छम्भोश्चरणकमले भक्तिमानस्तु लोकः ।
सार्धं मित्रैरविरतरसान् स्वादयन्तः कवीनां
वाणीगुम्भान् सततगुणिनः सज्जनाः सन्तु कामम् ॥

Colophon :

इति प्रथमोऽङ्कः ।

इति निष्क्रान्ताः सर्वे ।

भीमपराक्रमं नाम नाटकं समाप्तम् ।

Author—Son of Satānanda.

Remarks—This is a drama in one Act. The Ms. is damaged here and there.

---

॥ भीमपराक्रमः ॥

No. 1304. BHĪMAPARĀKRAMA.

C. O. L. No. 31.

Substance—Paper. Size—13½" x 8". Pages—80. 14 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—600.

Owner—C. O.

Subject etc.—Same as No. 1303.

---

॥ मदनकेतुचारितम् ॥

No. 1305. MADANAKETUCARITAM.

C. O. L. No. 87.

Substance—Paper. Size—13¾" x 8¾". Pages—56. 16 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—425.

Owner—C. O.

Subject etc.—The story of Madanaketu.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नाहं ते कुचकुम्भयोर्विरचये कस्तूरिकापत्रकं
किं यत्नेन यदाशु भस्मरजसा भूयोऽपि सन्दूष्यते ॥

एवं वादिनि शैलराजदुहितुः सासूयमालीजने
सव्रीलं शशिशेखरे निपतितो नेत्राङ्कुरः पातु वः ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्रधारः—

योगिनि वा भोगिनि वा रागिणि वा वित्तदे विरागिणि वा ।
साधारणप्रवृत्तिर्विदग्धगणिकाजनो जयति ॥

परिक्रम्य—नेपथ्याभिमुखमवलोक्य—

कोऽत्र भो ! । प्रविश्य पारिपार्श्वकः ।

आज्ञापयतु भावः ।

सूत्रधारः—मारिष ! अपि शृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वशे वर्तत इति ।

पारिपार्श्वकः—अथ किम् ।

सूत्रधारः—तदद्य रङ्गनाथस्य भगवतो यात्राप्रसङ्गेन सङ्गतायामस्यां परिषदि प्रयुञ्जाना विज्ञानप्रपञ्चस्य साफल्यपदवीमारोढुमभिलषामः ।

End :

तथापीदमस्तु भरतवाक्यम् ।

भूदेवाश्चतुरोऽपि चञ्चलधियामात्तश्रमानाश्रमा-
नाश्रान्तं परिपालयन्तु विधिवत्संसारबन्धच्छिदः ।
राजानश्च महीमहीनविभवा रक्षन्तु लक्ष्मीपति-
क्रोडाधीशविशालदन्तशिखरक्रीडारसज्ञामिमाम् ॥

इति परिक्रम्य (निष्क्रान्ताः सर्वे) ।

Colophon :

इति मदनकेतुचरितं नाम नाटकं समाप्तम् ।

Author :

Remarks :

---

## ॥ मदनकेतुचरितम् ॥

No. 1306. MADANAKETUCARITAM.

C. O. L. No. 163.

Substance—Palm leaf. Size—13″ × 1″. Leaves—52. 4 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—525.

Owner—Subrahmaṇyan Mūttatu, Puttiyil Illom, Harippāḍ.

Subject—The story of Madanaketu.

Beginning etc.—Same as No. 1305.

Author—Rāmapāṇivāda.

Remarks—The Ms. is much damaged.

---

॥ मदनकेतुचरितम् ॥

No. 1307. MADANAKETUCARITAM.

C. O. L. No. 1679.

Substance—Palm leaf. Size—10″ × 1″. Leaves—41
7 lines per page and 30 letters per line.
Script—Malayāḷam. No. of Granthas—525.

Owner — Kumāran Mūttatu Avl., Āyāmkuḍi, Vaikom.

Subject etc.—Same as No. 1305.

Author :

Remarks—After the close of the text 10 leaves are devoted to the Sanskrit rendering of the Prakrit portions. Subsequently occurs the following portion disclosing the date of transcription :

തൊള്ളായിരത്തി നാൽപത്തിനാലാമാണ്ടു് ചിങ്ങഞായർ ഇരുപത്തിഏഴാംതീയതി എഴുതിത്തീന്നതു്. ബ്രഹ്മമംഗലത്തു് പെരുംതൃക്കോവിലപ്പൻ രക്ഷിക്ക. ഇതു് ചോഴിക്കര മൂത്തതിൻെറ ഗ്രന്ഥം.

---

## ॥ मदनमञ्जरी ॥

### No. 1308. MADANAMAÑJARĪ.

C. O. L. No. 502.

Substance—Paper. Size—13″ × 8″. Pages — 131. 20 lines per page and 21 letters per line. Script—Devanāgarī. No. of Granthas—1700.

Owner—C. O.

Subject—A drama wherein Śṛṅgāra predominates.

Beginning :

कल्याणं स महेश्वरो दिशतु यः कैलासमुल्लासतो
धूयन्तं दशकन्धरं दृढतरन्यस्ताङ्घ्रिपद्माग्रतः ।
आगन्तुं बलिमन्दिरस्य रचयन्नायासलेशं विना
भीत्याश्लिष्टवतीमतीव गिरिजां प्रीतामतानीत्क्षणात् ॥

अपिच—

एणादिन्दुः पृथग्यद्वदनसदृशतां द्रष्टुमीशेन नीतो-
ऽप्यौपम्यालाभलज्जाकृशतनुरगिशत्तज्जटाकाननं सः ।
पाणावेणोऽपि धत्ते पदमुपरि भयाद् धावितुं यत्कटाक्षा-
ज्जायेत श्रेयसे तत् किमपि हिमवतो जङ्गमं भागधेयम् ॥

नान्द्यन्ते सूत्रधारः—समन्तादवलोक्य सानन्दातिशयम्——अहो मकुटावतंसमहो विभवधवलीकृतचोलावनीमण्डलस्य समुत्तुङ्गहरिनदीतरङ्गसङ्घतालवृन्तापनीयमानसन्ध्याताण्डवपरिश्रमस्य पुण्यकोदण्डतन्त्रसिद्धान्तभूषितवामभागस्य भगवतस्तेजिनीवनेश्वरस्य प्रवृत्त एव चैत्रयात्रामहोत्सवः ।

\+ \+ \+ \+ \+ \+ \+

सूत्रधारः---

अस्ति किल चोलेषु प्रशस्तिमाननवरतमास्तिकविविधविद्वज्जनवेदशास्त्रघोषविभ्राजिष्णुर्विष्णुपुरं नाम महानग्रहारः तत्र कश्चिद् विपश्चिदखिलकलाकलापदेशिकः कौशिकवंशमौक्तिकमणिः सूक्तिनिकरपारदृश्वभिः स्वशिष्यैरेव दिगन्तरेषु निरन्तरविस्तार्यमाणयशोवितानः प्राथमिकस्यैव साक्षाद् विवर्तः पुरुषार्थस्य षड्वेदिविद्यावल्लभो नाम ।

नटी—अत्थि सुणीअदि । परन्तु अस्सुदप्पआरे वेआणं चक्के कहं अस्स परिस्समोत्ति सवणकादरं मम हिअअम् ।

(अस्ति श्रूयते । परन्तु अश्रुतप्रचारे वेदानां षट्के कथमस्य परिश्रम इति श्रवणकातरं मम हृदयम् ।)

सूत्रधारः—आर्ये कथमस्मिन् कार्ये वहसि कातर्यम् । यतो मदन-मञ्जरीमहोत्सवं नाम विद्यते मम वशे शृङ्गारविभवशेवधिः सरस-पदसन्दर्भमणिदामहाटकपेटकं नाटकम् । तच्च तादृक्षलक्षणनिर्वाह-कतया सर्वातिशायिहर्षहेतुरस्याः परिषदः ।

× × × × × ×

सूत्रधारः—आर्ये न किमिदं श्रूयते । पुरा खलु निजास्थानमास्थि-तस्य ऋग्यजुस्सामसु बहुवारमारोहावरोहक्रमपाठधाटीं परि......कैश्चिद्विपश्चिदवतंसैः साकमच्युतराय्यचूडामणिर्मणिभूषणग्राम-पारितोषिकप्रदानपुरस्सरं प्रयासतौल्येन पुनरीदृशीमाख्यामभि-ख्यातवान् ।

नटी—(सविस्मयानन्दम्) तदो(ततः ।)

सूत्र—अत्रहि विद्यते तदीयान्वयरत्नदीपस्य तादृशस्य यज्ञनारा-यणसुधियः पौत्रः कनकसभापतिसुमतेरात्मसम्भवः शाम्भ-वानुकम्पासम्पादितविश्रुतविनयादिगुणगण.... ... ....दिनाथो नाम कविः ।

End :

देवः—(प्रसादातिशयमभिनीय) धर्मध्वजादीन् प्रति । किं वा भूयः प्रियमुपहरामि ।

धर्मध्वजादयः—किमितः परमपि प्रियमस्ति ।

तथापीदमस्तु भरतवाक्यम्—

रक्षन्तु क्षितिरक्षिणः क्षितिमिमां द्राघीयसा तेजसा
स्वस्वाचारपथैकचङ्क्रमविधौ स्वच्छन्दमास्तां जनः ।
वाग्देवीसहवासकेलिरसिका वर्तेत लक्ष्मीस्सदा
सस्यानाञ्च समृद्धिदा वसुमतीशस्याभितः स्यादियम् ।

इति निष्क्रान्ताः सर्वे । पञ्चमोऽङ्कः ।

Colophon :

मदनमञ्जरी समाप्ता ।

हरिः । ओम् । शुभमस्तु ।

शुभकृन्नामशरदि तुलां प्राप्ते दिवाकरे ।
लिखिता रामकृष्णेन हृद्या मदनमञ्जरी ॥

Author—Ṣaḍvedividyāvallabha.

Remarks—The introductory portion reveals that the author, son Kanakasabhāpati and grandson of Yajñanārāyaṇa was a native of Viṣṇupuragrāma.

---

## ॥ मन्त्राङ्कप्रयोगसमुच्चयः ॥

No. 1309. MANTRĀṄKAPRAYOGASAMUCCAYA.

C. O. L. No. 302.

Substance—Palm leaf. Size—13″ × 2″. Leaves—128.

7—8 lines per page and 40—44 letters per line. Script—Malayaḷam. No. of Granthas—500.

Owner—Tekkedattu Rāman Vāsudevan Bhaṭṭatiri Avl.

Subject—Description of the 3rd Act in the drama Pratijñāyougandharāyaṇa.

Beginning :

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

ततः प्रविशति डिण्डिकः । കൊട്ടക്കടമയ്യ്മിത്യസ്യ ।

शिखा बहुविधा प्रोक्ता शास्त्रे शिखिशिखोपमा ।
भूसुराणां नृपाणां च वैश्यानां पादजन्मनाम् ॥

द्वादशाङ्गुलिमाना हि शिखा चेह फलप्रदा ।
षोडशाङ्गुलिमाना चेत् शिखामुत्रफलप्रदा ॥

सप्ताङ्गुलिमिता सा चेत् पुत्रसम्पत्करी भवेत् ।
पञ्चाङ्गुलिप्रमाणा हि कळत्रहितकारिणी ॥

End :

अपिच—

यदि तां चैव तं चैव तां चैवायतलोचनाम् ।
नाहरामि नृपं चैव नास्मि यौगन्धरायणः ॥

कर्णं दत्वा । अये शब्द इव श्रूयते । तूर्णं ज्ञायतां शब्दः ।

वस—भो तह निष्क्रम्य प्रविश्य पडिउत्तादिवसविस्सम्मेण अविरदं सञ्चरन्तो जणो दीसइ । किं दाणि करह्म ।

हम—तेन हि चतुर्द्वारमग्निगृहं भिद्यतां नः संघातः ।

यौग—न न । अभिन्नो नः संघातः । भिद्यतामगारिसंघातः । स्वकार्यमनुष्ठीयतां । उभौ वाढम् ।

डिण्डकः—

अस्य दग्धोदरस्यार्थे किमनाटि न नाटकम् ।
किमकारि न कार्पण्यं.... .... .... ॥

Author :

Remarks—The Ms. dwells at length upon certain details relating to the discourse by Cākyār. Only at the beginning and end Mantrāṅkaprayoga is embodied. Verses on the stories of the Rāmāyaṇa and Syamantaka-jewel are quoted in the middle.

---

## ॥ मन्त्राङ्कप्रयोगसमुच्चयः ॥

No. 1310. MANTRĀṄKAPRAYOGASAMUCCAYA.

C. O. L. No. 538.

Substance—Palm leaf. Size—12¾″ × 1¾″. Pages—99.

7—9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Owner—Elayadattu Taikkāṭṭu Nārāyaṇan Mūsu Avl., Cochin.

Subject—Same as No. 1309.

Beginning :

हरिः । श्रीगणपतये नमः ।

मन्त्राङ्काह्वयनाट्यस्य प्रयोगार्थं मयाधुना ।
सर्वतस्सारमादाय क्रियतेऽत्र समुच्चयः ॥

तस्य क्रियाक्रमं वक्ष्ये भाषया प्रथमं मितम् ।
तमृते हि प्रयोगो हि नाट्यशास्त्रेषु दृश्यते ॥

अथ वाचयित्वा चतुच्छेदनं कृत्वा कौशिकामुक्त्वा पुनरपि अनुवाच्य च्छेदनं कुर्यात् ।

डिण्डी दण्डं दधानो भसितसिततनुर्भस्मक्लृप्तत्रिपुण्ड्रो
भास्वत्कौपीनवासा प्रविशति गणयन् माषकान् दक्षिणानाम् ।
मन्त्रार्थं वह्निशालां प्रतिकृतसमयस्सत्सखिभ्यामुभाभ्यां-
नो पश्यामीति जल्पञ्जळ इव मतिमान्मोदकं देवपीठे ॥

End :

विपक्षः पौलस्त्यश्चरणतरितव्यो जलनिधि-
र्विजेतव्या लङ्का रणभुवि सहायाश्च कपयः ।

तथाप्येको रामस्सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥

धनुः पौष्पं मौर्वी मधुकरमयी वामसुदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
तथाप्येकोऽनङ्गस्त्रिभुवनमिदं व्याकुलयति
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥

Colophon :

Author :

Remarks—Malayāḷam explanation occurs here and there in the work. Copious illustrative verses from celebrated authors are quoted.

---

## ॥ मन्त्राङ्कप्रयोगसमुच्चयः ॥

No. 1311. MANTRAṄKAPRAYOGASAMUCCAYA.

C. O. L. No. 2071.

Substance—Palm leaf. Size—15″ × 2″. Leaves—68. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1325.

Owner—C. Nārāyaṇan Bhaṭṭatiri Avl., Parambūr Illam, Tiruvalla.

Subject—Same as No. 1309.

Beginning :—Same as No. 1310.

End :

डिण्डिकः—(परिक्रम्य) स्ववेषानुरूपां काश्चिद् योषितं दृष्ट्वा मोदकयाचनादिकं कृत्वा प्रक्रीड्य पुनः जनानावर्जेत ।

अस्य दग्धोदरस्यार्थे किमनाटि न नाटकम् ।
किमकारि न कार्पण्यं कस्य नादर्शि मन्दिरम् ॥

Author :

Remarks—The Ms. is very old and much damaged. A few leaves are missing here and there.

---

॥ मन्त्राङ्कप्रयोगसमुच्चयः ॥

No. 1312. MANTRAṄKAPRAYOGASAMUCCAYA.

C. O. L. No. 751.

Substance—Paper. Size—11″ × 9″. Pages—123. 20 lines per page and 19 letters per line. Script—Devanāgarī. No. of Granthas—1475.

Owner—C. O.

Subject—Same as No. 1309.

Beginning etc.—Same as No. 1310.

---

॥ मल्लिकामारुतच्छाया ॥

No. 1313. MALLIKĀMĀRUTACCHĀYĀ.

C. O. L. No. 1682.

Substance—Palm leaf. Size—$15\frac{1}{4}'' \times 2\frac{1}{4}''$. Leaves—19

36. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Owner—K. R. Keśava Piṣārodi Avl., Kaḍutturutty, Kylāsapuram.

Subject—A Sanskrit rendering of the prakrit portions in the Mallikāmāruta.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मल्लिकामारुतस्थानां प्राकृतानां यथाक्रमम् ।
शिशूनां सुखबोधाय छायामात्रं विलिख्यते ॥

End :

भगवति अमात्यविश्वावसुविष्णुरातसहितेन महाराजेन प्रेषितैषा पत्रिका । सखि रमयन्तिके! पश्य मधुकरिका प्रतिहारे हर्षपरेण नृत्यति ।

Colophon :

इति दशमोऽङ्कः ।

मार्जाररुद्राय नमः शिवाय ।

प्राकारबहिःकृष्णेन लिखितमिदं पुस्तकम् ।

Author :

Remarks—The Ms. is of recent origin. It has been copied by one Kṛṣṇa of Prākārabahi (Koṭṭappuram) house at Tiruvālūr. The following transcript and this work are identical except for a few variations in reading. Before the beginning of the text are seen four leaves dealing with disconnected topics.

---

॥ मल्लिकामारुतच्छाया ॥

No. 1314. MALLIKĀMĀRUTACCHĀYĀ.

C. O. L. No. 744.

Substance—Paper. Size—11″ × 9″. Pages — 81. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—900.

Owner—C. O.

Subject etc.—Same as No. 1313.

---

॥ माहिषमङ्गलभाणः ॥

No. 1315. MAHIṢAMAṄGALABHĀṆA.

C. O. L. No. 2206.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—30.

8—11 lines per page and 30 letters per line. Script—Malayāḷam. No of Granthas—500.

Owner—Kuñjan Nambutiri Avl., Cittūr Mana, Ceppu.

Subject—A Bhāṇa.

Beginning etc.—Same as No. 1549, DCSMMPL.

Author—Mahiṣamaṅgalam Nampūtiri.

Remarks—The label notifies the title as Bhāṇaviśeṣa.

---

॥ महिषमङ्गलभाणः ॥

No. 1316 A. MAHIṢAMAṄGALABHĀṆA.

C. O. L. No. 2496 A.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—30. 8—9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—500.

Owner—Pāppy Nettyāramma Avl., Cemmanāṭṭu Pakuty, Muriyamaṅgalam, Kunnattunāḍ.

Subject etc.—Same as No. 1315.

Author :

Remarks—The Ms. is of recent origin and the script is perfectly legible.

---

## ॥ सङ्गीतकेतुशृङ्गारलीलाचरितम् ॥

## No. 1316 B. SAṄGĪTAKETUŚṚṄGĀRALĪLĀ-CARITAM.

C. O. L. No. 2496 B.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—21. 8 lines per page and 20—28 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 1316 A.

Subject—The love-story of Saṅgītaketu and Śṛṅgāralīlā.

Beginning :

हरिः । श्रीगणपतये नमः ।

भङ्ग्या निजाङ्कानां-
मङ्गजमपि मानहीनमाकलयन् ।
सङ्गीतकेतुनामा
धीमानासीद् द्विजोत्तमः श्रीमान् ॥

कलाभिरपि पूर्णात्मा
कुमुदाभोगमावहन् ।
सतां प्रीतिकरः सोऽयं
द्विजेन्द्रः शुशुभेतराम् ॥

तस्मिन्नेव च समये—

सङ्केतभूमिः सुकुमारतायाः
सङ्गीतसाहित्यसरोमराली ।

शृङ्गारलक्ष्मीरिव सम्भृताङ्गी
श‍ृङ्गारलीलेति बभूव बाला ॥

End :

आबद्धमानौ निभृतं चरन्ता-
वाकस्मिकस्पर्शविकम्पिताङ्गौ ।
आवेशयामास परस्परं ता-
वानन्दचन्द्रः स्वयमभ्युदञ्चत् ॥

आमग्नाङ्गममन्दरागमधुरं तावाश्लिपन्तावुभा-
वास्राम्भोविसरैरतीव शिशिरैरासिच्यमानाङ्गकौ ।
आमोदादगलत्परावभिनवीभूताविवात्युत्सुका-
वानन्दामृतवारिधाम तनुतामव्याजमामज्जनम् ॥

Colophon :

समाप्तम् ।

श्रीसरस्वत्यै नमः । गुरुभ्यो नमः ।

Author :

Remarks—The work seems to be an attempt at imitating Mālatīmādhava. The last Fol. is blank.

## ॥ मालतीमाधवव्याख्या ॥

No. 1317. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 210.

Substance — Paper. Size—11″ × 9″. Pages—725. 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—9100.

Owner—C. O.

Subject—An elaborate commentary on the Mālatīmādhava.

Beginning :

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्ना(सा)ग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु फीत्कारवत्यः ॥

अस्तु हस्तिमुखं वस्तु सच्चिदानन्दविग्रहम् ।
प्रत्यूहव्यूहविहतिव्रहनाय सदा मम ॥

शिरस इव गलन्तीमन्तरभ्युद्गिरन्तीं
सुरसरितमुदारां वाक्छलादाननेन ।
दहतु भवभयं सा शंभुमूर्तिर्मुनीनां
दहरकुहरलीलादक्षिणा दक्षिणा वः ॥

यद्गीतार्थश्रवणरसतो ध्वस्तमोहान्धकारं
कृष्णानन्दी त्रिजगति नरो जिष्णुभूयं जिहीते ।
तस्मिन्नेव प्रकटितमहाविश्वरूपं तदेकं
पूर्णज्योतिः स्फुरतु हृदि मे पुण्डरीकायताक्षम् ॥

चिन्माहोदधिकल्लोलं तन्महो वितनोतु वः ।
स्तनन्धयं यशोदाया धनञ्जयधनञ्जयम् ॥

End :

दुर्गस्य वनस्य गह्वरे अस्मद्वर्गेण लवङ्गिकादिनास्मद्बन्धुसमूहेन सह भगवतीं कामन्दकीमनुस्मृत्य अन्वेषणेन प्राणेति तस्या विचारक्षमत्वादर्थानर्थनिर्णयप्रमाणत्वं प्रकाशयति । एवं योगिन्यागमनमाधवनयनरूपं कलयामीत्यनेन ....दौ कामन्दक्यादीनामपि प्रवेशं सूचयति—कविकुलतिलक इति । अशेषमतिमङ्गलम् ।

Colophon :

मालतीमाधवस्येत्थं नवमाङ्कार्थचर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

Author :

Remarks—The transcript comprises the first three Acts.

## ॥ मालतीमाधवव्याख्या ॥

No. 1318. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 2311.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—88. 10 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—4800.

Owner — Puṇartam Tirunāḷ Eḷayatampurān, Puññār.

Subject—Same as No. 1317.

Beginning:

... .... .... ... ... नां
दहरकुहरलीला दाक्षिणा ...
पूर्णज्योतिः स्फुरतु हृदि मे पुण्डरीकायताक्षम् ।
चिन्माहोदधिकल्लोलं तन्महो वितनोतु ...

.... .... .... .... .... ....
कटे शैलमार्गे ददति सुहृद एव प्रौढहस्तावलम्बम् ।
वक्तुं शक्योऽर्थविस्तारो न विना.... ...ण्वति ।
धार्या सहृदयैः प्रीत्या व्याख्येयं रसमञ्जरी ॥

End:

मदयन्तिकामकरन्दागमनं मदयन्तिकाया मकरन्दस्यागमनं यद्वत् यत्परिमाणेन कालेन भवेत्, तावत् कालावधि । अनेन स्वपरिणयनायेत्युक्तमर्थं निश्चाययति, हर्षात् स्वभागधेयं चमत्करोति–

कल्याणवतां पुण्यवतां कल्याणसम्पन्मंगलसमृद्धिः उपरिष्टाद् ऊर्ध्वं-वीप्साप्यर्थादनुसन्धेया, उपर्युपरीत्यर्थः, संवत् प्रश्ने पदमनुवध्ना-तीतिवी(?)क्षितत्वात् एवमपि नो भविष्यति । अयमपि मकरन्द-विव... ... ....

Colophon :

मालतीमाधवस्येत्थं पञ्चमाङ्कार्थचर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

Author :

Remarks—Most of the leaves are worn out here and there and a few at the beginning are blank. The commentary covers almost the 6th Act.

---

## ॥ मालतीमाधवव्याख्या ॥

No. 1319. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 1657.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—102. 10—13 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2550.

Owner—Uttṛṭṭati Tirunāḷ Rāma Varma Tampurān, Pandaḷam Koccukoikal.

Subject—Same as No. 1317.

Beginning :

.... .... ....भाविनी लोकस्य कामपीडा यया च अत एव प्रथमचन्द्रलेखापि भ्रमं वहन्ती पूर्वपक्षप्रतिपदुदितायाश्चन्द्र-कलाया विभ्रमविलासं दधानेति सन्ध्यानुरञ्जितप्रारम्भां तारकानि-करशोभिनीं यामिनीं सिन्दूरारुणवदना नक्षत्रमालाख्यमुक्ताभरण ... ... ...णीमधिरूढा कौतूहले.... .... ....पणाविशि ष्टमालती ।

End :

कलहंस इति मधुराव्यक्तोच्चारः परमात्ममन्त्रः अघोरघण्ड इति अशास्त्रविहितहिंसापरत्वादधर्मः, कपालकुण्डलेति हिंसा सौदामि-नीति प्रकाशात्मिका, झटिति स्फुरणे सकलान्धकारपटलविघटन-पटीयसी विद्येत्यादिरुपासनोपयुक्ता (वास)नापि महाकवेर्दैष्टिकैर-नुसन्धेयेति सकलमतिमङ्गलम् ॥

Colophon :

मालतीमाधवस्येत्थं दशमाङ्कार्थचर्चनम् ॥
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

समाप्तमिदम् ।

यत्कारुण्यकटाक्षवीक्षणलवश्रद्धालवः साधव-
स्त्यक्त्वा पुत्रकलत्रवित्तधरणीगेहादिकं मूलतः ।
ग्रामात् काननमभ्युपेत्य विजनं भीमं तपः कुर्वते
तस्मै सात्वतपुङ्गवाय हरये कुर्वे नमस्यां सदा ॥

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥

श्रीषण्मुखाय नमः ।

श्रीगुरवे नमः ।

हरिहरहिरण्यगर्भेभ्यो नमः ।

शिवमस्तु ।

Author—Pūrṇasarasvatī.

Remarks—The first 12 leaves are missing and some are damaged.

---

## ॥ मालतीमाधवव्याख्या ॥

No. 1320 A. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 2286.

Substance—Palm leaf. Size—14″ × 2″. Leaves—190. 9—12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—7500.

Owner—Devan Devan Nambūdiri Avl., Puliyanamkara, Mattapally, Karumaśśeri, Parūr.

Subject—Same as No. 1317.

Beginning—Same as No. 1319.

End :

भवानी, कामन्दकीति । कामितार्थदानसामर्थ्याद् भक्तिः बुध-
रक्षितेति बुधैः विद्वद्भिः परिपालितत्वात् । .... ....लवङ्गिकेति ।
परिमलबहलत्वात्, कीर्तिः कलहंस इति मधुराव्यक्तोच्चारः परमा-
त्ममन्त्रः अघोरघण्ड इति अ... .... ...सौदामिनीति प्रका-
शात्मिका । झटिति स्फुरणेन सकलान्धकारपटलविघटनपटीयसी
विद्येत्यादिरुपास.... .... .... .... सकलमतिमङ्गलम् ॥

Colophon :

मालतीमाधवस्येत्थं दशमाङ्कार्थचर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

श्रीषण्मुखाय नमः ।

Author—Pūrṇasarasvatī.

Remarks—Spaces are left out on the first few leaves. A few verses are seen after the colophon.

---

## ॥ मालतीमाधवम् ॥

No. 1320 B. MĀLATĪMĀDHAVAM.

C. O. L. No. 2286 B.

Substance—Palm leaf. Size—14″ x 2″. Leaves—40.

8—12 lines per page and 48 letters per line. Script—Malayaḷam. No. of Granthas—1200.

Owner—Same as No. 1320 A.

Subject--The love-story of Mālatī and Mādhava.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सानन्दं नन्दिहस्ताहतमुर(वरीज)रवाहूतकौमारबर्हित्रा-
सान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभो घट्टनव्यस्तविश्वा
वैनायक्यश्चिरं वो वदनविधुतयः पान्तु फीत्कारवत्यः ॥

अपि च—

चूडापीडकपालसंकुलगलन्मन्दाकिनीवारयो
विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः ॥

End:

माधवः—नातः परं प्रियमस्ति ।

तथापीदमस्तु भरतवाक्यम् ।

शिवमस्तु सर्वजगतां
परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं
सर्वत्र सुखी भवतु लोकः ॥

Colophon :

इति निष्क्रान्ताः सर्वे ।

दशमोऽङ्कः । श्रीकृष्णाय नमः ।

संस्मृत्य यत्पादयुगं महापदोऽ-
प्यभ्यागमे भक्तजनार्तिनाशनम् ।
लोका लभन्ते हृदि निर्वृतिं परां
स माधवो मावतु दीनचेतसम् ॥

रामेण लिखितमिदं पुस्तकम् ।

1105-ാമാണ്ടു് ധനുമാസം 10-ാംതിയതി ശുക്രവാരവും ഉത്രട്ടാതിയും സപ്തമിയും കൂടിയ ദിവസം എഴുതിത്തീൎന്നു.

शुभम् ।

मालतीमाधवं नाम नाटकं समाप्तम् ।

श्रीरामचन्द्राय नमः ।

अक्षरं यत् परिभ्रष्टं
मात्राहीनन्तु यद भवेद् ।
क्षन्तुमर्हन्ति विद्वांसः
कस्य नास्ति व्यतिक्रमः ॥

Author—Bhavabhūti.

Remarks—The Ms. was copied in 1005 M. E. as evinced by the colophon. After the close of the text is seen the commentary on the last

portion of the last Aṅka of the same work. Two leaves are blank at the close of the codex.

---

## ॥ मालतीमाधवव्याख्या ॥

No. 1321. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 2230.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—128. 10—12 lines per page and 84—88 letters per line. Script—Malayāḷam. No. af Granthas —7500.

Owner—Nārāyaṇan Rāmapiṣārodi Avl., Kiḍaṅgūr.

Subject—Beginning: Same as No. 1317.

End—Same as No. 1319.

Colophon:

मालतीमाधवस्येत्थं दशमाङ्कस्य चर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

नारायणेन लिखितमिदं पुस्तकम् ।

नमश्शिवाय । शिवायै नमः ।

Author:

Remarks—Several leaves in the middle are damaged.

---

## ॥ मालतीमाधवव्याख्या ॥

### No. 1322. MĀLATĪMĀDHAVAVYĀKHYĀ.

C. O. L. No. 2547.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 2''$. Leaves—136. 10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4760.

Owner—Manayattāṭṭu Vāsudevan Nambūri Avl., Vaikom.

Subject—Same as No. 1317.

Beginning :

......ङ्कालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैरिति वचनात् स्वभावोक्तिः स्फुटैव। विहस्येति। स्वयं शृङ्गारित्वाच्चेपां बीभत्सरसमपि शृङ्गारत्वेनाभिमन्य.........नश्चमत्करोति। प्रादोषिकः प्रदोषे रजनीमुखे भवः 'तत्र भव' इति ठञ्। प्रमोदोहर्षः। पिशाचानां पिशाच्यश्च पिशाचाश्च पिशाचाः 'पुमान् स्त्रिये'त्येकशेषः। ...... आन्त्रैः कल्पितेत्यादि कल्पितमङ्गलप्रतिसराः कल्पितो निर्मितोऽभ्युदयार्थः प्रतिसरः कौतुकहस्तसूत्रं यासां, हस्तसूत्रम्, प्रतिसर इति ... ... ... स्त्री(हस्त)रक्तोत्प(ल)व्यक्तोत्तंसभृतः मृतानां स्त्रीणां हस्ता एवारुणसुकुमारत्वाद्रक्तोत्पलान्यरुणकमलानि अथ र ... ... रुहे रक्तोत्पलं कोकनदम् इत्यमरः।

End—Same as No. 1319.

Colophon :

१. मालतीमाधवस्येत्थं पञ्चमाङ्कार्थचर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

२. ... ... ... ...
... .... नं चक्रे पूर्णसरस्वती ।'

Author—Pūrṇasarasvatī.

Remarks—The Ms. begins abruptly with the 5th Act. It is old and worn out.

---

## ॥ मालविकाग्निमित्रव्याख्या ॥

## No. 1323. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

C. O. L. No. 348.

Substance—Paper. Size—14″ × 8¼″. Pages—73. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—825.

Owner—C. O.

Subject—A commentary on the Mālavikāgnimitra.

Beginning :

देवदेवमजं नौमि जगतामेककारणम् ।
वारणं वदने व्याख्यां कर्तुं निर्विघ्नसिद्धये ॥

प्राचां पदं प्राथममाप्तवाचा-
माचारशुद्धः शतपत्रयोनेः ।
वाचामधीशा निजरक्तवीणां
वाचालयन्ती पुरतस्समिन्धे ॥

एकैश्वर्य इति—प्रणति बहुफले नमस्कारेणातिशयप्रयोजनफलदे एकैश्वर्ये मुख्यसम्पदि अणिमाद्यष्टगुणोपेते मुख्यसम्पदि स्थितोऽपि सर्वदाधिष्ठितोऽपि स्वयं कृत्तिवासाः गजचर्मधारी सिंहाजिनधारी वा 'सिंहाजिनश्चैव दुकूलभाव' इति 'क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना' इति विरुद्धालङ्कारः ।

End :

आज्ञापयत्वार्यः—किं भूयः प्रियमुपतिष्ठामि । त्वं हे चण्डि! त्वं मे नित्यं प्रसादसुमुखी प्रसन्नमुखरागा भव । प्रतिपक्षहेतोः सपत्नीजनसत्पस्यते(?) खलु जायत एव प्रजानां सर्वमपि प्रार्थनीय-मस्मिन् सम्पत्स्यत इति ।

Colophon :

इति माळविकाग्निमित्रव्याख्याने श्रीनीलकण्ठीये पञ्च-मोऽङ्कः । समाप्तं माळविकाग्निमित्रव्याख्यानम् ।

वन्दे महास्तिन्दुककाननान्त-
वेशन्तवेश्मस्फटिकावदातम् ।
आलोकतो यस्य जलाशयोऽपि
हन्तोष्णतां विन्दति विन्दताञ्च ॥

Author—Nīlakaṇṭha.

Remarks—The commentary is simple and lucid. The closing portion is different from that of No. 12611, DCSMM. Vol. XXI.

---

## ॥ मालविकाग्निमित्रव्याख्या ॥

No. 1324. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

C. O. L. No. 358.

Substance — Paper. Size—$8\frac{1}{4}'' \times 1\frac{1}{4}''$. Pages — 50. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—550.

Owner—C. O.

Subject—Same as No. 1323.

Beginning:

प्रणम्य रम्यं परमेश्वरस्य
प्रसादलभ्यं चरणारविन्दम् ।
यथामति व्याक्रियते मयेदं
सुनाटकं मालविकाग्निमित्रम् ॥

नान्द्यन्ते सूत्रधारो रङ्गं प्रविश्याह—एकैश्वर्य इत्यादि । यः प्रणत-बहुफले प्रणतानां बहुफलप्रदे एकैश्वर्ये अनन्यविषयेश्वरत्वेऽस्ति

कोऽपि स्वयं कृत्तिवासाः ग्राम्यैरलङ्कारैरसंयुक्तः कान्ता सम्मिश्र-देहोऽपि यस्त्वविपये मनसां यततां परस्ताद् अतिदूरे स्थितः अ-ष्टाभिस्तनुभिः कृत्स्नं जगद् बिभ्रतोऽपि यस्य नाभिमानः न गर्व-संरभः सन्मार्गालोकनाय उत्तममार्गदर्शनाय च तामसीं तमोगुण-प्रभावां अन्धकारवतीं च वो वृत्तिं व्यपनयतु अपाकरोतु । इयं चतुष्पदी नान्दी ।

End :

अनुगृहीतास्मि अवसितकार्यया भगवत्या न युक्तं अस्मान् परि-त्यक्तुम् । आज्ञापयत्यार्यपुत्रः । किं ते भूयः प्रियमनुतिष्टामि । वरये प्रार्थये प्रतिपक्षो माळविका आशास्यमित्यर्थान्तरम् ।

Colophon :

इति पञ्चमोऽङ्कः । समाप्ता माळविकाग्निमित्रव्याख्या ।

Author :

Remarks—This commentary is different from that noticed under No. 1323. It is more precise. Neither the name of the work nor of its author is known from the transcript.

---

## ॥ मुद्राराक्षसव्याख्या ॥

## No. 1325. MUDRĀRĀKṢASAVYĀKHYĀ.

C. O. L. No. 871.

Substance—Paper. Size—11½" x 10". Pages—282.

18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—2850.

Owner—C. O.

Subject—Exposition of the political acumen of Cāṇakya by means of a drama.

Beginning—Same as No. 1562, DCSMMPL.

End :

नाटकसमाप्तौ च वाराहीमात्मयोनेरितिपद्येनादिवराहरूपिणो भगवतो महापुरुषस्य जगदुद्धरणगुणसङ्कीर्तनरूपं मङ्गलं विरचितवान् अनेन चोपास्योपासकरूपभेदावस्थायामप्युपास्ययोर्हरिहरयोरभेदेनैवोपासनं अखिलश्रेयःप्राप्तिसाधनत्वेन श्रुतिस्मृतीतिहासपुराणप्रसिद्धमित्युक्तं भवति । तथा च श्रीमदाचार्यभगवत्पादैः श्रीविष्णुसहस्रनामभाष्ये हरिहरयोरभेदोपासनपराणि महाभारतादिवचनान्युदाहृतानि ।

नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥

त्वदुपासा जगन्नाथ सैवास्तु मम गोपते! ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते! ॥

यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ।

इत्यादीनि वचनानि द्रष्टव्यानि । गङ्गास्तुतौ च भगवत्पादैरनयोरभेदभक्तिप्रार्थना कृता ।

'भूयाद् भक्तिरविच्युता हरिहराद्वैतादिका शाश्वती' इति ।

Colophon :

इति श्रीमत्त्र्यम्बकराजयज्वप्रभुवर्याश्रितेन ढुण्ढिराजव्यासयज्वना विरचिते मुद्राराक्षसनाटकव्याख्याने सप्तमोऽङ्कः ।

बुधो ढुण्ढिर्नाम्ना जगति विदितो लक्ष्मणसुधी-
मणेः श्रीमद्व्यासान्वयजलधिचन्द्रस्य तनयः ।
स्फुटं साङ्गं व्याख्यन्नयगुणविदस्त्र्यम्बकविभो-
र्नियोगात् प्रौढार्थं बुधगणमुदे नाटकमिदम् ॥

अत्र नाटके चतुर्थेऽङ्के कविरद्भुतरसचाणक्यनीतिविषयकस्त्रसंविधानरचनाक्लेशमनुभाव्य प्रमोदमनुभवन्तः सरसाः सहृदया जगति दुर्लभा इति मन्वानः स्वयमेव स्वस्य नाट(के?की)यं संविधानक्लेशं राक्षसवचनव्याजेन प्रस्तौति ।

Author—Ḍuṇḍirāja.

Remarks—The work is printed in N. S. P. B. The opening verse herein occurs in its introduction. This transcript is in two volumes. Just after the colophon the poet furnishes a genealogical table. The following portion seen in the printed text is missing herein :

कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्
बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च ।

कुर्वन् बुद्ध्या विमर्शं प्रहृतमपि पुनः संहरन् कार्यजातं
कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥

इति । एवं नाटकीयचतुष्पट्यङ्गलक्षणानुसरणकविहृदयाभिमतार्थाविष्करणप्रयासोऽपि व्याख्यातुरनुमोदयितव्यः सहृदयैरिति प्रार्थयामः ।

कर्तेदं नाटकस्याद्भुतरसविकसत्संविधानप्रवीणः
क्लेशं कौटल्यनीतौ बहुविधमतनोल्लक्षणाढ्यैर्वचोभिः ।
तत्तल्लक्ष्यस्तदङ्गानुसरणविषयायासमस्मद्विधानां
राजश्रीत्र्यम्बकार्यानुमति सुविहितं वीक्ष्य तुष्यन्तु सन्तः ॥

श्रीमद्विशाखकविवर्यकृतिर्मयैषा
श्रीत्र्यम्बकानुमतितो विवृता यथावत् ।
श्रीस्वामिशैलवसतिर्भगवान् विशाखो
देवोऽनया मुदमुपैतु सनत्कुमारः ॥

---

## ॥ यदुवीरोदयः ॥

### No. 1326. YADUVĪRODAYA.

C. O. L. No. 678.

Substance—Paper. Size—11″ × 9″. Pages — 181. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1800.

Owner—C. O.

Subject—A drama based on the story of Kṛṣṇa.

Beginning:

रोचते तदिहासभ्यं निबन्धनमनुत्तमम् ।
धीरोदात्तापदानैकवस्तुप्रस्तुतसौरभम् ॥

(इति सादरं विमृश्य) सप्रमोदास्मितम् ।

मारिप! श्रृणोषि तावत् । महार्षिणा पाराशर्येण पर्याप्तभाग्येन भगवता महात्मना महाभारतप्रमुखप्रबन्धादर्शतलदार्शितनिखिलनिगमार्थसारशरीरेण भक्तियोगप्राधान्येन चित्तप्रस(क्त?क्तं) भूयोऽपि भागवतं नाम श्रीमत्पुराणरत्नं निरमायि ॥

* * * * * * *

* * * * * * *

तदन्वयप्रसूतस्य कस्यचिद् द्विजन्मनः परमेश्वरशर्मणः सद्धर्मनिष्ठस्य गरिष्ठस्य स्वाध्यायाध्ययननिरतस्य निरन्तरहरिचरणसरोजस्मरणदूरीकृतदुरितराशेरात्मजेन शङ्करनाम्ना विरचितं यदुवीरोदयं नाम नाटकं तत् प्रयुञ्जानाः परिषदमेनामाराधयामः ॥

End:

नारदः—सखे! नयविदामग्रेसरोऽयं वीराणां च कूपकर्णः । इतः पश्य एप तावदशेपैरायुधैराहतोऽपि हिमवन्निवासासारपूरैरैरावत इव च पारिजातमाल्यजालैरपरिक्षीणव...लोहलीहलेन सलीलमाकृष्य

सम्भिन्नं तपनार्चिषा भृशतरं रोषानलज्वालया
सन्तप्तं पृथुकन्थरं प्रतिनवेनालङ्कृतं वाससा ।

सम्पूर्णोदरमार्द्ररक्तसलिलैरारब्धरत्नं गुणैः
सम्भाव्यं च ... ... .... ... ॥

Colophon :

इति यदुवीरोदये चतुर्थोऽङ्कः ।

Author—Śaṅkara.

Remarks—The author belonged to the Śivakara village. He was the son of Parameśvara and grandson of Citrabhānu. The Ms. extends to a portion of chapter 5. The first two leaves are lost.

---

## ॥ रघुवीरचरितम् ॥

## No. 1327. RAGHUVĪRACARITAM.

C. O. L. No. 1842.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1''$. Leaves—90. 5 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Kūḍallūr Brahmadattan Nambūripāḍ Avl.

Subject—The story of Rāma.

Beginning—Same as No. 1564 A, DCSMMPL.

End :

लक्ष्म—(वसिष्ठं प्रति) आर्यपदातिपरमाणुर्लक्ष्मणः प्रणमति ।

वसि—(गाढमालिङ्गय)

हतेन्द्रजित्पक्ष्मलविक्रमेण
वीर त्वया लक्ष्मण लक्ष(यिष्यामि) ।
दिवौकसः सम्प्रति सम्प्रहृष्टा
वलस्य हन्तारमपेतशल्यम् ।

भर—आर्य दुर्यशोभारवैवाधिको भरतः प्रणमति ।
राम—वत्स नैवं वक्तव्यमिति ।

Colophon :

दशमुखवधो नाम षष्ठोऽङ्कः ।

Author—Bhaṭṭa Sukumāra.

Remarks—The work extends up to a portion of the 7th Act.

---

## ॥ रसिकतिलकभाणः ॥

No. 1328. RASIKATILAKABHĀṆA.

C. O. L. No. 809.

Substance — Paper. Size—12″ × 9″. Pages — 92. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1000.

Owner—C. O.

Subject—A dramatic composition of the Bhāṇa type,

Beginning :

आनन्दामृतवर्षसूरसुमतामापाटलैः पल्लवै-
  राविर्भूतकलस्वनैः परभृतैरामन्थरैर्मारुतैः ।
उत्कूलैर्मधुनिर्झरैः सुमनसामुच्चावचैः सौरभैः
  श्रेयो मन्मथहर्षणं प्रथयतु श्रीमान् वसन्तोदयः ॥

अपिच—

विश्लेषव्यथया कृशेति पुरतो भृङ्गारवव्याहृतै-
  र्गन्धोर्वीधरबन्धुरानिलपरिरम्भैः कुहूसान्तनैः ।
आचारैरनुरुद्धता सुरभिणा नाथेन तैस्तैरपि
  प्रीतिः सा चिरमादृता भगवती पुष्णातु वो निर्वृतिम् ।

नान्द्यन्ते सूत्रधारः (सविनयमञ्जलिं बद्ध्वा)

*  *  *  *  *  *  *
*  *  *  *  *  *  *

सूत्र—(सप्रहासम्)वैदेशिकः स भोः श्रूयताम् ।

जात्यश्वदन्तिशिबिकाकनकाभिषेक-
  हाराग्रहारकाविराक्षसनामधेयैः ।
राज्ञादृतो नृपसभे भवता न किंस्वि-
  दश्रावि रामकविरार्यगृहीतनामा ॥

अपि च

मखिवररघुनाथस्वस्तिकर्मोपजातः
  सुगुणमणिखनिर्यश्चोलभूजन्मभूमिः ।

रसिकातिलकनामा तेन कौण्डिन्यकेन
व्यराचि रुचिरबन्धः कोऽपि भाणप्रबन्धः ॥

End :

लोकानन्दममन्दमाकलयतामेकाधिपस्यात्मजः
श्रीशाहक्षितिपालशेखरमणिः शृङ्गारिणामग्रणीः ।
राज्यं धीसचिवादिसम्भृतगुणोत्कर्षं तदस्यैधता-
मच्छिन्नैः कुलमस्य तन्तुभिरनुस्यूतामुपैतु श्रियम् ।

अपि च

तारुण्यं ध्रुवमस्तु नीरजदृशां तत्तादृशैर्विभ्रमै-
शृङ्गारो जयतु प्रसन्नमधुरःश्रेयस्विना स्थायिना ।
देवः शम्बरशासनो विहरतां दिक्षु प्रतापोन्नतः
प्रीयन्तां मधुचन्द्रचन्दनमरुत् प्राचः प्रियंभावुकाः ॥

निष्क्रान्तः । प्रथमोऽङ्कः ।

Colophon :

इति श्रीकौण्डिन्यकुल.... .... ... ...षो रघुनाथा-
ध्वरिवरतनयस्य जानकीगर्भजन्मनः कविराक्षसापरनामधे-
यस्य मुद्दुरामकवेः कृतौ रसतिलकभाणः समाप्तः ।

Author—Mudduráma.

Remarks—The genealogy of the author is given in the opening lines.

## ॥ राघवाभ्युदयः ॥

## No. 1329. RĀGHAVĀBHYUDAYA.

C. O. L. No. 96.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—134. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1340.

Owner—C. O.

Subject—A drama on the story of the Rāmāyaṇa.

Beginning:

विद्युद्वेल्लितवारिवाहपटलीराजज्जटाकुन्तलं
कालिन्दीमिलदभ्रसिन्धुविलसत्कालाहिमुक्तास्रजम् ।
ध्वान्तोन्मिश्रितकौमुदीलसदिभत्वग्बद्धकौशेयकं
सम्पृक्तं भवभूधरेन्द्रसुतयोर्भूयाद्वपुर्भूतये ॥

नान्द्यन्ते । सूत्रधारः ।

अलमतिविस्तरेण । (परितः पुष्पाञ्जलिं विकीर्य पुरतो विलोक्य) अहो समुज्जृम्भितः खल्वयमृतूनामग्रणीर्वसन्तः ।

तथाहि—

शिशिरक्लिष्टां भ्रमरीं विरुतैः परिसान्त्वयन् भ्रमरः ।
क्रीडति तथा निकामं सुखितः सहकारतरुशिखरे ॥

* * * * * *

साचिव्यधुर्ये विहितः पितृव्येणादृत्य शाहक्षितिपालमौलिः ।

आनन्दनामा विमलप्रसूतिः पुत्रो नृसिंहाध्वरिणः स एषः ॥

पारिपार्श्वकः—कीदृशः परिषदादेशः ।

सूत्र--तस्यैव त्र्यंबकरायमखिनः समनन्तरानुजेन भगवन्तरायनामधेयेन सम्प्रति प्रणीतं राघवाभ्युदयं नाम नाटकमभिनेतव्यमिति ।

End :

रामः—

दुर्धर्षं तदनुग्रहेण भवतां भग्नं धनुः शाम्भवं
दारा रूपजुषः समुन्नतकुलोत्पन्नाः समासादिताः ।
दुर्दान्तः सहनो निशाचरपतिर्लब्धं यशो निस्तुलं
लोका वीतभयाः कृताश्च किमितोऽप्यन्यत्प्रियं मेऽधुना ॥

तथापीदमस्तु भरतवाक्यम्—

अवतु विधिवदीश्वरो धरित्री-
मनुसरतु प्रकृतिव्रजः स्वधर्मम् ।
भवतु कृतिरियं भुवि प्रसिद्धा
भजतु मुदं भगवानपि प्रकाशम् ॥

(इति निष्क्रान्ताः सर्वे ।)

इति सप्तमोऽङ्कः ।

Colophon :

श्रीमति राघवाभ्युदये रामोद्वाहाभिषेको नाम सप्तमोऽङ्कः समाप्तः ।

Author — Bhagavantarāya, younger brother of Traimbakarāya Makhin of the Bhāradvājagotra and minister of Bhojala King.

---

## ॥ लक्ष्मीदेवनारायणीयम् ॥

No. 1330. LAKṢMĪDEVANĀRĀYAṆĪYAM.

C. O. L. No. 1624.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—42. 8—9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—625.

Owner—Aghoramanakkal Valia Tampurān Eravi Vāsudevan Nampūripāḍ Avl.

Subject—Drama.

Beginning etc.—Same as No. 1574, DCSMMPL.

Author:

Remarks—The work extends up to the 5th Act.

---

## ॥ लक्ष्मीमानवेदः ॥

No. 1331.. LAKṢMĪMĀNAVEDA.

C. O. L. No. 1821.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—40.

8 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas — 675. Complete.

Owner—Kuḍallūr Brahmadattan Nampūtiri Avl.

Subject—The story of Mānaveda.

Beginning :

हरिः श्रीगणपतये नमः ।

यद्दोरन्तरसीम्नि मङ्गलमयं तत्सन्निधत्ते महो
यन्नाभीकमलोदरेण... ...विश्वद्रुमोऽङ्कूरवान् ।
यन्नेत्रद्वितयप्रभैव तनुते नक्तंदिवप्रक्रियां
निद्राणापि तनोतु शर्म भवतां सा जागरूका दया ॥

अपि च––

क्वचित्पदनमन्महि क्वचन मन्दपादक्रमं
क्वचिज्जयिजटाभ्रमि क्वचन कम्पमानालकम् ।
क्वचित् सफणिफूत्कृति क्वचन कङ्कणक्काण(वान्?वत्) ।
करोतु शिवयोः सुखं नटनकर्म (वान्ता?वस्ता) दशम् ॥

॥ (नान्द्यन्ते सूत्रधारः) ॥

तावद्रङ्गपूजां सम्पादयामि ।(परिक्रम्य) 'जय जय जगद्विमोहिनि ! जय जय भरतकुलभागधेयनिधे ! जय जय रङ्गनिवासिनि ! जय जय रसभावपरिणते ! देवि !' इति त्रिसाम्ना पुष्पाञ्जलिं विकीर्य निष्क्रम्य सम्प्रार्थनं ।

नाट्येनाहं महता सभ्यान् रञ्जयितुमारभे देवि ! ।

निर्विघ्नमेव मातर्दयया निर्वहणनैपुणं देहि ।

( नेपथ्याभिमुखमवलोक्य ) आर्ये ! इतस्तावत् ।

( प्रविश्य )

नटी—आणवेदु अज्ज(वुत्तो)

सू—आर्ये !....प्रत्यादिष्टोऽसि सकलराजन्यको... ...क्य मयूखमञ्जरीनीराजितचरणयुगलस्याद्वन्द्वनिजभुजापदानग्रीष्मोष्मातिरेक-शोषिताहितनरपतिकुलमहानदसहस्रकूलङ्कषावलेपप्रवाहस्य अशेषदिग्भित्तिकटतटास्फालनप्रतिस्खलनोज्जृम्भमाणोद्वेलविमलविमलतरयशःक्षीरपारावारपूरलहरीपरम्परापूरितब्रह्माण्डोदरकुहरस्य जलधरनिधिजलनिधिमिहिरसुतसुरभिसुरतरुचिन्तामणिप्रमुखवितरणधौरेयप्रवाहपरीभावपण्डितपाणिपङ्केरुहस्य षोडशमहादानसवनदीक्षादीक्षितस्य अपरिमेयगाम्भीर्यावधूतपाथःपरिवृढस्यामन्दतरधैर्याटोपाधरितमहामेरोर्विश्वोत्तीर्णपराक्रमप्रक्रियापराचीनसव्यसाचिदोर्वैभवस्य दाशरथिधर्मनन्दननिखिलभुवनविख्यातधीरोदात्तगुणगणचमत्कृतिनिकृतिकृतवसुखस्य(?) चण्डकरतेजःप्राचण्ड्यखण्डनवै..सुधाकरकान्तिकन्दलनपरिणतिपाटच्चरवदनसौभाग्यस्याज्ञावज्ञातसुग्रीवस्य प्रतिज्ञानुकृतपरशुरामस्य निरन्तरविहरमाणकमलाकरकमलकिञ्जल्कपुञ्जरञ्जितदोरन्तस्य मनुमान्धातृरघुनृगनलनहुषनाभागभरतभगीरथदिलीपदशरथशिबिजीमूतवाहनहरिश्चन्द्रप्रमुखपूर्वतनराजर्षिमण्डलप्रवर्तिताध्वाध्वनीनस्य वीतिहोत्रगोत्रवाराकरपारिजातस्य हनुमदभिमुद्रितकेतोरात्मशरासनाङ्कितशङ्करशरासनस्य शैलार्ण(व)चक्रवर्त्तिनश्चरणायुधक्रोडपुरीपुरन्दरस्य केरलेश्वरस्य महाराजस्य मानवे(त?द)स्य

चरणसरोरुहोपजीविना मन्त्रिमण्डलेन यथा—

"यातायातश्रताङ्गसार्थचरणैः कृष्टैर्यथा लाङ्गलैः
प्रत्यर्थिक्षितिपालगात्रविगलन्मेदोभरैः पङ्किले ।
खड्गोत्कृत्तमदान्ध(सुन्दर? सिन्धुर)घटामूर्धन्यमुक्ताफलै-
र्बीजावापमिवातनोति यशसां यो युद्धकेदारके" ॥

अस्ति चैतेषां सचेतसामनर्गलं देवस्य मानवेदस्य चरितदर्शने कौतूहलम् ।

End :

राजा——भगवति भार्गवे प्रसन्ने किं मम न सम्पत्स्यते ।

भार्गवसमुद्रराजौ——(राजानं प्रति) राजर्षे ! मानवेद ! किं ते भूयः प्रियमुपहरावः ।

राजा——(उभौ प्रति) किमतः परमपि प्रियमस्ति ।

तथापीदमस्तु भरतवाक्यम् ।

विश्वस्यास्तु शुभं सदा वसुमती सस्योत्तरा जायतां
स्वां वर्णाश्रमवृत्तिमादरयुताः कुर्वन्तु सर्वाः प्रजाः ।
आविर्भावमुपैतु च श्रमवतां सारस्वतं लोचनं
कर्म ब्रह्म च मामकी पुनरियं मीमांसतां शेमुषी ॥

Colophon :

इति निष्क्रान्ताः सर्वे ।

पञ्चमोऽङ्कः । शुभमस्तु ।

समाप्तमिदं लक्ष्मीमानवेदं नाम नाटकम् ॥

Author :

Remarks—The Ms. is very old and the script is illegible.

---

॥ लीलावती ॥

No. 1332 A. LĪLĀVATĪ.

C. O. L. No. 958 A.

Substance—Palm leaf. Size—7″ × 1″. Leaves—44. 5 lines per page and 21 letters per line. Script—Malayāḷam. No. of Granthas — 275.

Owner—Nārāyaṇan Nārāyaṇan Eḷayatu Avl., Vempanāṭṭillam, Ambalapuzha.

Subject—A *Vīthī* with Līlāvatī as the heroine.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

तत्पादपद्मयुगलं गिरिकन्यकाया
लोकातिशायिचरितं भवतः पुनातु ।
उल्लासयन्ति यदिदं मुहुरीश्वरस्य
चूडानिशाकरकिशोरमयूखलेखाः ॥

नान्द्यन्ते सूत्रधारः—आज्ञापितोऽस्मि निखिलशास्त्रपुराणनाटकप्रप-
ञ्चसततपरिशीलनाविशदान्तरात्मनो नित्यसान्निदधदम्बरधुनीना-
थपरिचरणपरायणस्य महाराजदेवनारायणस्य पादपद्मोपजी-
विना महीसुरसमाजेन यथा भो रङ्गदीप!

अभिनवपदबन्धबन्धुरार्था-
मभिनय कामपि वीथिकामुदाराम्।
शुचिरसमधुराणि या बिभर्ति
प्रचुरविचित्रतराणि चेष्टितानि ॥

इति। तद्यावद् गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि।

End:

देवी मय्यनुकूलभावमधुरोदर्कं मनो लम्भिता
मह्यं सम्प्रति दापितेयमनया कर्णाटराजात्मजा!
ताम्राक्षो विनिपातितो ननु भवाञ्जागर्ति कृत्येषु मे
संक्रान्ता मयि चक्रवर्तिपदवी भूयः किमाशास्यते ॥

तथापीदमस्तु भरतवाक्यम्।

काव्ये नव्यपुराणभेदगणनाहीना धियो धीमतां
संगृह्णन्तु गुणानणूनपि तथा दोषानपाकुर्वताम्।
लोकानामवधूतमत्सरकथामैत्री तथोज्जृम्भतां
भक्तिर्नश्चिरमेधतां गुरुपदाम्भोजे जगन्मङ्गले ॥

इति परिक्रम्य निष्क्रान्तौ।

Colophon:

लीलावती नाम वीथी सम्पूर्णा! शुभमस्तु। श्रीनारायणभट्ट-
पादगुरुपादेभ्यो नमः। श्रीकृष्णाय नमः।

Author—Rāmapāṇivāda.

Remarks :

---

॥ चन्द्रिका ॥

No. 1332 B. CANDRIKĀ.

C. O. L. No. 958 B.

Substance—Palm leaf. Size—7″ × 1″. Leaves—25. 5 lines per page and 21 letters per line. Script—Malayāḷam. No. of Granthas—175.

Owner—Same as No. 1332 A.

Subject—A *Vīthī* with Candrikā as the heroine.

Beginning :

हरिः श्री गणपतये नमः । अविघ्नमस्तु ।

चूडाचन्द्रो नरीनर्ति यामेवानुहरन्निव ।
सा वः सन्ध्यामुखे शम्भोस्त्रायतां ताण्डवक्रिया ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्रधारः—(परिक्रम्य नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् किं ब्रवीषि प्रयोजनं तावदाकर्णयितुमिच्छामीति । तर्हि श्रूयताम्—अद्य खलु प्रकाशराज्यप्रकाशभूतस्य प्रतापविवेकविद्याविशेषशालिनः श्रीवीररायमहाराजस्याज्ञया स्वकुलबलस-

म्पत्सम्पादनपरायणस्य श्रीपरक्रोडनामश्वेतारण्यपुण्यक्षेत्रमधिवसतः शूलाग्रकीलितकीनाशस्य भगवतः श्रीपरमेश्वरस्य कृष्णचतुर्दशीमहोत्सवप्रसङ्गेन सञ्जातायामस्यां महाब्राह्मणपरिषदि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितां चन्द्रिकां नाम वीथीमभिनेतुमभिलषामः ।

End :

समन्तादवलोक्य

सखे, परिणतश्चायं दिवसः ।

आताम्रार्कमरीचिपावकमुखे तारालिलाजाञ्जलि-
र्यत्रैष प्रविकीर्यते पुनरसावन्यूनरागोदया ।
रक्ताम्भोदपटावगुण्ठनवती सम्प्राप्य सन्ध्यावधूः
स्वैरं यत्र च वासरं वरयते कालोऽयमालोक्यताम् ॥

इति निष्क्रान्तौ ।

Colophon :

चन्द्रिका नाम वीथी सम्पूर्णा ।
श्रीगुरुभ्यो नमः । मङ्गलमस्तु । श्रीकृष्णाय नमः ।

Author—Rāmapāṇivāda.

Remarks—This work was written by Rāmapāṇivāda under instructions from Vīrarāyamahārājā of Veṭṭattunāḍ (N. Malabar) to be enacted before the Brahmins assembled to partake in the Kṛṣṇacaturdaśī festival in the Śrī Parameśvara Temple at Calicut.

---

## ॥ लीलावतीच्छाया ॥

## No. 1332 C. LĪLĀVATĪCCHĀYĀ.

C. O. L. No. 958 C.

Substance—Palm leaf. Size—7″ × 1″. Leaves—8. 5 lines per page and 22—26 letters per line. Script—Malayāḷam. No. of Granthas—60.

Owner—Same as No. 1332 A.

Subject—Sanskrit rendering of the Līlāvatīvīthī.

Beginning:

हरिः । आर्य ! इयमस्मि, आर्य कोऽत्र आर्यस्य व्यवसायः, क आदेशः, का पुनस्तादृशी वीथी या कथितगुणार्यमिश्रैः, क एतस्याः कविः, जानामि यः पुराणमहीसुरवरिष्ठस्य प्रियमित्रमिति श्रूयते—

"गुरुतरविरहोत्कण्ठां सलिलधरो विह्वलचातकमहेलाम् ।
मनोरथघटनेन लब्धानन्दयति मन्द्रहुंकारः ॥

किमपि प्र(वे?)ष्टुमिच्छामि—मम भगिन्या रङ्गमल्लिकाया दुहिता रङ्गलक्ष्मीर्नाम चम्पानगरवासिना सङ्गीतमल्लनामधेयेन नर्तकेन क्रियच्चिरमिव प्रार्थ्यते । तस्मिन् पुनरस्य प्रथमगृहिण्या रङ्गमालाया असूयाभारोऽन्तरायः, अपिनामेदानीमेते महाब्राह्मणास्तयोरन्योन्यसंघटनरूपं मे वरं प्रतिपादयिष्यन्ति ।

End :

मन्ये उद्यानलक्ष्म्याः श्रवणपाशात् प्रभ्रष्टमिति तस्मात् मम देह्येतत्, येन ते किमप्याश्चर्यं दर्शयामि वैहासिक मया ज्ञातं युष्माकं कपटनाटकम् एतच्छीलावत्या स्वहस्तलिखितगाथासनाथं दन्तताटङ्कं प्रमादनिध्वस्तत्व हस्तात् प्रभ्रष्टमिति। तस्मात् गृहाण तावदेतत् महाराजं च दर्शय पश्चादवस्थानुरूपमनुभवतम्। अहं गमिष्यामि। प्रसीद कन्दलिके! प्रसीद।

Colophon :

Author:

Remarks :

---

## ॥ मालविकाग्निमित्रम् ॥

### No. 1332 D. MĀLAVIKĀGNIMITRAM.

C. O. L. No. 958 D.

Substance—Palm leaf. Size—7″ × 1″. Leaves—21. 7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—225.

Owner—Same as No. 1332 A.

Subject—Love-story of Mālavikā and Agnimitra.

Beginning etc.—Same as No. 1555, DCSMMPL.

End :

परि—समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद् गणदासः पुरस्कारमर्हति ।

रा —तेनहि मौद्गल्य एवमत्रभवतोरावेद्य नियोगमशून्यं कुरु ।

कञ्चु—यदाज्ञापयति देवः, इति निष्क्रान्तः । प्रविश्य गणदासः–
शर्मिष्ठायाः कृतिः लक्षगमध्या चतुष्पदा तस्याश्चतुर्थवस्तुका
.... प्रयोगमेकमनाः श्रोतुमर्हति देवः ।

रा—आचार्य ! बहुमानादवहितोऽस्मि निष्क्रान्तः, गण, राजा, जना

Colophon :

Author—Kaḷidāsa.

Remarks—The codex contains Act I and a portion of Act II. Three leaves are blank at the close.

---

## ॥ वसुमतीचित्रसेनीयम् ॥

### No. 1333. VASUMATĪCITRASENĪYAM.

C. O. L. No. 2034.

Substance—Palm leaf. Size—14" × 1½". Leaves—46. 7 lines per page and 50 letters per line. Script — Grantha. No. of Granthas—1000. Complete.

Owner—Bhagavatisubramoṇya Śāstrigal Anantakrṣṇa Śāstrigal Avl., Āśrāmam.

Subject—The story of Vasumatī and Citrasena.

Beginning:

यत्नेनापि समीक्षितं न जगतां मूलेन कोलेन य-
द्यत्तत्वं निगमास्त्रयोऽपि न परिच्छिन्दन्ति शक्त्या स्वया ।
आबालं भवति स्फुटं तदपि यद्भक्त्या कियत्यापि य-
न्निर्द्वन्द्वं पुरशासनस्य चरणद्वन्द्वं सदा चिन्त्यताम् ॥

किञ्च—

यत्र स्थावरजङ्गमात्मकमिदं त्रैलोक्यमालोक्यते
प्राप्ता यन्मुखनिर्गता श्रुतिरपि प्रामाण्यकोटिं पराम् ।
यस्यांशावतरा जयन्ति जगतीरक्षादिदीक्षाभृतः
स्वान्ते चिन्तयत स्वतन्त्रविभवं साम्बं परब्रह्म तत् ॥

वृत्तेन विस्मापयते जगन्ति रामाय तस्मै रचितः प्रणामः ।
यत्नेन पूर्वैः कृतमम्बुराशिं यः पूरयन्नश्मभिराप कीर्तिम् ॥

(नान्द्यन्ते सूत्रधारः)

(नेपथ्याभिमुखमवलोक्य) मारिष! इतस्तावत् ।

(प्रविश्य)

पारिपार्श्विकः—भाव! अयमस्मि ।

सूत्रधारः—आदिष्टोऽस्मि हालास्यपतिसेवासमागतैः सामाजिकैः।
यथा... 'अस्ति खलु भारद्वाजकुलजलधिकलानिधेः श्रीकण्ठ-

मतप्रतिष्ठापयितुरप्पय्यदीक्षितस्य पौत्रः कविबुधकण्ठीरव-नीलकण्ठमखिसोदर्यतानुगुणसाहितीसम्प्रदायः कविरप्प-य्यदीक्षितो नाम । यस्य दुष्षन्तचरितरुक्मिणीपरिणय-नालङ्कारतिलकादिकाव्यनाटकालङ्कारप्रबन्धनिर्माता पिता क-विरप्पय्यदीक्षितः परिष्टूयते सरसकविरिति सर्वलोकैः । तेन निर्वर्तितं वसुमतीचित्रसेनीयं नाम नाटकमभिनीयता-मिति ॥

End :

राजा---तर्हि कृत(ार्थः) ख(ल्व)हम् । सलज्जस्तिष्ठति ।

शान्तिमान्---स्वयमहं च किं ते प्रियमुपहरामि ।

राजा---(किमितो)ऽपि प्रियमस्ति । तथाप्येतत् ।

पन्थानः कविराजराजचरिता(स्स)न्त्वद्य घण्टापथाः
काव्ये मत्सरिदूपितेऽपि लभतामानन्दमद्योर्जितम् ।
(श्रद्धामद्य च सर्व) लोकहिततां जानन्तु देव्या गिरां
व्युत्प(न्ना) स्तु भवन्तु वा ननु ततस्सर्वं च भाग्यं स्थिरम् ॥

विद्यास्थानेषु सर्वेष्वपि गुरुपदवीं नाटकान्ते च काव्ये
निर्मातृत्वं विवादे प्रतिकथकमुखस्तम्भमुख्याधिकारम् ॥

Colophon :

अथ पञ्चमोऽङ्कः

Author—Appayyadīkṣita.

Remarks—The Ms. is very old and much damaged. It contains five Acts.

---

## ॥ वसुमतीचित्रसेनीयम् ॥

### No. 1334. VASUMATĪCITRASENĪYAM.

C. O. L. No. 406.

Substance—Paper. Size—$13\frac{3}{4}'' \times 8\frac{3}{4}''$. Pages—93. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—850.

Owner—C. O.

Subject etc.—Same as No. 1333.

---

## ॥ विक्रमोर्वशीयव्याख्या ॥

### No. 1335. VIKRAMORVAŚĪYAVYĀKHYĀ.

C. O. L. No. 363.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—31. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—400. Complete.

Owner—C. O.

Subject—A commentary on the Vikramorvaśīya.

Beginning :

प्रणम्य परमं देवं वल्लवीजनवल्लभम् ।
तद्विक्रमोर्वशीयाख्यं नाट्यं व्याक्रियते मया ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः]

रङ्गपूजा नान्दी । तस्यावसाने सूत्रधारो रङ्गं प्रविश्याह---वेदान्तेषु उपनिषत्सु एकपुरुषं अद्वितीयं पुरुषं रोदसी व्याप्य स्थितं अष्टाभिर्मूर्तिभिर्द्यावापृथिव्या...हु उपनिषद्वाक्यानीति शेषः ॥

End :

अनाकम्पधैर्य इत्यनेन समुद्रवद्गाम्भीर्यं सूचितम् । दिष्ट्या सखि! पुत्रस्य यौवराज्यश्रिया भर्तुरविरहेण वर्सेऽसा(धा)रणः खल्वभ्युदयः । एहि वत्स! मातरमभिनन्दय । एकसंश्रयदुर्लभं एकपुरुषविषये दुर्लभम् ।

Colophon :

इति पञ्चमोऽङ्कः

इति विक्रमोर्वशीयव्याख्या ॥

Author :

Remarks :

## ॥ विटनिद्रा ॥

## No. 1336. VIṬANIDRĀ.

C. O. L. No. 303.

Substance—Paper. Size—13″ × 8¾″. Pages—57. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—575.

Owner—C. O.

Subject—A *Bhāṇa*.

Beginning :

... ...तः प्राच्यै वृत्तेम ... ...प्रणयिनि विचल ... ... कुन्तघटितः ... पादाध ... .. थ ... नखविद्धत्सभाजना ...ये चिन्तयामि नैवमतो व्यवहरन् परागैश्चूतानि विडम्बयन् .... नां कलहकलुषाणां घटयिता वितत .... .... .... .. .. विजयते

इति निष्क्रान्तः

End :

भरतवाक्यम्

गिरां गतिमविज्ञाय भावं कवयतामपि ।
जनः परीत्य यतो न न(न्दु?न्दतु) न निन्दतु ॥

किञ्च,

यावत् खण्डेन्दुमौलिं श्रयति गिरिसुता यावदास्ते मुरारे-
र्वक्षस्यक्षीणहारद्युतिमणिशबले देवता मङ्गलानाम् ।

यावद् वक्त्रेषु मैत्रीमुपनयति गिरामीश्वरी पद्मयोने-
स्तावल्लक्ष्मीप्रसूतिः स्वयमवतु भुवं रामवर्मा नरेन्द्रः ॥

निष्क्रान्तः

Colophon :

विटनिद्राभाणः

सकलनिगमविद्भ्यः संगृहीतार्थशब्द-
स्तुतसकलरसेभ्यः प्राक्तनेभ्यः कविभ्यः ।
भवतु शिवमशेषप्राज्ञहृत्पुण्डरीको-
च्छ्वसनदिनमणिभ्यो भाणकृद्भ्यश्चतुर्भ्यः ॥

समाप्तः

Author :

Remarks :

---

## ॥ विद्धसालभञ्जिकाव्याख्या ॥

No. 1337. VIDDHASĀLABHAÑJIKĀVYĀKHYĀ.

C. O. L. No. 384.

Substance—Paper. Size—13½" × 8½". Pages—199. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1800. Complete.

Owner—C. O.

Subject--A commentary on the Viddhasālabhañjikā.

Beginning:

शृङ्गाररसात्मकं नाटकं चिकीर्षुः तदुपयोगि(नी?न)मिष्टदेवता-
नमस्कारमनुसन्दधाति--कुलगुरुरित्यादिना । अनङ्गः जयति
इत्यन्वयः । सर्वोत्कर्षो हि जयतेरर्थः । तेन च नमस्कारो ल-
भ्यते । कथं पुनः स(सर्वाद्भू?र्वोत्कृ)ष्टत्वमित्याह—कुलगुरु इत्या-
दि । अबलानां केलिदीक्षाविधाने केलिदीक्षाकरणे, केलिशब्देन यौ-
वनारम्भसंरम्भी भ्रूक्षेपकटाक्षावलोकनादिर्विलासः । कलासमूहश्च
कामशास्त्रोक्तो गृह्यते । दीक्ष इत्युत्कर्षहेतुः कश्चित्क्रियाविशेषः ।
यथाहाचार्यः --"दद्याच्च दिव्यभावं क्षिणुयाद्दुरितान्यतो भवेद्दी-
क्षा" कुलगुरुः वंशक्रमागतो गुरुः । रोहिणीवल्लभस्य प्रथमसुहृत्
चन्द्रस्य स्वाभाविको बन्धुः । उज्ज्वलस्वभावतया रतिपरिपोषकत्वा-
द्देवदेवस्य जेतुमशक्यस्य जेता आत्मनो विजयचिह्नं ... ...वी व-
पुर्लतां भगवद्वामभागे निवेशितवान् इति भावः ॥

End:

श्रुतिसूक्तिलेह्यमधव इति—पदार्थस्य सूक्त्यवस्थानामाशंसने
हेतुत्वाविवक्षणात् काव्यलिङ्गञ्च ॥ इति सकलमवदातम् ॥

भासतामादिदम्पत्योर्मानसे मे निरन्तरम् ।
सन्धिरद्भुतसंभोगरसनिर्वहणात्मकः ॥

Colophon:

विद्धसालभञ्जिकाव्याख्या सम्पूर्णा ।

Author :

Remarks—The following verse in praise of Śiva occurring after the colophon discloses that the author was His devotee.

रागद्वेषविवर्जितस्य कमलासंवासरम्याश्रय-
स्यानन्दैकपरायणस्य पुरजित्सेव्यस्य तत्सेविनः ।
गोविन्दस्य गुरोः समस्तजगतां सर्वज्ञता नोचिता
श्रीकैलासपुरेशितुर्यदि सखे! युक्तेति सा मन्महे ॥

---

॥ विद्धसालभञ्जिकाव्याख्या ॥

No. 1338 A. VIDDHASĀLABHAÑJIKĀVYĀKHYĀ.

C. O. L. No. 2365 A.

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{1}{4}''$. Leaves—97. 5 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1325. Incomplete.

Owner—Tuppan Tuppan Nampūtiri Avl., Punnorkkoṭṭu Mana, Kumārapuram.

Subject—Same as No. 1337.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

कुलगुरुरित्यादि-- कुलगुरुर्वंशक्रमागतो गुरुः केलिशब्देन यौवनारम्भसंरम्भिभ्रूक्षेपकटाक्षावलोकनादिर्विलासः कलासमूहश्च कामशास्त्रोक्तो गृह्यते । दीक्षेत्युत्कर्षहेतुः कश्चित् क्रियाविशेषः ।

'दद्याच्च दिव्यभावं क्षिणुयाद् दुरितान्यतो भवेद्दीक्षे'ति । परमसुहृत् स्वाभाविको बन्धुः उज्ज्वलस्वभावतया रतिपरिपोषकत्वात् ।

End :

विज्ञप्तो विचक्षणामुखेन देव्या भर्ता यथा अपकल्यागतस्य मृगाङ्कवर्मणः स्वसा मृगाङ्कावली नाम स्नेहेन भ्रातरं द्रष्टुमागता सन्दिष्टं च मे मातुलेन चन्द्रवर्मणा मातुलान्या हारलतया च। यथा-

'एषा ते भगिनी मृगाङ्कावली दैवज्ञैः कथितचक्रवर्तिगेहिनीभावा सा त्वया उचितं वरं लम्भयितव्या' इति। एवं देवी विज्ञापयति 'युष्मत्तोऽन्य एतस्या वरोऽयोग्यः; यतः पद्मरागमणिरेकावलिमलङ्करोति । तत्परिणयत्वार्यपुत्र एनाम् । नात्मनः श्रीरन्यहस्तं सङ्क्रामयितव्या भवति । न चैतदाशङ्कितव्यं 'किमिति देवी आत्मनः सापत्न्येन वर्तते' इति। यतो महाकुलप्रसूतानां महिलानां भर्तुः प्रियं प्रियं नात्मनः प्रियमिति। किं च पुनःपुनः रिपुणायित(?) एव ॥

Colophon :

(१) इति विद्धसालभञ्जिकाप्रदर्शिन्यां द्वितीयोऽङ्कः ।

(२) इति तृतीयोऽङ्कः

Author :

Remarks—The Ms. comprises 3 Acts and a fragment of the 4th. The colophon discloses the name of the commentary as Pradarśinī.

## ॥ मार्ताण्डभूपस्तुतिः ।

## No. 1338 B. MĀRTĀṆḌABHŪPASTUTI.

C. O. L. No. 2365 B.

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{1}{4}''$. Leaf—1. 5 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—14.

Owner—Same as No. 1338 A.

Subject—A panegyric of Mārtāṇḍabhūpa.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

अतापिञ्छश्यामानशिखिवरपिञ्छाञ्चितकचा
नगोपीसंश्लिष्टानकलमुरलीकेलिरसिकान् ।
अनश्रीभूतेन्द्राननमितसरोजन्मनिलया-
नवृन्दारण्यस्थाननिमिषवरान्नो मनुमहे ॥

सुवर्णालङ्कारध्वनियुतपदन्याससुभगां
गृहीतानेकार्थां गहनहृदयां सर्वसरसाम् ।
गलासक्तां कर्तुं कलितरुचि मार्ताण्डनृपते !
भवद्वाणीमेणीदृशमिव मनो मेऽभिलषति ॥

न भोगैः सम्भोगं युवतिनिकरैः केचन परे
विमाने मानेऽन्ये विमुखमतयः काननगतिम् ।

अभीता भीतास्त्वां कतिचन लभन्ते तव पद-
प्रणामेन प्रागाबनमुद्यमार्ताण्डनृपते ! ॥

End :

मार्ताण्डवर्मन् विदुषोऽप्यसत्यवाचो वयं सम्प्रति सम्मतीमः ।
सुहृद्विपद्ध्वंसनतत्परं त्वां द्विपद्विपद्ध्वंसनमाहुरेते ॥

सौजन्यमुद्रां विपुलां दधानो भवानसौजन्यविशारदो यत् ।
सत्पक्षपातश्च विपक्षपातः स्यातां तव श्रीयदुवंशकेतो! ॥

Colophon :

Author :

Remarks :

---

## ॥ माटभूपस्तुतिः ॥

No. 1338 C. MĀṬABHŪPASTUTI.

C. O. L. No. 2365 C.

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{1}{4}''$. Leaves—5. 6 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1338 A.

Subject—A panegyric of Māṭabhūpa.

Beginning :

श्वेताद्वैतकरेण तावकयशःपूरेण माटप्रभो
वर्णाली विविधापि नाम भुवनेष्वद्धाय निह्नूयते ।
निःशेषश्च पदं त्वया खलु हृतं सद्यः परेषामहो
तस्माद्वर्णपदप्रसङ्गविलये पद्यं कथं गद्यते ॥

नित्यं नित्यं त्वदीयप्रबलबलसमुत्कृत्तवैरिप्रवीरैः
सर्वासु स्वर्वधूनां ततिषु परिगृहीतासु माटाधिराज ! ।
अद्य छिन्नैरधन्यैः पुनराहितजनैर्नाकलाभेऽपि हीही-
रम्भादिस्त्रैणकुम्भोन्नतकुचभरसम्भावना दुर्लभाभूत् ॥

किं ब्रूमस्तव निस्तुलं गुणवतामावर्जने कौतुकं
कोदण्डोऽपि गुणीति येन विधृतो हारोऽपि वीर ! त्वया ।
सर्वं तिष्ठतु तादृशं गुणपदप्रस्तावमात्रेण यत्
स्वीचक्रे गुणकापुरीमपि भवान् माटक्षमावल्लभ ! ॥

End :

उत्तालशैलतनयाकृतगीतरम्यं
नृत्तालये सपदि नृत्यति कृत्तिवासाः ।
स्पर्धाकुले(न?)व किल निर्ध्वनति प्रकामं
स्वर्धुन्यसौ पुनरमुष्य जटाकुटीरे ॥

त्वत्कीर्तिप्रकरे नितान्तधवले प्रोढां त्रिलोकीवधूं
नानालिङ्गति विम्बमीश किमिव ब्रूमस्तदीयां दशाम्
हर्षोन्मीलितमर्कचन्द्रनयनद्वन्द्वं तमः कैशिकं
व्यामुक्तं गलितं नृपान्तरयशःक्षौमं क्षमावल्लभ ! ॥

समीकरोपि स्वमनो दधानः समीकरोपि द्वितयानरातीन् ।
असंश्रितत्वानपि संश्रितत्वान्नरेन्द्रयन् सौ?वपदे करोपि ॥

Author :

Remarks—A leaf in the middle is missing. Subsequently occur the following verses referring to Devanārāyaṇa :

कृपाणीयं विम्वलयधिप परिमत्ताारिपटली–
गलोत्क्रात्तिः कर्त्रीं(?) रुधिरगण...क्ती तव भुजे ।
जगद्माथाकामीकवलनकणे–तकलना-
रसात्तां कार्तान्तीं परमनुसरीसर्ति रसनाम् ॥

मूर्त्या कातंस्वरसुपमया कार्तिकीचन्द्रबिम्ब-
स्फूर्त्या कीर्त्या सकलजगतामार्तिहारी चिराय ।
तार्तीयीको जयति नितरामास्त्रिकः शात्रवाणां
सार्थे सार्थीकृतनिजभुजापार्थवः पार्थिवोऽयम् ॥

नालं बालमृगीदृशां कुचभराद् व्यावर्तितुं कुत्रचि-
न्नालं वा ललितेषु काव्यसरसालापेष्वनाक्रीडितुम् ।
लोलं मे हृदयं तथापि गगनस्रोतस्विनीसङ्गिना
लोलंबद्युतिलोभनीयवपुषं बालं बतालम्बते ॥

बिम्बितमम्बरधुन्यां धन्यानामास्ति (को?गो)पकन्यानाम् ।
यमुनातटेषु भाग्यं भोग्यं योग्यञ्च मादृशां दृष्टम् ॥

आरादात्मयशोम्बराघृततनुं प्रत्यर्थिपृथ्वीवधूं
गत्वा तत्र कराग्रहं रचयति श्रीदेवनारायणे ।
आज्यासङ्गविवर्धितोऽस्य पुरतस्तावत्प्रतापानलो
व्याकीर्णाहितकीर्तिलाजपटलीहोमेन देदीप्यते ॥

संरुद्धे देवनारायण! नृप! भवता नास्तिकानां प्रच(क्रे)
त्वत्सेना हन्त चार्वाकवदयि परलोकोदयं खण्डयन्ति ।
कान्तारे वैरिणस्ते क्षपणकजनवत्सप्तभङ्गिं भजन्ते
तेषां राज्ये च हीही सुगतमत इव श्रूयते शून्यवादः ॥

कस्यैवं विदितं कलाविलसितं कोऽन्यो बुधानन्दभूः
को वा विष्णुपदं सदैव भजते तारानुसारी स्वयम् ।
तस्मादत्र भवन्तमेव भुवने राजानमीक्षामहे
स त्वं कैरवमाननीयमहिमा हे देवनारायण! ॥

नित्यं मायाविलासांस्त्यजसि च भजसे किञ्च निर्वाणमत्र
प्रायप्रायं तथापि प्रचुरभुजमहो नैव निर्वाणमासीत् ।
शौर्यासङ्ग! प्रभो! ते विलसति बहिरन्तश्च हन्त प्रकामं
विश्वाश्चर्यप्रभावो जगति विजयसे देवनारायण! त्वम् ॥

हे नारायण देवपूर्व! धरणीचक्रं च शक्रालयं
द्वौ लोकौ परमाणुभिः कृतवता भूयोऽपि किं वेधसा ।
सृष्टं शिष्टमिदं नभस्तलमपि त्वत्सैन्यविक्षोभण-
क्षुण्णक्षोणिसरत्परागपरमाणूनां च येनाधुना ॥

---

## ॥ शृङ्गारमञ्जरी ॥

## No. 1339. ŚṚṄGĀRAMAÑJARĪ.

C. O. L. No. 125.

Substance—Paper. Size—11¼″ × 8¾″. Pages—50.
20 lines per page and 16 letters per line.
Script — Malayāḷam. No. of Granthas—500.

Owner—C. O.

Subject—A *Bhāṇa*.

Beginning :

लक्ष्मीं पक्ष्मलयन्तु वः सुरवधूसीमन्तमुक्तामणी-
संयोगद्विगुणीकृतांघ्रिनखरश्रेणीमयूखांकुराः
कुर्वाणाश्चरणानतस्य धिपणाध्येयं वचो नैपुणं
पुण्यानां निकराः समस्तभुवनक्षेमंकराः शाङ्कराः ॥

अपि च

पीयूषद्रवधोरणीमधुरिमाहंकारसर्वंकषा
शीतांशोः कुरुते हरत्यपि रुचां(?) यत्कीर्त्तिमत्तां भृशम् ।
नेत्रासेचनकं मनोभवरिपोर्धैर्यैकपाटच्चरं
कुर्याद्वस्तदहार्यवर्यदुहितुर्मन्दस्मितं मङ्गलम् ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः

सूत्रधारः—

आरूढो मलयानिलं रथममात्यैन्द्रैर्वसन्तादिभि-
भृत्यैर्भृङ्गकुलैर्युतः स्तुतगुणो वैतालिकैः कोकिलैः ।
नक्षत्रेशसितातपत्रसुभगो दुर्वारवीर्योद्भट-
स्त्रैलोक्यैकमहारथः स्मरमहाराजो विजेजीयते ॥

अपि च

पुञ्जीभवन्निखिलकामुकधैर्यसार-
सर्वस्वसंभरितकुंभरुचिं दधाना ।
जीयात् तृतीयपुरुषार्थसमर्थनैक-
सामर्थ्यधुर्यतरुणीकुचमण्डली सा ॥

अलमतिप्रसङ्गेन ! श्रुतमस्माभिरिदानीमत्र किल भुवनेश्वर्या यात्राया-मुपगताः केचन सर्वशास्त्रेष्वधीतिनस्सामाजिका इति । तदात्मविद्या-प्रदर्शनेनैषां परितोषस्य विषयीभवामेति (परिक्रम्याग्रतो विलोक्य स-हर्षं) अये इहैवैषा परिषदेषां निश्शेषगुणदोषवेदयानां विदुषां सर-सकाव्यनाटकादिव्यवहारजागरूका राराज्यते । अहो रमणीयास्या-वदादता(?)तथाहि

... ... ... ... ... ...

.... .... .... ... ....

अथ तत्रभवन्तः शृण्वन्तु विज्ञापनामिमां मदीयां दयया । अद्य खलु वसुमतीमण्डलमण्डनायितकेरलखण्डनायकायितवञ्चिवसुधा-खण्डलो रामवर्मकुलशेखरकिरीटपतिर्महाराजो विराराजी-ति । अयं हि—

कारुण्याब्धिर्विबुधविटपीदुर्विधानां गभीरः
स्त्रीणां कामः सकलविदुषां माननीयो मनीषी ।
साम्राज्यश्रीनियतवसतिर्मेदिनीपालमौलि-
र्भूयोधर्मप्रकरकलनालालसी लालसीति ॥

तस्य च वञ्चीशवंशकलशांबुराशिशशांकस्य चरणारविन्द-परिचरणपरायणेन निजमातुलस्य विबुधराजराजिशेखरस्य राजराजवर्मणः करुणासारैस्समुल्लसितकविताबालवल्लरिकेण हृदन्तरनिरन्तराधिष्ठितचण्डिकाचरणपुण्डरीकसमाराधनसमुत्सारितसमस्तकल्मषेण केरलवर्मनामकेन केनचन राजन्यसिंहेन ग्रथितं किमपि भाणं श्रीमतामग्रे प्रयोजयितुमिच्छामि ।

End :

अकस्मान्मम प्रवेशे मन्दारकस्य वैरस्यमाशंकैयत्र मया तथा न कृतं किं ब्रवीषि । तत्तु फुल्ललोलमधुव्रत इत्यादि पठता जनितमेव खलु भवतेति । अहो किं मन्यसे मया विवक्षितोऽर्थस्तेनावगत इति । किं ब्रवीषि । कथं मे तादृशः सुप्रकाशोऽर्थो नावगतो भवेदिति .... .... .... .... ....

Colophon :

Author—Keraḷavarmā.

Remarks—The author was a dependent of Rāma Varmā and nephew of Rāja Rāja Varmā. This piece falling under the category of Bhāṇa has

Śṛṅgāra as the ruling sentiment. An imitation of the Mālatīmādhava is patent in the course of the work.

---

## ॥ शृङ्गारशेखरभाणः ॥

No. 1340. ŚṚṄGĀRAŚEKHARABHĀṆA.

C. O. L. No. 811.

Substance—Paper. Size—$10\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—22. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—325. Incomplete.

Owner—C. O.

Subject—A *Bhāṇa*.

Beginning :

यमालोक्य स्वस्मिन्मणिमुकुरभासि स्तनतटे
स्फुरद्वक्राकारं कररुहपदाशङ्किहृदया ।
सलज्जा हस्ताभ्यां स्थगयति नवोढा मुहुरुमा
स बालेन्दुः कान्ति हरमुकुटवासी हरतु वः ॥

अपि च

पिबति निबिडं कान्ते बिम्बाधरं रतिलोलुपो
स्फुरितकपटक्रोधं भ्रूवल्लिनर्तनलीलया ।

मसृणमुकुलापाङ्गं मामेति वादमनोहरं
मुखमवतु मुग्धाक्षीणाममङ्गुरमीरकृतम् ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

परिक्रम्यावलोक्य—

.... .... .... ....

कस्तावत्प्रबन्धः, अस्ति काश्यपगोत्रतिलकभूतः कश्चिद-भिनवकालिदासो नाम कविः।

यस्या(नम?मन)न्ति कुलदैवतमिन्दुमौलि-
मेकाम्रमूलनिलयं पतिमम्बिकायाः ।
यस्यागजं च कविताकृतपट्टबन्धं
साहित्यभूषणमसोढमदं कवीनाम् ॥

तस्य शृङ्गारशेखरं नाम भाणं प्रयोगतो दर्शयन्नार्यमिश्रान् उपस्थास्ये सप्रश्रयम् ।

End :

सलिलकणितगात्रीं (प्रस्थ?स्रस्त)काञ्चीकलापां
सरसमृदुपटान्तर्दृश्यमानोरुमूलाम् ।
अनिभृतदृशमाराद्वीक्ष्य पर्यस्तकेशी-
मजनि मदनहस्ते वर्तमाने मनो मे(?)॥

इति । कस्येदृशं रूपमालोक्य नोत्कण्ठते चेतः । किमात्थ । सा तु ततस्सरितः स्नाता स्नाताभिस्सखीभिर्गन्तुमुपचक्रमे । मया मन्दं मन्दं तदसारः कृतः । मध्येमार्गं श्रीम

Colophon :

Author—Abhinavakāḷidāsa.

Remarks—The closing portion is missing.

---

## ॥ शृङ्गारसुधाकरभाणः ॥

No. 1341. ŚṚṄGĀRASUDHĀKARABHĀṆA.

C. O. L. No. 742.

Substance—Paper. Size—$10\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages — 35. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—425. Complete.

Owner—C. O.

Subject—A *Bhāṇa*.

Beginning etc.—Same as No. 1594, DCSMMPL.

Author—Ravivarmā.

Remarks :

---

## ॥ संवरणध्वनिः ॥

No. 1342. SAMVARAṆADHVANI.

. O. L. No. 281.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages—186,

20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—2300.

Owner—C. O.

Subject—The theory of Dhvani as dealt with in the Tapatīsamvaraṇa.

Beginning :

अथाहं केरलभूभृत्कृतेऽस्मिन् नाटके स्थायिभावं प्रयोगमार्गं च तत्सहृदयः प्रदर्शयामि । कथमिति चेत्

भूभृत् स्वयं भूमिकया निरेत्य
निजामलङ्कृत्य तनुं मनस्वी ।
यं दर्शयित्वेति विनिश्चितात्मा
प्रयोगमार्गं रहसि .... मीमाम् ॥

तेन मया महीसुरेणापि तत्सहृदयेन पिष्टपेषणं क्रियते । तथापि, महाकवेरभिप्रायं ज्ञातुमेतत् कृतं मया ।

तत्प्रदर्शितमार्गेण विच्छिन्नस्योपदेष्टरि ॥
नाटकनायकलक्षणं सर्वं दशरूपके द्रष्टव्यम् ।

End :

अथ नायिका सखीभिः सार्धं तदलङ्करणाय निष्क्रान्ता भवेद् । एवं तृतीयाङ्कपर्यन्तस्थायिभावप्रयोगमार्गौ दर्शितौ । अतः परं ध्वनिर्न स्यात् । षष्ठाङ्के नायकस्य मेनकारूपधारिण्या नायिकाया दर्शने किमपि ध्वनिर्दृश्यते ॥

Colophon :

इति निष्क्रान्ताः सर्वे तृतीयोऽङ्कः ।

Author :

Remarks :

---

## ॥ संवरणध्वनिः ॥

No. 1343 A. SAMVARAṆADHVANI.

C. O. L. No. 2434 A.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—60. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1800. Incomplete.

Owner—Nīlakaṇṭha Vārier Avl., Pantaḷam.

Subject etc.—Same as No. 1342.

End :

तावदपयवनिको भूत्वा यथानिर्दिष्टं मुहूर्तं तिष्ठेत् । एवं तिष्ठ.... सान्तर्विवेकमुद्दृष्टिरेवं विमृशेत । कुतः हन्तास्मद्गुरुविनियोगविक-लता फलिता । अहो इत्यत्र विवेके कुतः मन्त्रस्मृत्या पूतचेतसि तस्मिन् सावधानमाग्निसन्निधौ स्थि ... ... .... ॥

Colophon :

निष्क्रान्तः । द्वितीयोऽङ्कः । एवं द्वितीयाङ्कस्थायिभावप्रयोगमार्गावेवं दर्शितौ ॥

Author :

Remarks :

---

## ॥ रामायणभाषाचम्पूः ॥

No. 1343 B. RĀMĀYAṆABHĀṢĀCAMPŪ.

C. O. L. No. 2434 B.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—7. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—215.

Owner—Same as No. 1343 A.

Subject—A Malayāḷam Campū on the Rāmāyaṇa.

Beginning :

* * * * * *

* * ശ്രീഹനൂമാൻ * * മുറച്ചുശ_ിന്നൌ
വാനരേന്ദ്രൌ
പിന്നെ കേൾ ഹന്ത മൈന്ദൻ വിവിദനളഗവാ-
ക്ഷാദയോ മദ്ധ്യഭാഗേ
മദ്ധ്യേ ശ്രീരാമചന്ദ്രൻ പുനരരികിലെടോ
ലക്ഷ്മണൻ വില്ലുമമ്പും

ബധാദഭോഗം പിടിച്ചക്കരതളിരിലനം-

ഗോപമാനൌ യുവാനൌ

നിത്യം നിത്യം ... ... ടവ്യൂഹമിതതിദൃഢമസ്മാദൃശാ-

മെൻറിവണ്ണം

ബുധ്യാ സത്വം വിചാര്യ്യ സ്ഥുടമധിപതി

ശാഖാമൃഗാണാം തദാനീം

കല്പാന്തക്ഷുബ്ധസിന്ധുപ്രതിഭടമരികേ

രക്ഷസാം ചക്രവത്തീ.

മുത്പാടാകർണ്ണ്യ ഘോഷം കിമിദമിതി കരേറീടിനാൻ

മാളികാഗ്രേ

അപ്പോൾ കാണായിതുച്ചൈരിരുപത്തു നയനംകൊണ്ടു-

മൊക്കെത്തിരക്കി-

ക്കെൽപോടേ വന്നുപായും കപിവരകപിലീ-

ഭൂതമാശാകദംബം.

End :

ഏതെങ്ങൾക്കിന്നിനല്ലു തിപുവനശിഖിനേ ചെൻറു

രാമായ നത്വാ

സീതാം നൾകീട്ടുകെൻേറാ രണശിരസി ഹതോ

വാനിൽ വാണീട്ടുകെൻേറാ

നീതിജ്ഞെ നിന്മതം ചൊല്ലുക മമ ദയിതേ

നാടശേഷം മുടിഞ്ഞു

ചോദിക്കേണ്ടാ മദീയം പടയുമവസിതം ഞാനൊഴി-

ഞ്ഞുള്ളതെല്ലാം

കണ്ടേൻ വൈരൂപ്യമുദ്രാകരണമഭിനവം

മദ്ഭഗിന്യാ നിതാന്തം

കൊണ്ടേൻ ഗണ്ഡേഷു ഞാൻ താഡനമതു ഹനുമത്

കൈത്തലംകൊണ്ടു താനും

വണ്ടാർ പൂവേണി കേട്ടേൻ സമിതി സകരുണാം

പിന്നെ രാമസ്യ വാണീ

മുണ്ടായ്‌വന്നു സുഖ ..., ..., ..., ...,

Colophon :

Author—Punam Namputiri.

Remarks—This Ms. contains only a portion of the Yuddhakāṇḍa. The complete work has been published in three volumes as Nos. 15, 19 and 20 in SMMS.

---

## ॥ निरनुनासिकम् ॥

### No. 1343 C. NIRANUNĀSIKAM.

C. O. L. No. 2434 C.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—2. 11 lines per page and 52—56 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1343 A.

Subject—The portion of the Rāmāyaṇa relating to Śūrpaṇakha's complaints to Khara on the mutilation of her nose and ears.

Beginning :

हरिः ।

आक्रन्दकम्पितसभं परितःप्रसर्प-
द्रक्तानतिस्फुटविकृत्तकरालगात्री ।
संभ्रान्तयातुगणमध्यगमग्रजं सा
नासाक्षयान्निरनुनासिकमेवमूचे ॥

हा हा राक्षसराज दुष्परिभवग्रस्तस्य धिक् ते भुजाः
विद्युज्जिह्वविपत्तिरेव सुकरा क्षुद्रप्रताप त्वया ।
ध्वस्तापत्रप पश्य पश्य सकलैश्चक्षुर्भिरेतादृशी
जाता कस्यचिदेव तापसशिशोः शस्त्रात्तवैव स्वसा ॥

End :

... ... ... ....

... ... .... ....

ललितबालाभिख्यापि उपारूढयुवतिभावा चक्षुःफलपरिपक्ति-रिव....सिद्धविद्येव पुष्पसायकस्य अधिदेवतेवाद्यरसस्य दृष्टिगोन-रगतेव तृतीयपुरु.......प्राज्यतरप्राच्यसुकृतपरिपाकसुलभा सीतेति कापि कातराक्षी वीक्षिता ।

Colophon :

अनुनासिकरहितानि व्यतनोदेतानि गद्यपद्यानि ।
नारायणाभिधानो द्विजपोतो रविनटेश्वरादेशात् ॥

Author—Nārāyaṇabhaṭṭapāda, the author of the Prakriyāsarvasva, Nārāyaṇīya etc.

Remarks—Since the noseless Śūrpaṇakha was unable to pronounce nasals the whole work is composed without introducing a single nasal.

---

॥ सङ्कल्पसूर्योदयः ॥

No. 1344. SAṄKALPASŪRYODAYA.

C. O. L. No. 87.

Substance—Paper. Size—11¼″ x 8½″. Pages—110. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Owner—C. O.

Subject—Exposition of the doctrines of Vedānta by means of a dramatic composition.

Beginning—Same as No. 1598, DCSMMPL.

End :

सुप्तप्रबोधनसमुत्सुकया (दि?सु)मत्या
पत्न्या सहाचरितविश्वहितं विवेकम् ।
जेतुं कदा च जगति प्रभवेत्तथापि
स्वामी नियोजयति मोह इव स्वयं नः ।

(प्रकाशं) महाराज त्यजेदेकं कुलस्यार्थे इति नीतिं नातिवर्तेथाः।

इति निष्क्रान्तः ।

सुमतिः—

Colophon :

इति श्रीमत्संकल्पसूर्योदये प्रतिमतभङ्गोनाम द्वितीयोऽङ्कः ।

Author—Veṅkiṭanātha. He was a contemporary of Vidyāraṇya (14th Century A. D.)

Remarks—This Ms. extends to a portion of the 3rd Act. The work has been printed and consists of 5 Acts.

---

## ॥ सङ्कल्पसूर्योदयः ॥

### No. 1345. SAṄKALPASŪRYODAYA.

C. O. L. No. 512.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—99 8 lines per page and 24 letters per line. Script—Grantha. No. of Granthas—1200. Incomplete.

Owner—Paṇḍit E. V. Rāman Nampūtiri Avl., Āyāmkuḍi.

Subject—Same as No. 1344.

Beginning etc.—Same as No. 1598, DCSMMPL.

End :

अशेषसुरनारीणामाभिरूप्यसमुच्चयैः
अजहद्यौवनां तीष्णाः(?) विदधे त्वां विधिः स्वयम् ॥

तदिदं दर्शयामि ।

कनककलधौतशैलप्रभृतिभिरपि हन्त पूरणे क्षिप्तैः ।
तृष्णे भजति समृद्धिं भूयोभूयस्तवोदरे कार्श्यम् ॥

तृष्णा—अय्यउत्त तुह्म व(ल?ह्ल)हाए महरमणिज्जत्ताणि सव्वरमणीअं समआहिअंत्ति अच्चरिअं

Colophon :

इति श्रीमत्संकल्पसूर्योदये तृतीयोऽङ्कः ।

Author—Veṅkaṭanātha.

Remarks—This Ms. contains only four Acts.

---

## ॥ सुभद्राधनञ्जयम् ॥

### No. 1346. SUBHADRĀDHANAÑJAYAM.

C. O. L. No. 2428.

Substance—Palm leaf. Size—10″ × 1¼″. Leaves—58. 6—7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Owner—Kṛṣṇan Keśavan Avl., Ñārakkal, Quilon.

Subject—Description of the marriage of Arjuna and Subhadrā.

Author—Kulaśekharavarmabhūpa.

Remarks—The leaves are much damaged. The Ms. is published with commentary as No. 13 in TSS.

---

## ॥ सुभद्राधनञ्जयम् ॥

No. 1347 A. SUBHADRĀDHANAÑJAYAM.

C. O. L. No. 2190 A.

Substance—Palm leaf. Size—9″ × 1¼″. Leaves—71. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—745.

Owner—Kaṇḍan Govindan Vārrier, Kuṭṭenperūr, Mānnār.

Subject—Same as No. 1346.

Author—Kulaśekharavarmabhūpa.

Remarks—The Ms. consists of four Acts only. The leaves are damaged.

---

## ॥ नागानन्दः ॥

### No. 1347 B. NĀGĀNANDA.

C. O. L. No. 2190 B.

Substance—Palm leaf. Size—9″ × 1¼″. Leaves—77. 6 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—900.

Owner—Same as No. 1347 A.

Subject—The story of Jīmūtavāhana.

Author—Śrī Harṣa.

Remarks—The work has been published as No. 59 in TSS.

---

## ॥ भिक्षाटनम् ॥

### No. 1347 C. BHIKṢĀṬANAM.

C. O. L. No. 2190 C.

Substance—Palm leaf. Size—9″ × 1¼″. Leaves—48. 5—7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 500.

Owner—Same as No. 1347 A.

Subject—Description of Śiva in mendicancy.

Beginning :

हरिः श्रीगणपतये नमः। अविघ्नमस्तु।

कल्याणमावहतु वश्शिवयोश्शरीर-
मेकं यदीयमसितच्छविकण्ठमूलम् ।
वामेतरेऽपि कुरुते सितभासि भागे
प्रारब्धशैलतनयापरिणामशङ्काम् ॥

नित्यं करोतु भगवान् स करीन्द्रवक्त्रः
प्रारभ्यमाणशुभकर्मविघातलोपम् ।
दोषानुषङ्गरहितस्स शिवोऽपि यस्य
भृङ्गेषु गण्डतलचुम्बिषु साभ्यसूयः ॥

कार्श्यं क्षिणोतु भवतां परमेश्वरस्य
भिक्षाटनं तदनुसंहितदेहिशब्दम् ।
यन्मानिनामपि विधेर्विपरीतभावे
याच्ञोक्तिदैन्यसहमेव मनश्चकार ॥

सद्यस्तुषारगिरिजौषधसेवयैव
यस्सोपयुक्तगरलं शमयाञ्चकार ।
अन्यैरशक्यशमनाज्जननामयाद्वः
पायादपायनिलयादयमादिवैद्यः ॥

वाल्मीकिरस्तु विजयी प्रथमः कवीनां
तस्यानुसारसरलस्स हि कालिदासः ।
अन्ये भवन्तु जयिनः कवयोऽथ मा वा
येषां कृतः कृतिषु नैव मयावगाहः ॥

... ... .... ....

वृत्तं वसन्ततिलकं विपयशिवस्य
भिक्षाटनं कविरसौ शिवभक्तदासः
शृङ्गार(प्र?ए)व हि रसस्तदिह प्रबन्धे
न...कस्य...यदि सूक्तिविनोदशीलः ॥

एपा परत्र विपये विपमेक्षणे मे
तस्मिन् समापततु हीनगुणापि वाणी ।
यां मूर्ध्नि मुग्धहृदयो जनगर्हणीयां
धत्ते सुधांशुकलयैव सहास्थिमालाम् ॥

आकर्णयन्तु मम सूक्तिविदः प्रबन्धं
तैर्निन्द्यतां पुनरयं खलु नन्द्यतां वा ।
तत्कर्णगोचरतयैव (भवे)द् गरीया-
नस्माकमद्य सफलो रसनाप्रयासः ।

End :

तावत् प्रतिग्रह(ण?)मिपेण मृगेक्षणाना-
मादाय मानमपयायिनि लोकनाथे ।
रथ्यासु दुस्सहनवोल्कलिकाकुलानां
तासां चरित्रमहमद्य विजृम्भयामि ॥

हारः क्वचित् क्वचिदलक्तरसः क्वचिच्च
धम्मिल्लपुष्पनिवहः क्वचिदुत्तरीयम् ।

क्वाप्यप्रमुग्रवलयानि मृगेक्षणानां
रथ्यां हरेण कृतचंक्रमणं विवव्रुः ॥

काचित् पुरारिपदलाञ्छनभूषिताया
वीथ्या विमोक्षविमुखी पुरतस्सखीनाम् ।
भूमौ विकीर्य पुरतो निजहारमुक्ता-
स्तासां क्रमग्रहणसम्भ्रममाचचार ॥

क्षोणीतले स्वविनिपातितहारमुक्ता
स्वीकर्तुमाद्दतवती न विषण्णमू...

... ... ...

... ... ...

Colophon :

इत्युत्प्रेक्षावल्लभस्य कृतौ भिक्षाटने काव्यमुखपद्धतिः ।
इति शिक्षापद्धतिः ।

Author—Utpreksāvallabha.

Remarks—The whole work is composed in Vasantatilaka metre. It is divided into several sections, Kāvyamukhapaddhati, Maṇḍanapaddhati etc. Many leaves are left blank. A portion of the Nāgānanda is copied in the following leaves.

## ॥ सुबालावज्रतुण्डम् ॥

## No. 1348. SUBĀLĀVAJRATUṆḌAM.

C. O. L. No. 817.

Substance—Paper. Size--11″ x 8¾″. Pages—21. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—210.

Owner—C. O.

Subject—A drama wherein Vajratuṇḍa and Subāla are the hero and the heroine.

Beginning :

चन्द्रचूडं परं धाम चन्द्रिकाविमलच्छवि ।
स्पन्दतां हृदि सन्तापसन्तानशमनाय वः ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः) ।

सूत्रधारः—

श्रीकण्ठस्य ललाटलोचनपुटादुद्वान्तसप्तार्चिषा
साकं पुष्पशरैः सहेक्षुधनुषा दग्धे मनोजन्मनि ।
या स्वोन्मुक्तकटाक्षसायकवरेणादत्त देहार्धकं
पत्युः सा तुहिनाचलप्रियसुता भूयात्प्रमोदाय वः ॥

प्रणयकुपितां देवीं नत्वोत्थितः परिसान्त्वयन्
मुखमुपगतज्योत्स्नान्तःस्मेरमित्युपगूहयन् ।

नयनहुतभुक्च्छायारक्तेक्षणां परमेश्वरो
भयचकितधीर्दृष्ट्वा भूयो नमन्नवतात्स वः ॥

... ... ... ...

... ... ... ...

सूत्र—आदिष्टोऽस्मि सकलविस्मयनीयविद्यादयागुणभाजनेन सभाजनेन । यथा—कविना श्रीरामनाम्ना नृपभुवा रचितं सुबालावज्रतुण्डं नाम नाटकं भवताभिनयचतुष्टयेन प्रवृद्धरसं प्रयोक्तव्यमिति तदावां सन्नह्याव: ॥

End :

वज्र—

अभिमतदयितापि जीविता
मम भगवन् भवतः प्रसादतः
युधि रिपुरपि निर्जितो बली
प्रियतरमन्यदतो न विद्महे ॥

तथाप्येतावदस्तु भरतवाक्यम् ।

इष्टं भूयाज्जनानामभिमतकलनाशालिनीं भूतधात्रीं
कृत्स्नां कुर्वन्तु कल्पावधि सलिलधराः कालवृष्ट्या नितान्तम् ।
एवं युष्मत्प्रसादाद्दिनमनुभवता ज्ञयसे(?) मामकीना
भक्तिर्विश्वेशपादाम्बुजयुगलगताप्यस्तु जन्मान्तरेऽपि ॥

Colophon :

(निष्क्रान्ताः सर्वे)
पञ्चमोऽङ्कः ।

Author—Śrīrāma.

Remarks—The work comprises five Acts. The introductory portion bears out that the author was a member of a royal family.

---

## ॥ चम्पूः आख्यायिका च ॥

### ॥ अवन्तिसुन्दरी ॥

No. 1349. AVANTISUNDARĪ.

C. O. L. No. 704.

Substance—Paper. Size—$11\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—380. 20 lines per page and 17 letters per line. Script—Devanāgarī. No. of Granthas—4450.

Owner—C. O.

Subject—The story of Avantisundarī.

Beginning :

श्रीः अवन्तिसुन्दरी ।

.... .... .... .... ....

न्वितेन दुग्धजलधिनेव कैलासशिखरमालाविडम्बिना प्राकारव-
लयेन सर्वैश्वर्यग्रहग्रामं गगनाभोगमि .... .... ....

तु...गोपुरद्वारैरुपेता गोपुरगुरुफलामण्डलस्फुरन्मणिस्तबकरागरञ्जितवियद्विशालार्णवै(र्वै)हुगुण.... ....वाहिभि .... ....
.... घटितैः भुजगराजैरिव भोगवतीमहापथैरुपशोभिता मणिमयसमग्रभूतलत्वादपरवियद्वितर्का...णैर्दिव्यविमानैरिव ... ...
प्रासादैरितरैश्च महापुरुषोचितैर्महापुरुषैरिव लक्षणोपपन्नपादजानुबाहुग्रीवाकनासिकाललाटाशिरोभिर्दृढप्रकोष्ठस्क .... कुराक्षैश्चतुरवृत्तजातिभिरत्युदारैरुग्रशक्तिभिः कृतवेदिभिरग्राम्यालङ्कारैरलङ्कृता

... ... ... ...

विततासितभवनसालमालापक्षराजिनरिराजहंसीविलम्बिविक्रमललितनितम्बिनीकदम्बकनितम्बविम्बप्रलम्बितमञ्जुशिञ्जानकाञ्चीदामा काञ्चीपुरं नाम राजधानी ।

End :

यथाह कादम्बर्या सकलमवकस्या...रमुग्धमृगीकुलमिव त्रासोद्भ्रान्तदृष्टि ... त्तमेव गिरिवनतटमभ्यधावदाक्रोशन्तरुदितविश्रमे वैनां चैत्ररथी सशपथैः साञ्जलिभिः अनुनयवचनसाहस्रैरात्मत्यागहेतुं शशाक संशयितुमेवं चाब्रवीत् ।

Colophon :

इत्याचार्यदण्डिना कृता अवन्तिसुन्दरी समाप्ता ।

Author—Daṇḍi.

Remarks—Most of the leaves are badly arranged.

---

## ॥ आर्द्रामहोत्सवचम्पूः ॥

No. 1350. ĀRDRĀMAHOTSAVACAMPŪ.

C. O. L. No. 29.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages — 20. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Owner—C. O.

Subject—A description of the Ārdrā festival celebrated at Pandaḷam.

Beginning:

पायाद्दिव्यस्रवन्तीकुचयुगलपरिष्वङ्गसक्तारुणाभं
निह्नोतुं नूनमङ्गे घुसृणमनुदिनं लिप्यते येन भस्म ।
गौरी (न?नि) ध्यानभीतेर्नतजननिवहे दत्तदृष्टिः प्रमोदात्
सोऽयं श्रीपन्तळेशो हतगदनिवहो नश्चिदानन्दरूपः ॥

गङ्गाताम्राधरास्वादनजनितसुधामज्जनोन्मज्जनानां
चिन्तातो मुह्यमाने गिरिवरजनुषा साधुपृष्टे किमेतत् ।
मुग्धे व्योमापगे ते निधुवनजरसान् संविचिन्त्याशु मोहं
प्राप्नोमि...ति वक्ता पुनरवतु तया भर्त्सितो वः कपाली ॥

... ... ... ...

गद्योन्मेळितपद्यसूक्तिरचनारूपां सुधां मत्कृता-
मार्द्रा (चांबाभिधाना?चम्प्वभिधा)न्निपीय विबुधास्तृप्यन्तु पूर्णास्तथा ।
श्रीमच्छारदपूर्णचन्द्रमधुरज्योत्स्नां निपीयादरा-
ल्लीलामत्तचकोरपक्षिनिवहास्तृप्तिं भजन्ते यथा ॥

End :

छायासु पान्थनिवहाश्च नितल्य वस्त्रं
मार्गश्रमेण शयिताः परितापभारम् ।
आमीय हस्तकलितव्यजनोत्थितेन ?
वातेन घर्मसलिलं सलिलं च शान्तिम् ॥

किञ्च,

मुग्धः पचेळिमफलैर्निविडैर्दळैश्च
व्यप्तात्मनां निविडचूतमहीरुहाणाम् ।
शाखासु तत्फलचयानपि भक्षयन्तः
क्रन्दन्ति काकनिवहाः सुखसन्निपण्णाः ॥

... ... ... ...

Colophon :

Author — Vīrakeraḷavarma Rāja of Pandaḷam Palace, disciple of Pakṣittampān.

Remarks—The author was a great logician. He is credited with the authorship of Rugmāṅgadacarita, Rukmiṇīsvayamvara, Viṣuprabandha etc. He flourished in the 19th century A. D.

---

## ॥ उत्तरचम्पूः ॥

## No. 1351. UTTARACAMPŪ.

C. O. L. No. 360.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—43.

20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—425. Incomplete.

Owner—C. O.

Subject—A compendium of the Uttara Rāmāyaṇa.

Beginning :

विष्फूर्जद्रत्नजातद्युतिनिकरलसन्मण्डपोच्चण्डशोभा
द्वारि द्वारि प्रतिष्ठापितनवकदलीपूर्णकुम्भध्वजाढ्या ।
रम्या रामोत्सव समनुगुणा .... .... निर्मिता तत्र शाला ॥ (?)

पुण्यात्मा स महीपतिर्गुरुगिरा वर्णाश्रमाणां गुरुः
क्लृप्ताकल्पमथाधिरुह्य रुचिरं शत्रुञ्जयं वारणम् ।
वाद्यानां निनदैस्तथा नुतिपदैरुच्चावचैर्वन्दिनां
साघोपं समुपाजगाम सरयूं स्नानाय सेनायुतः ॥

ततश्च सकलमङ्गल्यमये समुल्लसितसरोजपरागसुरभिले मदकलकलहंसकूजितमनोहरसुगन्धिविलेपनः मणिकुण्डलमौक्तिकगुणप्रमुखविभूषणगणोपशोभिता —सकलजनहृदयानन्दनो दशरथनन्दनोरुत्तमब्रह्मवर्चसधरैः (?) कलशपूरणप्रवृत्तैः कुलशीलवृत्तैः कलशोद्भवप्रधानैः मुनिजनैश्च परिपूरिते शोभां सभामुपेत्य अकथितानि आदरोपबृंहितानि सुवर्णमणिदुकूलादीन्यर्हद्भ्यः सभासद्भ्यो बहुतरं वितीर्य मङ्गलालङ्कारमण्डितस्य मण्डपस्य मध्ये निवेशितं सुवर्णमणिपण्डमण्डितं सिंहासनमुपेत्य कुशेशयसुन्दरेण करेण परामृशन् परिपूरितमनोरथं मनसाभिवन्द्य पुरुहूतवन्द्यान् पुरोहितप्रधानान् अम्बरमणिरिवाभ्युद(य?यो)दयाद्रिमेनमध्यासाञ्चक्रे ।

End :

इति निशम्य समुन्मिषत्त्रपाभारदूरावनतमौलिश्चिरदृष्टनिजदयितावलोकनजनितकलङ्काङ्कुरापि तत्कृतनिजपरित्यागचिन्तनानिरन्तरनिरीयमाणबाष्पप्रसरा पुनरपि दहनपतनदशानिशमनसमनुपतदुष्णनिःश्वासा जनकराजपुत्री सद्य एव चित्ते विनिश्चित्य समस्तमपि कृत्यं तपस्विनी निरस्तभोगरागा वाल्मीकिशिष्यैरुपहृतं पयः पवित्रमाचम्य उदङ्मुखी वसुन्धरायामेव निषसाद । निजगाद च बद्धाञ्जलिरिद्धानुतापं निजजननीमवनीम् ।

त्वया प्रसूता वसुधे किलाहं त्वमेव मातः शरणं ममाद्य ।
अभिप्लुतां दुःखपयोधिमध्ये समुद्धरैनां तनयामनाथाम् ॥

मनोवचःकर्मभिरार्यपुत्रे
न मे कदाचिद्व्यभिचारलेशः ।
यथा तथा साक्षिणि कर्मणां त्वं
विश्वम्भरे! देहि ममावकाशम् ॥

इत्थं वदन्त्यां जनकात्मजाया-
मदृश्यताग्रे स्वयमेव धात्री ।
भुजङ्गमाधीशफणा(धृ? दृ)तायां
निषेदुषी काञ्चनपीठिकायाम् ॥

Author :

Remarks :

## ॥ उत्तरचम्पूः ॥

## No. 1352. UTTARACAMPŪ.

C. O. L. No. 2025.

Substance—Palm leaf. Size—16″ × 1¼″. Leaves—29. 8 lines per page and 50 letters per line. Script — Grantha. No. of Granthas — 750. Complete.

Owner—Yajñeśvaradīkṣitar Śaṅkara Śāstrī Avl., Āyikkuḍi.

Subject—The story of Śrī Rāma.

Beginning:

अव्यादव्याजभक्तिप्रचयपरिचयस्फीतविज्ञानसंम्पत्
सम्पन्नानन्दसान्द्रामृतशिशिररसस्वान्त.......
.... .... ...पि भरतवत् सार्वभौमप्रशस्तिं
प्राप्यापश्यद्घृणां परिवृढमपि यः सोऽयमस्मद्गुरुर्नः ॥

... ... .... ....मतुलं मम लब्धम्
कर्णयोर्यदधिकाशि मुमूर्षोः सादरं दिशति चन्द्रवतंसः ।

End:

वैदेहीमुपलालयन् निजगुणैर्वीरासनाध्यासित-
स्सोदर्यैस्स निषेवितो विजयते साम्राज्यलक्ष्मीसखः ।
वाधूलान्वयवार्धिशीतकिरणाद्विद्वद्गुणाग्रेसरा-
न्मान्या.... ....वेङ्कटाद्रिविदुषो गङ्गा....गुणैः ॥

Colophon :

गुणैः संजातेन वि(द्)भेलक्ष्मणकृते चम्पूप्रबन्धे कृतः ।

काण्डो वेङ्कट......जीयाच्चिरं सप्तमः ॥

शुभमस्तु ।

Author—Veṅkaṭakṛṣṇadhīrakavi.

Remarks—Most of the leaves are worn out.

---

॥ उत्तरचम्पूः ॥

No. 1353. UTTARACAMPŪ.

C. O. L. No. 2481.

Substance — Paper. Size—8″ × 6½″. Pages—68. 21 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas — 700.

Owner—Pūññāttukoyikkal Kārtika Tirunāḷ Tampurāṭṭi, Pūññār.

Subject—Same as No. 1352.

Beginning :

इति रघुपतिः मुनिजनमतिमुदं तं निजमुदन्तं वदन्तं मेघनाद-विजयविस्मितं सस्मितं तदन्वयमन्वयुङ्क्त । अब्रवीच मुनि-रगस्त्यस्तम्—

सुतानिह पितामहः किल मरीचिमत्र्यङ्गिरः-
पुलस्त्यपुलहक्रतूनपि पुरा हृदाजीजनत् ।
अमीषु गुणमौक्तिकाम्बुधिषु पट्सु तुर्यः सुधीः
चचार कनकाचले चिरमनन्यतप्यं तपः ॥

मल्लीवल्लीमतल्लीसुमरसलहरीलभ्यसौरभ्यमाद्यद्-
भृङ्गीसङ्गीतभङ्गीविवशहरिवधूदुग्धमुग्धेभडिम्भाम् ।
हृद्यामुद्यानपद्यामसकृदरचयन्नत्र राजन्यकन्याः
शम्पासम्पातकम्पानुकरणनिपुणस्वाङ्गहारैर्विहारैः ॥

End :

इत्थं सोऽयमुदारधीरनुयुगं भूत्वा रघूणां कुले
शौर्यात्साधितसर्वदिग्विजयतः श्रीमानयोध्यापुरे ।
वैदेहीमुपलालयन् निजगुणैः सिंहासनालंकृतः
सौदर्यैः स निषेवितो विजयते साम्राज्यलक्ष्मीसखः ॥

वाधूलान्वयसिन्धुशीतमहसो विद्वज्जनश्लाघिता-
न्मान्यायामपि वेङ्कटाद्रिविदुषो मङ्गांबिकायां गुणैः ।
संजातेन विदर्भलक्ष्मणकृते चम्पूप्रबन्धे कृतः
काण्डो वेङ्कटकृष्णधीरकविना जीयाच्चिरं सप्तमः ॥

समाप्तोऽयमुत्तरकाण्डः ॥

शुभं भूयात् ।

Colophon :

सीतालक्ष्मणभरतशत्रुघ्नहनूमत्समेतश्रीरामचन्द्रस्वामिने नमः ।

Author—Veṅkaṭakṛṣṇadhīrakavi.

Remarks—A gap is noticeable in the beginning.

---

## ॥ उषापरिणयचम्पूः ॥

No. 1354. UṢĀPARIṆAYACAMPŪ.

C. O. L. No. 1609.

Substance—Palm leaf. Size—4″ × 2″. Leaves—64. 9 lines per page and 12—14 letters per line. Script—Malayāḷam. No. of Granthas—475.

Owner — Valia Tampurān Eravi Vāsudevan Nampūri Avl., Aghoramanakkal.

Subject—Description of the marriage of Uṣā.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

यद्रूपबोधसमये त्रिजगच्चरित्रं
स्वप्नोपभोगसदृशं प्रतिभाति कृत्स्नम् ।
स्पृष्टं न यन्मुनिमनोवचनैः प्रवृत्ते-
रिष्टं ददातु शिवनिर्गुणरूपितं नः ॥

यामाहुर्गिरिजा मुकुन्दसहजा पद्मा शताक्ष्यम्बिका
दुर्गा कासरवाहना भवसुता भीमेति वाचंयमाः ।
भक्तध्यानसमाकृतिं त्रिजगतस्सर्गादिहेतुं परां
वाणीमाश्रितकामकल्पलतिकां तां योगनिद्रां भजे ॥

उमेशं वैदर्भीरमणमपि दाक्षीसुतमुनिं
गुरून् वेदव्यासं शुकमपि च सन्नम्य सरसम् ।
उपायास्साश्चर्यां परिणयकथां श्रोतृसुखदां
ब्रुवे गद्यैः पद्यैस्सहृदयमनोमोदनकृते ॥

End :

प्रविश्य च प्रियासहितप्रद्युम्नसुतप्रत्यागमनश्रवणप्रवृद्धप्रहर्ष-प्रकर्षसंभ्रमविरचितविविधमण्डनसमागतपौरजनोत्फुल्लवदनारवि-न्दनिष्यन्दिजयजयघोषमधुरमकरन्दसन्दोहसहसमापतितविकचवि-लोचनचञ्चळीकसञ्चयसम्पूर्णमार्गवर्तीं द्वारवतीं चिरादर्शनशोक-कर्शितमातृमुखनिखिलगुरुजनपादवन्दनादिनिखिलकृत्यकरणमुदित-हृदये स्वविरहशोकातुरमानसानां मानसानन्ददे चानिरुद्धे सुन्द-रीकुलमन्दाक्षदानदक्षवृन्दारकारिनन्दनीविलोकनमुदितासुरपरमपु-रुषमहिषीषु नारायणोऽपि नारदपराशर्यादिमहर्षिभिः सह सकल-लोकसाक्ष्यपि आशुशुक्षणिसाक्षीकरणपूर्वमेव भूदेवसमुपदिष्टमार्गेण निर्वृत्तसमस्तपवित्रकर्मणा मन्मथात्मजेन मुकुळितकोमलारुणसरो-जशोभम् अतिमनोहररत्नखचिताङ्गुलीयतल्लजोल्लासितं दितिजराज-नन्दिनीकरारविन्दं ग्राहयामास ।

इतः परं मन्मथसंगराय
शराः कराङ्गुल्य इमा उपायाः ।
इतीव मत्वाम्बुजकोमलं त-
त्करं सुहृष्टो जगृहेऽनिरुद्धः ॥

क्षितिभरममुमेवं संहरन् शिष्टदुःखं
सकलमपि दयालुर्द्वारवत्यां मुकुन्दः ।
नृगनरपतिमोक्षव्याजतो वृष्णिवर्या-
नुदितविमलबोधान् सञ्चिकीर्षुर्न्यवात्सीत् ॥

श्री भद्रकाल्यै नमः । श्री गुरुभ्यो नमः । शुभमस्तु ।

Author :

Remarks :

---

## ॥ उषापरिणयचम्पूः ॥

### No. 1355. UṢĀPARIṆAYACAMPŪ.

C. O. L. No. 244.

Substance — Paper. Size—13″ × 8″. Pages—43. 19—20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas — 475.

Owner—C. O.

Subject etc.—Same as No. 1354.

Author :

Remarks :

---

## ॥ उषापरिणयचम्पूः ॥

### No. 1356. UṢĀPARIṆAYACAMPŪ.

C. O. L. No. 1946.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—33. 8 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—475.

Owner—Jayantan Mūttatu Avl., Kumāranallūr.

Subject etc.—Same as No. 1354.

Colophon :

इति उषापरिणयप्रबन्धस्समाप्तः ।

"शुभमस्तु"

കുമാരനല്ലൂർ ഭഗവതി ശരണം. വട്ടപ്പുള്ളിലെ ഗ്രന്ഥം.

Author :

Remarks :

---

॥ कादम्बरी ॥

No. 1357 A. KĀDAMBARĪ.

C. O. L. No. 374 A.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 2''$. Leaves—130. 7—8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—2200.

Owner—Citran Nambūri Avl., Vezhapparampu, Parūr.

Subject—The story of Kādambarī.

Beginning:

हरिः । श्रीगणपतये नमः ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

देहद्वयार्धघटनारचितं शरीर-
मेकं ययोरनुपलक्षितसन्धिरेखम् ।
वन्दे सुदुर्घटकथापरिशेपसिद्ध्यै
सृष्टेर्गुरू गिरिसुतापरमेश्वरौ तौ ॥

व्याधूतकेसरसटाविकराळवक्त्रं
हस्ताग्रविस्फुरितशङ्खगदासिचक्रम् ।
आविष्कृतं सपदि येन नृसिंहरूपं
नारायणं तमपि विश्वसृजं नमामि ॥

आर्यं यमर्चति गृहे गृह एव लोकः
पुण्यैः कृतस्य यत एव ममात्मलाभः ।
सृष्टैव येन च कथेयमनन्यशक्या
वागीश्वरं पितरमेव तमानतोऽस्मि ॥

याते दिवं पितरि तद्वचसैव सार्धं
विच्छेदमाप भुवि यस्तु कथाप्रबन्धः ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य
प्रारब्ध एव स मया न कवित्वदर्पात् ॥

गद्ये कृतेऽपि गुरुणा तदनाद्वचांसि
यन्निर्गतानि पितुरेव स मे प्रभावः ।
एकप्लवामृतरसार्पितचन्द्रपाद-
संपर्क एव हि मृगाङ्कमणेर्द्रवाय ॥

गङ्गां प्रविश्य भुवि तन्मयतामुपेत्य
स्फीताः समुद्रमितरा अपि वीक्ष्य यान्ति ।
आसिन्धुगामिनि पितुर्वचसां प्रवाहे
क्षिप्ता कथानुघटनाय मयापि वाणी ॥

कादम्बरीरसभरेण समस्त एव
मत्तो न किंचिदपि चेतयते जनोऽयम् ।
भीतोऽस्मि येन रसवर्णविवर्जितेन
तच्छेषमात्मवचसाप्यनुसन्दधानः ॥

बीजानि गर्भितफलानि विकासभाञ्जि
वप्तुः प्रयान्ति निजकर्मफलात्कृतानि ।
उत्कृष्टभूमिनिहितानि च यान्ति पुष्टिं
तस्यैव तानि तनयेन तु संभृतानि ॥

End :

आगत्य च सकलमनुभूतक्लेशं राजलोकमात्मसमं कृत्वा समारोपितसर्वभरः पुण्डरीके परित्यक्तसर्वकार्यः पित्रोः पादावनु-चरन् कदाचिदत्यद्भुतोत्फुल्लनयननैगमजनावलोकितो जन्मभूमि-स्नेहेनोज्जयिन्यां कदाचिद्गन्धर्वराजगौरवेणानुपरमणीयतामहिम-नि हेमकूटे, कदाचिदमृतपरिमळाधिवाससुरभिशिशिरसर्वप्रदेश-हारिणि रोहिणीबहुमानेन चन्द्रलोके, कदाचिदहर्निशोत्फुल्लसह-स्रपत्रामोदवाहिनि पुण्डरीकप्रीत्या लक्ष्मीनिवाससरसि, काद-म्बरीरुच्या च सर्वत्रैवापरेष्वपि रम्यतरेषु तेषु तेषु स्थानेषु तया सह जन्मद्वयाकांक्षयैवापरिसमाप्तान्यपुनरुक्तानि च तानि (तानि) न केवलं चन्द्रमाः कादम्बर्या सह कादम्बरी महाश्वेतया सह महाश्वेता पुण्डरीकेण सह पुण्डरीकोऽपि चन्द्रमसा सह परस्परावियोगेन सर्व एव सर्वकालं सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्य-गच्छन्निति ।

Colophon :

"समाप्ता चेयमुत्तरकादम्बरी" ।

Author :

Remarks—The Ms. begins on the latter half of the Kādambarī. Fol. 81 contains only two lines. The text is resumed in the next page.

---

## ॥ कादम्बरीपदार्थटिप्पणम् ॥

No. 1357 B. KĀDAMBARĪPADĀRTHAṬIPPAṆAM.

C. O. L. No. 374 B.

Substance—Palm leaf. Size—11½″ × 2″. Leaves—90. 8—9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Owner—Same as No. 1357 A.

Subject—A commentary on the Kādambarī of Bhaṭṭa Bāṇa.

Beginning—Same as No. 1616, DCSMMPL.

End :

इदं न भद्रकं न शोभनं विलपन्तीमश्रौषीत् विलापशब्दयोगाद-श्रौषीदिति प्रयुक्तं अत्यन्तकृपाविधेयभूतेन सहजसत्त्वावष्टम्भेन सहजसत्त्वगुणावलम्बेन असंभाव्या सम्भावितुमनर्हा तया पीडया न किंचिन्न क्रियते सर्वमपि क्रियत एव । विस्फूर्जितमशनिध्वनिः तमस्विनी रात्रिः अधारणं सर्वभूतानां धारणाभावः सम्भाव्यते

सम्भवति आत्मनोऽपि त्वत्तोऽपि संभावयति मन्यते गुणेषु वर्तमानः पुरुष इतरजनेनापि दोषेषु संभाव्यते शङ्क्यत इति यावत्। अतः परं कष्टतरं नहि गुरुजनेनैव दोषेषु संभाव्यत इति यत्तत्कष्टतरमिति किं पुनः किमुच्यते । यः पुमान्गुणैरेवाराधनीयः सर्वेषामाराध्यैर्गुणैरेवाराध्यते तेनानेन आत्मा गुणवानिति अपरस्य कस्य ज्ञापनीयः महाक्रमयः महान्तः पुत्राकारत्वादक्षुद्राः कृमिमात्र

Colophon:

"इति कादम्बरीपूर्वस्य व्याख्या समाप्ता" ।

Author:

Remarks—This commentary is designated Kādambarīpadārthadarpaṇa as evinced by the author's statement "കാദംബരീപദാൎത്ഥനാം ക്രിയതേ ദൎപ്പണം മയാ". The Ms. comprises the commentary on the Pūrvabhāga completely and on a portion of the Uttarabhāga. The former ends on Fol. 72. But the latter according to the printed text begins only on the 74th Fol. The intervenient pages are devoted to the explanation of certain words not found in the Uttarabhāga in conformity with the printed text. The explanation of some verses beginning with "ദേഹബദ്ധായാശ്ശംഭോടനാരചിതം" is omitted. So it is evident that the commentator has followed

some other manuscript of the text. The commentary on the latter part is embodied in 18FF. It extends to Candrapīḍa's meeting with Vaiśampāyana according to the request of Kādambari.

---

## ॥ कादम्बरीकथासारः ॥

No. 1358. KĀDAMBARĪKATHĀSĀRA.

C. O. L. No. 712.

Substance—Paper. Size—11½″ × 9″. Pages—89. 16—20 lines per page and 17 letters per line. Script—Malayāḷam. No. of Granthas—800.

Owner—C. O.

Subject—An abbreviated account of the story of the Kādambarī.

Beginning :

श्रियं दधतु वश्शौरेर्द्वये तुल्यश्रमः क्रमः ।
ये चादौ गोष्पदं पश्चात् त्रैलोक्यं क्रमतस्त्रयम् ॥

सरसास्सदलङ्काराः प्रसादमधुरा गिरः ।
कान्तौ स्तातजयन्तस्य जयन्ति जगतां गुरोः ॥

गुणोद्द्योतनदीपानां सर्वेषां परमुज्ज्वलम् ।
यावन्मालिनमप्येषां .... कर्मप्रसाधनम् ॥

गुणः कृशोऽपि प्रथते पृथुरप्यपचीयते ।
प्राप्य साधुखलौ चन्द्रः पक्षाविव सितासितौ ॥

शक्तिर्नामाभवद्गौडो भारद्वाजकुले द्विजः ।
दार्वादिसारमासाद्य कृतदारपरिग्रहः ॥

End:

कौतूहलात्सह मयैव गतेन्दुलोक-
मालोकयिष्यसि कदाचन पत्रलेखाम् ।
काचित्प्रिये सहचरी मम.........
मावेद्यभूत्तदनवाप्तिकृते विषादः ॥

श्रुत्वेति तस्य गिरमुत्सुकतां गतासौ
रोमाञ्चकञ्चुकमकृत्रिममुद्वहन्ती ।
कादम्बरी चरणयोर्निपपात पत्यु-
रानन्दबाष्पकणशीकरितेक्षणश्रीः ॥

उत्थाय त्वरितोपसृत्य च महाश्वेतां परिष्वज्य च
प्रत्यक्षीकृतपुण्डरीकपदवीं कृत्वा च लब्धोत्सवाम् ।
दिष्ट्यावापि पितुर्न्ययुङ्क्त सरसेनाहूय केयूरकं
तारापीडतपोवने परिजनं पित्रोर्गृहे चापरम् ॥

तारापीडः परिणतकृशोऽप्यायथौ तत्र तूर्णं
सानन्दान्तःपुरपरिजनामात्यवर्गानुयातः ।
अस्मिन्काले सखि सह पुरं पुण्डरीकोऽपि नाकी
किञ्चिल्लज्जाविनमितमुखो वल्लभाभ्याशमस्य ॥

Colophon :

इति कादम्बरीकथासारे अष्टमः सर्गः ।

"समाप्तं चेदं कथासारम्"

Author :

Remarks :

---

॥ कादम्बरीपदार्थटिप्पणम् ॥

No. 1359 A. KĀDAMBARĪPADĀRTHAṬIPPAṆAM.

C. O. L. No. 387 A.

Substance—Palm leaf. Size—15″ × 2″. Leaves—56. 10 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—2375.

Owner—Citran Nambūri Avl., Vezhapparambu, Parūr.

Subject etc.—Same as No. 1616, DCSMMPL.

Author :

Remarks—The leaves are damaged.

---

॥ वश्यादिविधिः ॥

No. 1359 B. VAŚYĀDIVIDHI.

C. O. L. No. 387 B.

Substance—Palm leaf. Size—15″ × 2″. Leaves—50.

9—10 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Owner—Same as No. 1359 A.

Subject—Details regarding the rites of worship.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । गुरुभ्यो नमः । गं गणपतये नमः । उग्रधारशक्त्यै मूलप्रकृत्यै अनन्ताय धर्माय ज्ञानाय ....न्याय ऐश्वर्याय अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय सं सत्वाय रं रजसे तं तमसे मं मायायै व...विद्यायै.......आत्मने अं अन्तरात्मने कं छन्दाय न....नालाय पं पद्माय सं सूर्य-मण्डलाय चं चन्द्रमण्डलाय रं वह्निमण्डलाय तीव्रायै ज्वालिन्यै नन्दायै भोगदायै कामरूपिण्यै उग्रायै तेजोवत्यै..........त्यामये.. नपत्यै...ओम् ह्रीं सर्वशक्तिकमलाय नमः । (गङ्गां॰गां) हृदयाय गीं शिरसे स्वाहा । गूं शिखायै वषट् । गैं कवचाय हुं गौं नेत्रत्रयाय वौषट् । गः अस्त्राय फट् ।

End :

.........वौषट् यं अस्त्रं प्रभायै मायायै जयायै सूक्ष्मायै विशुद्धायै नन्दिन्यै सुप्रभायै................सिद्धिदायै ओम् वज्रनख-दंष्ट्रायुधाय महासिंहाय इं फट् नमः । കേസരങ്ങളിലംഗങ്ങൾ വക്ത്രങ്ങളിൽ ശക്തികൾ. जयायै.....व...यै प्रीत्यै प्रभायै श्रद्धायै मेधायै श्रुत्यै പദ്മാഗ്രങ്ങളിൽ चक्राय शङ्खाय.......यै खड्गाय पाशाय अङ्कुशाय शराय धनुषे ഇന്ദ്രാദികളും വജ്രാദി-കളും चण्डातिलि म.....ण्डालि अमुकं वशमानय स्वाहा वरुण-लवणोऽङ्गिरा ऋषयः अनुष्टुप् छन्दः । अग्निर्देवता ।

......कोलखनोपमा त्रिनयना शूलासिखट्वाङ्गका

नागन्दक्षिणकोऽन्यतो डमरुकं मुण्डश्च खेटं त...

.....भूतसास्रकपालकण्डविलसद्दंष्ट्रा हि भूपोत्पला

ध्येयापिङ्गकपर्दसम्भटाशिरोमालासु नीलो.....

......മന്ത്രാക്ഷരം രണ്ടു ഇട്ടാൽ സാധ്യനാമാക്ഷരം ഒൻറിട്ടു. അങ്ങനെ എഴുതിക്കൂട്ടു. ആയിരം ജപിപ്പൂ. ഭദ്രകാളിവനത്തിൽ ഇതു സർവ്വവശ്യം. ൧൧൭ിഃ.

Author :

Remarks—The leaves are much damaged. The worship of Śiva, Gaṇapati, and other Gods is set forth in detail.

---

## ॥ कादम्बरीप्रकाशनम् ॥

### No. 1360. KĀDAMBARĪPRAKĀŚANAM.

C. O. L. No. 12 A & B.

Substance — Paper. Size—11½″ × 9″. Pages—509. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—4600. Complete.

Owner—C. O.

Subject—A commentary on the Kādambarī, in verse.

Beginning :

उपास्महे जगज्जन्मस्थितिसंहारकारणम् ।
अविद्याध्वान्तविध्वंसि जानकीरमणं महः ॥

पूर्वेण गुणतामासीत्(?) केरलेषु भृगोः कुले ।
विप्रो नारायणस्तस्मादष्टमूर्तिरजायत ॥

कादम्बरी कथामृततरङ्गिणीहृदजिगाहिषा येषाम् ।
तेषां तु कृते निबन्धनतीर्थं तेनेदमारब्धम् ॥

न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम् ।
इति प्रबचसामितदनुसृत्य सुभाषितम् ॥

जातिसमन्वयसम्भृतपरभागैः साधयाम्यहं विदुषाम् ।
वृत्तैः साधु निबद्धैश्चम्पकदामभिरिवामोदम् ॥

रसभावालङ्कारध्वनिगुणवैचित्र्यवर्णनासु वयम् ।
प्रायो दुरधिगमत्वादुदास्महे गौरवादनन्तत्वात् ॥

प्रायेणात्र प्रसाध्यन्ते पदार्था एव यत्नतः ।
प्रसिद्धेषु पदार्थेषु वादार्थः स्फुरति स्वयम् ॥

सत्कथामथ चिकीर्षुरादरा-
न्मङ्गलाय महते विबुधेशान् ।
आहितस्तुति नमस्यति पद्यै-
स्त्रीनपि त्रिभिरसौ कविसिंहः ॥

रजोजुपे क्विबन्तोऽयं सेवार्थो जुपतिर्मुनिः ।
ततश्चतुर्थी स्पृशतेः पुनः क्विन्प्रत्ययः स्मृतः ॥

End:

अथ वामलोचनानां कटिवसनग्रन्थिरुच्यते नीवी ।
विधृतस्तत्रासक्तः प्रियेण तच्छ्लथनलोलुपेन करः ॥

पण्याजीवा वणिजः आपणिका नैगमाश्च वैदेहाः ।
एकार्थाः स्मर्यन्ते महिमा भूमाथ कोटिरुत्कर्षः ॥

परिनिष्ठितं निबन्धनमिति भट्टश्रीमदष्टमूर्तिकृतम् ।
भूयात्कादम्बर्यामामोदः सुमनसाममुना ॥

इति पद्यसूक्तिमौक्तिकमालाभिरलङ्कृतैवमस्माभिः ।
कादम्बरी तदेषा सरसा हृदये निवेश्यतां रसिकाः ॥

निर्व्याजं पदयोर्निपत्य वचसा दीनेन सोपग्रहं
दोषज्ञानयमष्टमूर्तिरिदमाबद्धाञ्जलिर्याचते ।
दोषो यद्यपि मे वचस्सु सुलभः किं त्वस्तमात्सर्यया
बुद्ध्या तत्त्वविचारचारुतरया दृष्ट्वैव विख्याप्यताम् ॥

Colophon:

इत्यामोदाख्यं कादम्बरीप्रकाशनं समाप्तम् ।

Author—Aṣṭamūrti.

Remarks:

---

## ॥ कुचेलवृत्तप्रबन्धः ॥

No. 1361 A. KUCELAVṚTTAPRABANDHA.

C. O. L. No. 370 A.

Substance — Paper. Size—13½″ × 8″. Pages — 14. 17 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—120.

Owner—C. O.

Subject—The story of Kucela.

Beginning :

आसीदस्तरजस्तमोगुणकथः शान्तान्तरात्मा वशी
शिष्यः पुष्यदुदारकीर्तितपसः काश्यस्य सन्दीपनेः ।
व्युत्पन्नोपनिषद्विचारसरणिः सब्रह्मचारी हरे-
र्विप्रः कोऽपि निवृत्तिमार्गकुशलो धीमान् कुचेलाभिधः ॥

भक्तो मुकुन्दचरणांबुजयोर्वितन्वन्
नित्यानि निर्मलमतिः फलनिर्व्यपेक्षम् ।
यत्नं विना समुदितेन धनेन तुष्यन्
पत्न्या समं स्वनिलये स चिरं न्यवात्सीत् ॥

ऐश्वर्यसंभवात् सोऽयमीश्वरस्मृतिरोधकात् ।
दरिद्रतां वरं मेने हरिस्मृतिविधायिनीम् ॥

तं कदाचन तपोभृतां वरं
गेहिनी पुनरवृत्तिखेदिनी ।
विश्लथद्धृतिभरा वचोऽब्रवी-
दश्रुपूरकलुषीकृतेक्षणा ॥

End :

सहमुक्तामयैर्दारैर्गृहे मुक्तामये सुखम् ।
वसतस्तस्य नचिरादासीन्मुक्तात्मता मुनेः ॥

इत्थं वसन्नपि गृहे हरिपादभक्त्या
निर्धूतविश्वविषयाभिरतिः क्रमेण ।
पृथ्वीसुरः किमपि धाम जनार्दनाख्यं
तत्त्वं परार्थमपरार्थमयं प्रपेदे ॥

कुचेलवृत्तनामाख्यं प्रबन्धं सर्वसम्मतम् ।
अशेषमवधिं प्राप सुबन्धुररसोल्लसत् ॥

Colophon :

इति कुचेलवृत्तं प्रबन्धं समाप्तम् ।

Author—Melputtūr Nārāyaṇa Bhaṭṭatiri.

Remarks :

---

## ॥ अजामिळमोक्षः ॥

No. 1361 B. AJĀMIḶAMOKṢA

C. O. L. No. 370 B.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8''$. Pages — 7.

17 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—65.

Owner—C. O.

Subject—The story of Ajāmiḷa.

Beginning :

नारायणेति चतुरक्षरमेव पुंसां
कैवल्यमाकलयतेति विधूय पापान् ।
सङ्केतितं निजसुतेऽप्यवशो यदुक्त्वा
लेभे परां गतिमजामिलभूमिदेवः ।

अमानुपतपोबलो हरिपदांबुजे भक्तिमान्
यमादिपरिशीलनादिह नितान्तशान्तान्तरः ।
अजामिल इति श्रुतः सकलवेदशास्त्रार्थविद्
द्विजातिमकुटीमणिः समुदभूदभूतोपमः ॥

वेदेषु प्रथितान् विधाय विधिवद्धर्मान् गृहस्थाश्रमी
नीत्वा कञ्चन कालमञ्चितसुखं शुश्रूषमाणो गुरून् ।
एकस्मिन् दिवसे स्वतातवचसा कर्मोचितानादरा-
दानेतुं स समित्कुशान् वनमुदूढोत्साहमाढौकत ॥

End :

पुनरपि हरिदूता याम्यदूतानवोचन्
जननशतसहस्रैर्दुष्कृतौघे कृतेऽपि ।
यदिह सकृदनेन व्याहृतं नाम विष्णो-
र्विदितमहह किन्नो निष्कृतिस्तत्कृता वः ॥

नृणामघं दहति नाम हरेरबुद्ध्या-
प्याख्यातमामयमिवौषधमग्निरेधः ।
आम्नायकृत्यमखिलं शमलं पुनाति
सेवा हरेस्तु सहवासनया लुनाति ॥

इत्थं तद्वचनं गभीरमधुरं धर्म्यं निशम्याकुला-
स्ते वैवस्वतकिङ्कराः सरभसं जग्मुः स्वतातान्तिकम् ।
श्रीनारायणपार्षदेषु च गतेष्वंभोजनेत्रामृत-
स्वान्तः सोऽपि तपश्चरन्निह पुनश्चागात् स्वरूपं हरेः ॥

Colophon :

अजामिलमोक्षं प्रबन्धं समाप्तम् ।

Author :

Remarks :

---

## ॥ कुचेलवृत्तप्रबन्धः ॥

No. 1362 A. KUCELAVṚTTAPRABANDHA.

C. O. L. No. 374 A.

Substance—Paper. Size—11½" × 8". Pages—14.
18 lines per page and 16 letters per line.
Script—Malayāḷam. No. of Granthas—120.

Owner—C. O.

Subject—The story of Kucela.

Author :

Remarks :

---

॥ अजामिलमोक्षः ॥

No. 1362 B. AJĀMIḶAMOKṢA.

C. O. L. No. 374 B.

Substance—Paper. Size—11½″ × 8″. Pages—18. 18 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—65.

Owner—C. O.

Subject etc.—Same as No. 1361 B.

Author :

Remarks :

---

॥ कृष्णचरितसंक्षेपः ॥

No. 1363 A. KṚṢṆACARITASAMKṢEPA.

C. O. L. No. 641 A.

Substance — Paper. Size—11″ × 9″. Pages—38.

18—20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—450.

Owner—C. O.

Subject—An abbreviated account of the life of Śrī Kṛṣṇa.

Beginning :

श्रीः ।

कृष्णचरितसंक्षेपः ।

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

नमस्कृत्य गुरून् वक्ष्ये श्रीकृष्णचरितं शुभम् ।
वाग्भिर्गद्यमयीभिर्द्राक् पावनीभिर्हृदो भृशम् ॥

विष्णुर्नाम परमात्मास्ति । तस्य बहवोऽवतारास्सन्ति । तत्र प्राधान्येन दशावतारास्सन्ति । तेपु नवमः श्रीकृष्णावतारः । तस्य श्रीकृष्णस्य चरितं संक्षेपेणाभिधीयते । ननु पूर्वा अष्टावतारा वर्ण्यन्तां तेषूपेक्षा नोचिता इति चेन्नायं दोषः । "कृष्णस्तु भगवान् स्वयं" इति बादरायणेनाभिधानात् । तत्र श्रीकृष्णचरितस्यायं संक्षेपः । पुरा किल कालनेमिर्नामासुरो बभूव । स च देवासुरयुद्धे विष्णुना हतः स पु(रि?नः) यदुकुल उग्रसेनाज्जातः पूर्वजन्मस्मृतिश्चास्यासीत् । ततस्सर्वत्र वैदिकं धर्मं क्षपयामास अधर्मं वर्धयामास च । अथ भूमिर्दुष्टान्नृपान् भर्त्तुमशक्ता गौर्भूत्वा चतुर्मुखं शरणं जगाम । चतुर्म्मुख......ता विचार्य क्षीराब्धिशायिनं विष्णुं शरणं जगाम । देवास्सर्वे भूमिश्च अनुजग्मुः ।

End :

ततः स विष्णुः स्वा........र्जुनौ धर्मत्राणात् प्रशस्य ताभ्यां द्विजपुत्रानयच्छत् । अथ बालानादाय तत आगत्य कृष्णौ तान् द्विजाय प्रददतुः । ततो ब्राह्मणो बह्वीभिरशीर्भिस्तौ योजयामास । एवं साक्षात् परमेश्वरो नित्यमपरतन्त्रः सन्नपि हरिधर्मत्राणाधर्मनिरसनाभ्यां स्वमायया यदुकुलेऽवतीर्य शास्त्रानुसारेण धर्मार्थकामाननुभवंश्चिरं श्रीमद्द्वारकायामवात्सीत् ।

योऽवन्यर्थितपङ्कजोद्भवमुखत्रैविष्टपाभ्यर्थितः
श्रीशः शेषसहायवान्यदुकुले जन्मोद्भवं मायया ।
कृत्वा कर्मसु दुष्करं सुरवैर्धर्मं जुगोपाञ्जसा
भक्तिं वर्धयति स्म सर्वजगतां सोऽव्याद्धरिर्नस्सदा ॥

Author—Brahmānandayati.

Remarks—The author's identity is ascertained from the work catalogued below.

---

॥कृष्णचरितसंक्षेपव्याख्या ॥

No. 1363 B. KṚṢṆACARITASAMKṢEPAVYĀKHYĀ.

C. O. L. No. 641 B.

Substance — Paper. Size — 11″ × 9″. Pages—6,

20 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas — 60. Complete.

Owner—C. O.

Subject—A commentary on the Śrīkṛṣṇacaritasaṃkṣepa.

Beginning:

श्रीः ।

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

सदानन्दसुतं वन्दे सदानन्दघनं विभुम् ।
मुक्तिमा... ....थेयं...लीलानुवर्णनम् ॥

नरकेसरिरूपाय नरकार्णवतारिणे ।
नमोऽयं नतिरुन्नत्याः कारणं परमावधेः ॥

यत्सन्निधिं विनैवाहं निर्गुणोऽभूवमन्वहम् ।
पुनश्च सन्निधेर्यस्य निर्गुणोऽस्मि भजे गुरुम् ॥

कलिदोषमहिम्ना नृणामालस्यस्य भूयस्त्वान्मेधायाश्चाल्पीयस्त्वाद् भूयस्त्वेऽपि दुर्वासनाग्रस्तत्वादनुवर्तयितुर्गुरोश्च विरळत्वाद्विघ्नबाहुल्याच्च वैदिकीषु परमपुरुषार्थसाधिकासु चतुर्दशसु विद्यासु नष्टप्रायासु ब्रह्मानन्दाख्यो यतिरतिमन्दबुद्ध्यनुजिघृक्षया सकलकलिदोषघ्नस्य सकलकल्याणप्रसूतिहेतोश्च श्रीकृष्णचरितस्य संक्षेपं चिकीर्षुरादौ गुरुनमस्कारपूर्वं चिकीर्षितं प्रतिजानीते—नमस्कृत्येति । द्विविधो हि नमस्कारः ऐक्यमवनतिश्च—अत्रोभयमपि...

...व्यवहारदशायां गुरून् प्रत्यवनतिः । अवनतिश्च स्वस्य न्यूनत्वपूर्वकं गुरूणामुत्कृष्टत्व... ...प्रणामपरिचर्यादिः । गुरुशब्देन ब्रह्मादय उच्यन्ते । ब्रह्मादयश्च ।

'ब्रह्म ब्रह्मा वसिष्ठश्च शक्तिश्चैव पराशरः ।
व्यासः शुको गौडपादो गोविन्दः शङ्करस्तथा' ॥

इत्युक्ताश्च ।

End :

ब्रह्मणो वर्त्तमानकालावच्छेदेनेह सगुणत्वसद्वितीयत्वप्रसङ्गात् । तस्मात् प्रत्ययः प्रकृत्यर्थस्य सत्ताया महाजातित्ववस्तुपरिच्छेदौ व्यावर्त्य व्यक्तिस्वरूपतां पूर्णतां चाह । एवमाद्यस्य वाक्यस्यार्थः अवशिष्टं सर्वं निगदव्याख्यानम् ।

गोपालाकृति गोखुरोत्थितरजःपुञ्जावृताङ्गश्रिया
पूर्णानन्दमिहादधत् प्रतिदिनं गोगोपगोपीदृशाम् ।
ज्योतिर्नाश्रिरमस्तु वस्तुपदवीमारूढमस्मन्यथो (?)
यत्संपर्कवशेन वस्तुपदवस्तूचैर्जगद् भासते ॥

Author—Text: Brahmānandayati.

Remarks:

---

## ॥ शैवभागवतविरोधानिरासः ॥

No. 1363 C. ŚAIVABHĀGAVATAVIRO-DHANIRĀSA.

C. O. L. No. 641 C.

Substance — Paper. Size—11″ × 9″. Pages — 9.

20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—135.

Owner—C. O.

Subject—Śaiva and Vaiṣṇava philosophies, harmonisation of.

Beginning:

श्रीः ।

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

वैश्वानराह्वयं ज्योतिर्विष्णुरुद्रादिसंज्ञितम् ।
गजवक्त्रधरं तद्वात्सिंहवक्त्रधरं भजे ॥

शैवभागवतग्रन्थदृष्टिभेदितबुद्धिनः ।
विद्वज्जातस्य तुष्ट्यर्थमाग्रहात् प्रयतामहे ॥

श्रीमच्छारीरकं भाष्यं पुराणानि बहून्यपि ।
दृष्ट्वा विरोधभाञ्जीव तन्निरासं विदध्महे ॥

इह हि शैवग्रन्थेषु शिव एकः सर्वज्ञः सर्वेश्वरः सर्वात्मा प्रत्यग्भूतश्च । ततोऽन्ये विष्ण्वादयस्तत्परिवारभूताः सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मत्वप्रत्यक्त्वरहिताः साक्षान्मोक्षं विधातुमशक्ताश्च इति प्रतीयते ।

"किंपाको यदि चन्दनेन सदृशस्तुल्यो हरिः शम्भुना ।

यथास्यापानयोस्साम्यं छिद्रत्वेऽपि न विद्यते ।
विष्णुभक्त्या च मद्भक्त्या नास्ति नास्ति परा गतिः ॥

शम्भुभक्त्यैव सर्वेषां भोगमोक्षौ न चान्यथा" ।

इत्यादीनि वचनानि सहस्रशः स्कान्दादिषु दृश्यन्ते तथा वैष्णवेषु सर्वेश्वरस्सर्वज्ञस्सर्वात्मा प्रत्यग्भूत एकोऽद्वितीयः परमात्मा हरिः तं भजन् भुक्तिमुक्ती प्राप्नुयात् ।

End :

तथा सर्वज्ञत्वं सर्वेश्वरत्वं प्रत्युक्तम् नित्यशुद्धत्वादयश्च शैवभागवतपुराणेषु समाना एव। सा च विद्याया एकत्वे युक्तिः एवं मोक्षपरे ग्रन्थे सर्वत्र चतुर्मुखादिप्रतिपादनमपि विराडन्तर्याम्यभिप्रायं द्रष्टव्यम् । उपास्यैक्यश्च विद्यैक्यं नाम रूपभिदा च अस्त्येव सत्यविद्यायां नाम्नी। अहरहं यथा यत् पुनः क्वचिद्दुर्गाया एव सर्वेश्वरत्वं वर्ण्यते । तत्रायमभिप्रायः। जगद्रूपस्य परमेश्वरस्य यच्चैतन्यं तत्तस्य स्वरूपमपि पटस्य शौक्ल्यवद्गुणं कल्पयित्वा पुनः सर्वेश्वरस्य व्यापारजातं दुर्गायाः व्यापृतिः कल्प्यते । तस्य फलं भुक्तिः क्रममुक्तिश्च। उपासते ये परमां सर्वलोकैकमातरं तेऽभीष्टं सकलं यान्ति । विद्यामुक्तिप्रदामपि इति वचनात् षट्त्रिंशत्तत्त्वजातत्रिजगदुपहितं ब्रह्म शर्वाभिधानं, ध्येयं त्र्यक्षरश्च सांबं शिरदुादत शशिप्रख्यमीशानभक्तैस्तद्वत्तच्चैश्चतुर्विंशतिभिरुपाहितं ब्रह्म कृष्णाभिधानध्येयं पक्षस्थविद्युत्प्रभवसुविमलां विष्णुभक्तैस्तदेव ॥

Author :

Remarks :

---

## ॥ ध्यानसारव्याख्या ॥

No. 1363 D. DHYĀNASĀRAVYĀKHYĀ.

C. O. L. No. 641 D.

Substance—Paper. Size—11″ × 9″. Pages—15. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—190. Incomplete.

Owner—C. O.

Subject—A commentary on the Dhyānasāra.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

यत्सान्निधिं विनैवाहं निर्गुणोऽभूवमन्वहम् ।
पुनश्च सान्निधेर्यस्य निर्गुणोऽस्मि भजे गुरुम् ॥

सन्यासिनामवश्यकर्तव्यं हरिध्यानं प्रदर्शयितुकामः कश्चिद्योगी ध्यानसाराख्यं ग्रन्थं चिकीर्षुर्गुरुनमस्कारपूर्वकं चिकीर्षितं प्रतिजानीते ।

नमस्कृत्य गुरून् वक्ष्ये ध्यानसारमनुत्तमम् ।
येन संसारमोक्षः स्यात्सर्वेषामपि देहिनाम् ॥

इति । यद्यपि ध्यानप्रकारः पुरातनैरेव "प्रसन्नवदनं चारुपद्मपत्रायतेक्षण"मित्यादिना प्रपञ्चितः तथापि तत्तत्कालीनं तत्तत्कालीनैः प्रदर्शितो विशेषत उपकुर्यादिति अयं प्रसादः 'या सा अहं

गुरून्नमस्कृत्य ध्यानसारं वक्ष्य इत्यन्वयः ध्यानं नाम विजातीय-मनोवृत्त्यव्यवहितसजातीयमनोवृत्तिप्रवाहः। स च विषयेष्वेव स्वतो भवति। न विषयिणि विष्णौ तस्माद्विषयिविषयत्वेन दुर्लभत्वात्परम-पुरुषार्थसाधनत्वाच्चास्य सारत्वम्। ध्यानेषु सारं ध्यानसारमिति सप्तमीतत्पुरुषः सारत्वमापेक्षिकमपि स्यात्। अन्यत्किमप्यपेक्ष्येदं सारमिति-अतो विशिनष्टि'अनुत्तम'मिति'। न विद्यते उत्तमं यस्मात्तदनुत्तममिति पञ्चमीबहुव्रीहिः।

End:

कथंभूतस्य हरेः भुवो भर्तुः भुवो भूदेवतायाः भर्ता पतिः तस्य। एवं केशादिपादान्तं स्तुत्वा श्रीपादपल्लवं पुनर्विशेषतोऽपि स्तौति।

"पदपङ्कजयुग्मं तद् भक्तहृत्पङ्कजालयम्।
प्रणमामि हरेर्नित्यं प्रळयार्कद्युतिप्रभो"रिति।

अहं हरेः तत्पादपङ्कजयुग्मं नित्यं प्रणमामीत्यन्वयः। अत्र पद-शब्देनाङ्गुलिसहितं पादतलमुच्यते। र...धरसत्व...पद्मादिभिः सदृशत्वात्। कीदृशं तदित्यत्राह–भक्तहृत्पङ्कजालयमित्यादि–भक्ताः श्रवणादिपराः तेषां हृदेव पङ्कजं तदालयो नित्यनिवासस्थानं यस्य तत्तथोक्तम्। प्रलयेऽर्कः प्रलयार्कः।

Author:

Remarks:

## ॥ ध्यानसारः ॥

## No. 1363 E. DHYANASĀRA.

C. O. L. No. 641 E.

Substance — Paper. Size—11″ × 9″. Pages—3.
20 lines per page and 24 letters per line.
Script—Devanāgarī. No. of Granthas—35.

Owner—C. O.

Subject—Rites of meditation.

Beginning :

श्रीः ।

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

नमस्कृत्य गुरून् वक्ष्ये ध्यानसारमनुत्तमम् ।
येन संसारमोक्षः स्यात्सर्वेषामपि देहिनाम् ॥

अरुणः श्यामलश्चैव तथाञ्जननिभोऽपि च ।
त्रिधेह वर्ण्यते विष्णुः श्रीमद्भागवते परे ॥

श्यामं हिरण्यपरिधिं तप्तहाटकवर्चसम् ।
कृष्णवर्णं कलौ कृष्णमित्यादिश्रुतिदर्शनात् ॥

सर्वथातिमनो(हारादि?हारि) रूपं तस्य भवेदिह ।
नीरूपानन्दसन्दोहबाहुल्येन मधुद्विषः ॥

वेदान्तोपासनाभागे रूपवान् हि परेश्वरः ।
आ...खतो रूपं हिरण्यश्मश्रुरित्यतः ॥

मायायाः कृष्णरूपत्वं तत्कार्ये तमसि स्फुटम् ।
ईक्षणात्कृष्णवर्णस्य कार्यं तुल्यं हि हेतुना ।

अतश्च शक्तिसंभेदे रूपात्रितयमुच्यते ।
यथा यस्य रुचिस्तत्र तथा ध्याय तु प्रभुम् ॥

प्रायः सात्त्विकबुद्धिस्तु स्वर्णाङ्गं हरिमीश्वरम् ।

End :

हरिसायुज्यमाप्नोति विदेहश्च क्रमाद् भवेत् ।
य इदं पठति प्राज्ञस्सन्ध्ययोरुभयोरपि ॥

स...सपुत्राद्यैर्विमुक्तया च हरिप्रियः ।
यावद्यावत्तामो व्येति बुद्ध्या धर्मसमाहतम् ॥

तावत्तावद्धियं...न्तावत्तावत्सुखोन्नतिः ।
द्वैतास्पृक्प्रत्यगात्मिकं .... .... ।।

....चीव पराग .... ....युष्मद .... ।
....द्विदा ....भ्यां ....भिद्यते विद्यया मृषा ॥

पुत्रादिविषया प्रीतिर्वासना शि....च्य.... ।
.... यलानिमित्तोत्थो हर्षो मोदः प्रकीर्तितः ॥

प्रकर्षगुणसंयुक्तः प्रमोदः स्यात् स एव तु ।
...सामान्यमात्मा स्यादानन्दोऽभेदसंश्रयात् ॥

उत्कृष्यमाण आनन्दो निष्ठा यत्र निगच्छति ।
तदेतत् परमं ब्रह्म पुच्छं सर्वाश्रयत्वतः ॥

Author:

Remarks:

---

## ॥ वेदान्तसारः ॥

### No. 1363 F. VEDĀNTASĀRA.

C. O. L. No. 641 F.

Substance—Paper. Size—11″ × 9″. Pages—8½. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—125.

Owner—C. O.

Subject—Principles of Vedāntic doctrines.

Beginning:

ध्वान्ताध्यस्ता......कृद्यो जगद्भ्रान्तिमुच्चैः
स्वात्मन्यस्ता व्यधत्त क्षणमिव करुणाभारतश्रीगुरुर्नः ।
कैरेवाद्योपकारै...ति घटितः स्यादनल्पायुषापि
न्यक्कृत्यान्यत्प्रणामं प्रतिदिनमधिकं चेतसालं विदमः(?) ॥

यो विद्याध्यस्तदेवत्रयरहितचितिः स्वात्मभावं व्यधान्नो
ब्रह्मैव त्वन्न .... वः क्व .... दि स मयाराध्यते श्रीगुरुर्नः ।

कृष्णे त्रैलोक्यदेहे परमसुखभृ .... वने....भक्त्या
.... नौ दृढा च प्रळयजलनिधेस्तारिकादर्शये नः ॥

प्रत्युच्चारध्रुवस्य प्रपशनमुदयद्वैतमद्वैतमात्रं
भाव्यं तप्ताश्मवारिप्रतिममहमपि ध्वस्यते ज्ञानकार्यम् ।
तस्माद् द्वैत .... पो वियदिव घटगं कुम्भभेदे महाखं
स्यादित्या वर्तयध्वं मनुपरम .... बुद्धिमन्तो यतीन्द्राः ॥

वाक्यस्याज्ञानबाधाचतुरिमगुणता सुप्रसिद्धा हि लोके
वाक्यार्थं वक्ति मन्त्रो ध्रुव इति विदुषां सम्मतं वेदसारम् ।
तस्मादध्यस्तविश्वं तटिदिव तिमिरा ... पितं बाधमानं
ब्रह्मज्ञा .... दानं मनुवरममुकं प्रत्यहं जञ्जपीतु ॥

End :

शिवे भक्तिः क्षमा सत्यमशेषेन्द्रियसंयमः ।
सर्वभूतेषु मैत्री च शिवधर्मस्य लक्षणम् ॥

श्रवणं द्वादशी पर्व हरिभक्तेरनेहसः ।
आर्द्राष्टमीचतुर्दश्यश्शम्भुभक्तेर्विशेषतः ॥

दश शङ्करविष्णोः स्युर्भजने दिवसाः स्मृताः ।
नवम्यौ च चतुर्दश्यौ कृत्तिका सहिपट्ग्रहः ॥

षण्मुखस्य चतुर्दश्यौ षष्ठ्यौ चापि सक्रान्तिके ।
अशिवानि विहन्तुः स्युश्चतुर्थ्यौ शुक्रवासरः ॥

शास्तुर्मन्ददिनं चापि फल्गुनर्क्षञ्च हर्षकृत् ।
पुण्यकालाश्च सर्वेषां श्राद्धनक्षत्रमेव च ॥

Author :

Remarks :

---

## ॥ चम्पूभारतम् ॥

## No. 1364. CAMPŪBHĀRATAM.

C. O. L. No. 137.

Substance—Paper. Size—$10\frac{3}{4}'' \times 8\frac{1}{2}''$. Pages—274. 20 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—250. Incomplete.

Owner—C. O.

Subject—The story of the Pāṇḍavas.

Beginning:

लोकानन्दैकहेतुः स्वयमजनि पुरा चन्द्र एवाद्भुतश्री-
रासेव्यो निर्जराणां सुहृदखिलजगन्माथिनो मन्मथस्य ।
पुत्रः साक्षाद्विधातुः श्रुतिनुतमहिमा मानसो दानवारे
र्देवस्यादक्षिणं लोचनमचलसुताभर्तुरुत्तंसरत्नम् ॥ १ ॥

निःशेषग्रहसत्तमस्त्रिजगतीनेत्राभिरामाकृति-
स्तारायां बुधसंसदामचरमस्तस्मात्प्रजज्ञे बुधः ।
गौरीशापबलोपपन्नवनितारूपे नृपेऽभूदिले
पुत्रस्तस्य पुरूरवा वसुमतीभर्ताधिहर्ता नृणाम् ॥ २ ॥

उर्वश्यां निगमोपगीतचरितादासीदमुष्माद् द्विषा-
मायुर्भङ्गकृदायुरायतभुजस्तम्भो धरित्रीपतिः ।

तस्याभून्नहुषः सुतः स्वसुकृतप्राप्तेन्द्रलक्ष्मीर्नृपः
संजज्ञे भुवनप्रशस्तमहिमा राजा ययातिस्ततः ॥

End :

अथ सोमदत्ततनुजो रमापते-
रनुजोऽपि भग्नरथसूतकार्मुकौ ।
परिगृह्य पङ्कसलतां परस्परं
प्रथनं भयानकमुभौ वितेनतुः ॥

गान्धारजाजठरसीम्नि पुराश्मदत्तान्
दत्वाशयां(?) युधि गदा पवमानसूनोः ।
दुःशासनानुजकुलाय हि यौगपद्या-
च्चक्रे द्विरष्टनवतिं त्रिदशांस्तु यातॄन् ॥

विहयं विरथं विसारथिं
विशरासं विपताकिकापटम् ।
विशिखेन विवस्वतः सुतं
विदधाति स्म वृकोदरः क्षणात् ॥

Colophon :

इति चम्पूभारते द्रोणपर्वणि व्यूहभेदनं समाप्तम् ।

Author :

Remarks :

## ॥ चम्पूभारतव्याख्या ॥

## No. 1365. CAMPŪBHĀRATAVYĀKHYĀ.

C. O. L. No. 2401.

Substance—Palm leaf. Size—14" × 1¾". Leaves—222. 10—12 lines per page and 52 letters per line. Script—Grantha. No. of Granthas—7900. Complete.

Owner—Sthāṇusubramoṇya Śāstrial Avl. Kanyākumari.

Subject—A commentary on the Bhāratacampu.

Beginning :

हरिः ओम् । शुभम् । अविघ्नमस्तु ।

इष्टदेवता(प्रमाणं?प्रणामं) ग्रन्थतो निबध्नाति ।

कल्याणमिति । करटयोर्गण्डस्थलयोः 'काकेभगण्डौ करटावि'त्यमरः । मदधुन्यां मदजलप्रवाहे लोलायां कल्लोलमालायां महातरङ्गपरम्परायाम् । 'अथोर्मिषु महत्स्वुल्लोलकल्लोलावि'त्यमरः । खेलतां क्रीडतां लोलम्बानां भ्रमराणां 'द्विरेफपुष्पलिड्भृङ्गे'त्यमरः । कोलाहलैः कलकलशब्दैः मुखरितस्य शब्दितस्य दिक्चक्रवालस्य दिङ्मण्डलस्यान्तरालो मध्यप्रदेशः यस्य तथोक्तं 'चक्रवालं तु मण्डलमि'त्यमरः । सततं परिचलद्भ्यां कर्णाभ्यामेव तालाभ्यां व्यजनाभ्यामित्यर्थः । भीमो भीमसेन इतीव नामैकदेशे नामग्रहणं 'व्यजनं तालवृन्तक'मित्यमरः । प्ररोहतामुत्पत्तिमतां वाताङ्कुराणां मन्दमारुतानामित्यर्थः । अङ्कुरस्त्वङ्कुरस्तुल्याविति सारस्वतः ।

End :

राज्ञामिति । असौ धर्मतनूभवश्चरणयो राज्ञां मौलिपरम्पराः सामन्तशत्रुराजादिशिरःपरम्पराः पाणौ प्रदानश्रियं दातृलक्ष्मीं बुद्धौ राजनयोदयं राजनीत्यतिशयं हृदि कृपां (सर?रस)ज्ञाञ्चले जिह्वाग्रे सत्यं बाहौ सागरमेखलां समुद्रावृतां वसुमतीं भूमिं मस्ते मस्तके किरीटं च मुदा कुर्वन् सन् प्रजाः गोपयति स्म रक्षति स्म । धर्मपुत्रः किरीटादिनात्मानं पट्टाभिषिक्तं कृत्वा सकलराजसङ्घानप्यधरीकृत्यात्यन्तदातृत्वसत्यदयाराजनीतिप्रभृतिकल्याणगुणसागरः सन् सप्तद्वीपवर्तीं समस्तभूमिमपि धर्मेण पालयति स्मेत्यर्थः ।

Colophon :

(१) इति श्री नृसिंहाचार्यविरचितायां चम्पूभारतव्याख्यायां तृतीयः स्तबकः ॥

(२) इति कौशिककुलकलशपारावारशरद्राकाचन्द्रस्य चतुःशास्त्रपारीणस्य श्रुतिस्मृत्युदितधर्मावबोधानुष्ठानप्रवचनमबाद्य (?) परावतारस्य श्रीमद्रामानुजदर्शनप्रवर्तकस्य सततभगवद्भागवताचार्याराधनतत्परस्य सकलराजाधिराजमणिमकुटोपलालितचरणकमलस्य मूर्तीकृतशान्तिगुणस्य ब्रह्मनिष्ठस्य ब्रह्मवित्सन्ततिकस्य श्रीमद्वेदान्तदेशिकावतारस्य श्रीमद्वेदान्तदेशिकनामधेयस्य महागुरोः तत्कटाक्षविषयीभूतस्य तदाहितशक्तिकस्य तत्सान्निधिप्राप्तरहस्यजालस्य श्रीनृसिंहाचार्यनाम्नस्तत्कुमारस्य कृतिषु चम्पूभारतव्याख्यायां सरस्वतीविलासाख्यायां द्वादशस्तबकः समाप्तः ॥

Author—Nṛsiṁhācārya.

Remarks—The first three *stabakas* are separately numbered from 1 to 82 and the next four from 1 to 140.

---

## ॥ चम्पूभारतव्याख्या ॥

No. 1366. CAMPŪBHĀRATAVYĀKHYĀ.

C. O. L. No. 136.

Substance—Paper. Size—11⅓″ × 9″. Pages—32. 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—C. O.

Subject—Same as No. 1365.

Beginning:

चम्पूभारतव्याख्याने प्रथमस्कन्धः ।

कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वातांकूराजिहीर्षादरविवृतफणाशृङ्गभूपाभुजङ्गम् ॥

तुहिनकिरणवंशस्थूलमुक्ताफलानां
विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या
रिपुजनदुरवापा राजधानी कुरूणाम् ॥

यस्यामुदग्रनृपमन्दिरचन्द्रशाला-
वातायने गतिवशाद्वपुषि प्रसक्ताम् ।
दीपाग्रधूममपिकां शिशिरांशुबिम्बे
मोहात् कुरङ्ग इति मुग्धजना वदन्ति ॥

व्याख्यानम् ।

कल्याणमिति । करटयोः कुम्भयोः सम्बन्धिन्यां मदधुन्यां दानजलनद्यां लोलानां कल्लोलानां पृथुतरङ्गाणां मालासु पङ्क्तिषु खेलतां क्रीडतां लोलम्बानां कोलाहलैः (ग्रीष्मेषु शीतकरकान्तकृतोदरासु?) झङ्कारकलकलैः मुखरितं शब्दायमानं दिशां गजानां चक्रवालस्य मण्डलस्य अन्तरालं मध्यदेशः यस्य तथोक्तम् ।

End :

तिग्मेन बाणेन जघान तस्मिन्
युग्मे नराणामधिपः पुमांसम् ।
वातायुराकारसमौ महर्षे-
र्जातायुरन्तः सहसाललम्बे" ॥

ततः कृपामन्दमनाः किन्दमनामधेयः सन्दारिततनुस्यन्दमानरुधिरेण महारुषा कल्परविकल्पमहारुषा तस्मिन्महीभृति सम्भोगसम्भेदकमम्भोजदृशां दम्भोलिमिव सहस्राक्षः शापमुदस्राक्षीत्। तदनु तापसशापेन विरचितमनस्तापेन भूपेन चतुरङ्गबलमिव राज्यमपि व्यसृज्यत ।

अष्टाङ्गयोगानवतोऽस्य राज्ञो
मृष्टान्नमासीन्मृदुकन्दमूलम् ।

गर्भोऽत्र तस्याजनि कलिर्मो(?)
दर्भोऽपि सिंहासनतां जगाहे ॥

व्याख्यानम् ।

तिग्मेनेति । नराणामधिपः पाण्डुः तस्मिन् युग्मे हरिणमिथुने पुमांसं मृगं तिग्मेन तीक्ष्णेन बाणेन जघान हतवान् । असौ बाणनिहतः वातायुः मृगः "मृगे कुरङ्गवातायुरि"त्यमरः । जातः आयुषः जीवितकालस्य अन्तः समाप्तिः यस्य तथोक्तः सन् महर्षेः किन्दमनामधेयस्य आकारं तत्स्वरूपं सहसा तत्क्षणमेव आलम्बे स्वीकृतवान् । यत्तु जातायुरन्तरामिति पाठान्तरं तन्मूलकृदभिमतलाटानुप्रासालङ्कारभङ्गादुपेक्ष्यम् ।

तत इति । ततः ऋष्याकारस्वीकरणा ।

Author :

Remarks—The Ms. embodies the first 37 verses.

---

## ॥ चम्पूरामायणम् ॥

No. 1367 A. CAMPŪRĀMĀYAṆAM.

C. O. L. No. 2302 A.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—45. 7—9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1175.

Owner—Bhāskaran Jayantan Mūttatu Avl., Vaṭṭappaḷḷi Illom, Kumāranallūr.

Subject—The story of Rāma.

Beginning—Same as No. 1625, DCSMMPL.

End :

.... .... ... ... ... ...

देव्या.....न्वयकीर्तनेन त्वन्मुद्रया चाप्यपनीय शोकम् ।
वार्तामभिज्ञानमयीमयाचं प्रस्थातुकामः ... ........
ब्रह्मास्त्रवित्रस्तज(य)न्तकाकां कथामभिज्ञाप्य वनप्रवृत्ताम् ।
चिरं रुदन्त्या जनकेन्द्रपुत्र्या चूडामणिः ''''प तुभ्यम् ।
किं वहुना देव तस्याः प्रतिष्ठास्नुनस्नुनाशैकपाशितान् मुद्रयित्वा प्रपन्नोऽहं त्वदभिज्ञानमु.... .... .... ....

Colophon :

इति विदर्भराजविरचिते चम्पूरामायणे श्रीमत्सुन्दरकाण्डं समाप्तम् ।

Author—Bhoja Rāja.

Remarks—The leaves are damaged. The Ms. comprises the Kāṇḍas, Bāla to Sundara. It is printed in NSPB.

---

## ॥ शौरिकथा ॥

## No. 1367 B. ŚAURIKATHĀ.

C. O. L. No. 2302 B.

Substance—Palm leaf. Size—11″ × 1″. Leaves—21.

8—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas — 525. Complete.

Owner—Same as No. 1367 A.

Subject—An account of the life-history of Lord Kṛṣṇa.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अवनतदेवं देहं पुंसः परमस्य सम्पदे वन्देऽहम् ।
यत्पदमम्बुध्यन्ते... ...त्तर्म बुध्यन्ते ।
गोपततिः पूतनया यतो यतः प्राप्यत क्षतिः पूतनया ।
योऽधित दूर्वाभोगं वपुश्च गोप्यो दृशा यदूर्वाभोगम् ।

यत्तनुरञ्जननीला यज्जनने संपदामरञ्जननीला ।
कृतरथसाचिव्यस्तान्यश्च कुरून् व्यधित सव्यसाचिव्यस्तान् ॥

सद्गुणमालं व्य........मि च विद्या स्थिरा यमालम्ब्यासन् ।
यो भृशमस्तव्यस्ता वेदगिरो व्यभजदागमस्तव्यस्ताः (?) ।

End:

सोऽविशदानर्तनतः स्वपुरीं शंभोः पुरस्तदानर्तनतः ।
दानवपत्यन्तेन प्राप्तं बाणेन गाणपत्यन्तेन ॥

उद्धृतकलिलक्ष्माया स्वामी शोधनकृदसुरकलिलक्ष्मायाः ।
वृष्णिपुरे वसदेव स्वैरं वैष्णवपुरे वसदेव ॥

विष्णुर्विपक्षकक्षस्य स्वपदानतयादवः ।
विजहार द्वारवत्यां स्वपदानतयादवः ॥

Colophon :

इति शौरिकथायां षष्ठ आश्वासः ।

Author :

Remarks—The Ms. is slightly damaged. The script is not legible in some leaves. Certain lines from the Vṛttaratnākara are copied in a few leaves at the close.

---

## ॥ तन्त्रोपाख्यानम् ॥

## No. 1368. TANTROPĀKHYĀNAM.

C. O. L. No. 1813.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—122. 8—10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1650. Complete.

Owner—Kūḍallūr Brahmadattan Nambūri Avl.

Subject—Explication of Tantras etc. with illustrative stories.

Author :

Remarks—The text alone is copied in 5 leaves at the end. The work has been published as No. 132 in TSS. and this codex was utilised for the publication.

---

## ॥ दक्षयागः ॥

### No. 1369 A. DAKṢAYĀGA.

C. O. L. No. 243 A.

Substance—Paper. Size—13″ × $8\frac{1}{2}$″ Pages—21. 20 lines per page and 21 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—C. O.

Subject—The story of Dakṣa's sacrifice.

Beginning etc.—Same as No. 1635, DCSMMPL.

Author :

Remarks :

---

## ॥ कामदेवदहनम् ॥

### No. 1369 B. KĀMADEVADAHANAM.

C. O. L. No. 243 B.

Substance—Paper. Size—13″ × $8\frac{1}{2}$″. Pages—16. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—180.

Owner—C. O.

Subject—Description of the destruction of Kāma by Śiva.

Beginning :

श्रीमत्यां दक्षपुत्र्यां पितरि कमितृनिन्दातिरूक्षे प्रकोपा-
दुद्दीप्ते योगवह्नौ हुतवपुषि रुषा प्रस्फुरन्नुद्भटौजाः ।
भीतैर्जातानुतापैः सपदि सुरगणैः सान्त्वितः शान्तमन्युः
कुर्वन् गुर्वीं तपस्यामकृत हिमगिरौ कृत्तिवासा निवासम् ॥

ततः सतीनां प्रथमा सती सा
समाधिवैश्वानरदग्धगात्री ।
मेनापतेस्तस्य बभूव पुत्री
मैनाकसौभ्रात्रवती हिमाद्रेः ॥

विलासलोलाभिरुदूढहेलं
कलाभिरेषा परिपूर्यमाणा ।
मनोहरा चान्द्रमसीव लेखा
दिने दिने वृद्धिमियाय बाला ॥

End :

तथा विचिन्त्यात्मतपोविघातं
वधूजनासक्तिवशादुपेतम् ।
उदूढसंरंभलवं क्षणेन
पतिः पशूनां सगणस्तिरोऽभूत् ॥

मन्मथस्य पुनर्देहसंभवाख्यानपूर्वकम् ।
रतिमाश्वासयामास कापि वागशरीरिणी ॥

संरंभं जगदीश्वरस्य भसितीभावं च चेतोभुवः
पश्यन्ती सगणस्य तस्य च तिरोधानं पुराणामरेः ।

शोकत्रासकृपावमानमदनव्यामिश्रभावोदया
शैलाधीशसुता सकाशमगमत् पित्रोः सखीभ्यां समम् ॥

Colophon :

कामदेवदहनं समाप्तम् ।

Author :

Remarks :

---

## ॥ दक्षयागप्रबन्धः ॥

No. 1370 A. DAKṢAYĀGAPRABANDHA.

C. O. L. No 2098 A.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—20. 8 lines per page and 20—25 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Revati Tirunāḷ.

Subject—Same as No. 1369 A.

Beginning etc.—Same as No. 1635, DCSMMPL.

Author—Melputtūr Nārāyaṇa Bhaṭṭatiri.

Remarks—The missing portion at the end is copied in the last two leaves in small letters.

---

॥ दूतवाक्यम् ॥

No. 1370 B. DŪTAVĀKYAM.

C. O. L. No. 2098 B.

Substance—Palm leaf. Size—7¼" × 1½". Leaves—37. 8 lines per page and 20—25 letters per line. Script—Malayāḷam. No. of Granthas—350.

Owner—Same as No. 1370 A.

Subject—The story of Lord Kṛṣṇa's mission to the Pāṇḍavas.

Beginning:

हरिः ।

साकं राजा सगर्भ्यैस्समयजलनिधिं...तीर्त्वा
निर्मुक्तो वक्त्ररन्ध्राद्विधुरिव तमसो भासमानो नितान्तम् ।
पाणिं पार्थात्मजेनाद्भुतभुजमहसा ग्राहयन्नुत्तराया-
स्सन्तुष्यन् बन्धुवर्गैः सह शमनसुतो मात्स्यपुर्यां न्यवात्सीत्॥

सौभद्रस्य विराटजापरिणये वृत्ते समं पाण्डवै-
रास्थाने मिलितेषु रामशिनिभृ(?)पाञ्चालमात्स्यादिषु ।
स्वैरालापकथावधौ स भगवान् दैत्यान्तकः सौहृदात्
पार्थानां करणीयशेषविषयामित्थं बभाषे गिरम् ॥

विज्ञातं खलु सर्वमेतदखिलैर्यद्धार्तराष्ट्रैः कृतं
द्यूतच्छद्म विधाय पाण्डुतनयेष्वव्याजवृत्तेष्वपि ।
एतैरप्यभिमर्पितं तदखिलं सत्ये स्थितैर्विग्रहे
शक्तैरप्यनुभूतदुःखनिवहैरेतावतो वत्सरान् ॥

End :

पुत्रस्नेहाकुलं मामयि बत भगवन् वस्तुतस्त्वत्प्रपन्नं
जानीहीत्यार्त्तलापे कुरुपितरि जवाद्दृष्टिरस्योदमीलत् ।
सोऽप्यानन्देन पश्यन् परपुरुषमसुं निस्पृहोऽन्यावलोके
प्रज्ञाचक्षुष्ट्वमेव प्रकृतिजमवृणोद्धन्यजन्मा नृपालः ॥

ओजस्तवेदमुपसंहर माधवेति
घुष्यत्सु सत्सु गुरुभीष्मपुरोगमेषु ।
घोरं विहाय निमिषेण कुशेशयाक्षो
गोपीदृशां कुतुकहेतुमवाप रूपम् ॥

दिष्ट्या वीरजनप्रियं परिणतं तावद्रणं दारुणं
निर्यान्तु स्वचमूचयैस्सह महीपाला गृहीतायुधाः ।
पश्यन्त्वत्र पृथाभुवां प्रमथितप्रत्यर्थिशस्त्रोत्करो-
त्कीर्णानुग्रकरानुभावविभवान् दोर्विक्रमप्रक्रमान् ॥

आस्थानाद् बहिरेत्य कैटभरिपुर्गाङ्गेयमालिङ्ग्य तं
पश्चार्धे परिमृश्य भूपमितरानापृच्छ्य सर्वान् कुरून् ।
आघ्रायातिचिरेण मूर्ध्नि विदुरं युक्तं शताङ्गं हयै-
रारूढो हि ययौ विराट......न्तः स्मरन् पाण्डवान् ॥

Colophon :

Author—No internal evidence is available to determine the authorship of the work. It is traditionally credited to have been composed by Melputtūr Bhaṭṭatiri.

Remarks :

## ॥ शिवमाहिमस्तोत्रम् ॥

### No. 1370 C. ŚIVAMAHIMASTOTRAM.

C. O. L. No. 2098 C.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—3. 12 lines per page and 30—34 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1370 A.

Subject—A panegyric of Śiva.

Beginning etc.—Same as No. 1146 D, DCSMMPL.

Author—Puṣpadanta.

Remarks—The invocatory verses occur in the printed text of the Stotraratnākara.

---

## ॥ केरलचरितम् ॥

### No. 1370 D. KERAḶACARITAM.

C. O. L. No. 2098 D.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—26. 8—10 lines per page and 18—24 letters per line. Script—Malayāḷam. No. of Granthas—300. Incomplete.

Owner—Same as No. 1370 A.

Subject—Ancient history Keraḷa.

Author :

Remarks—This work has been published as No. 18 in SVSLS.

---

## ॥ वाक्यम् ॥

## No. 1370 E. VĀKYAM.

C. O. L. No. 2098 E.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—16. 8 lines per page and 20—26 letters per line. Script—Malayāḷam. No. of Granthas—175. Incomplete.

Owner—Same as No. 1370 A.

Subject—Exposition of certain astrological principles.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

गीर्नं श्रेयः धेनव श्रीः रुद्रस्तु नम्यः भवो हि याज्यः धन्येय-भारी धनवान्पुत्रः गृह्यासुराराज्ञा ।

End :

धन्योयं प्रभुसेव्योनात्संक्रोधहृतशेषतः
शिष्टं चटाकिना हत्वा पुनरग्रोद्गमाद् बुधः ।
तुङ्गाद्रिकविसेव्योनात् कलिमासपदैर्हरेत्
शिष्टं वाग्जन्मना हत्वा पुनरग्रोत्क्रमात् भृगुः ॥

Author :

Remarks—The covering Fol. contains the following portion :

उत्तराषाढसंयुक्ता श्रवणद्वादशी यदि ।
सुराबिन्दुसमायुक्तस्सुधापूर्णघटो यथा ॥

एकादशीं तु संस्पृश्य द्वादशी स्पृश्यते यदि ।
श्रवणद्वादशी पुण्या श्रावणे मासि चेद्भवेत् ।

एकं विनायके प्रोक्तं द्वौ सूर्ये त्रीणि शङ्करे ।
चत्वारः केशवे प्राहुः पञ्चार्ये षट् कुमारके ॥
सप्ताश्वस्थे च दुर्गायां सप्त सेशहरौ क्रमात् ।

आलोलामळकावलिं विलुलितां बिभ्रच्चलत्कुण्डलं
किञ्चिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसां जालकैः ।
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः ॥

आलोलेन मदान्धभृङ्गतरुणीसंघानुयातेन ते
रूपेणातिमनोहरेण मधुरेणानेन मानेन च ।
सन्तृप्ता करणत्रयी तरुणि नः खिन्नां तदन्यां द्वयीं
संप्राप्तेऽवसरे गिरा किमथवा रम्भोरु संभावय ॥

चित्रं नर्तनमम्बरे शिखरिणौ शीतांशुबिम्बे तम-
स्सञ्चारं जलजः कपोतरणितं कामागमप्रक्रियाम् ।
मीनौ विद्युति तारका विहरणं ज्योत्स्ना विकोशाम्बुजं
कुर्वाते कुरुते करोति कुरुतः कुर्वन्त्यलं कुर्वते ॥

आस्तां पीयूपलाभः कमपि गरजरामृत्युहारी प्रसिद्ध-
स्तल्लाभोपायचिन्तापि च गरलजुषो हेतुरुल्लाघतायाः ।
नो चेदालोलदृष्टिप्रतिभयभुजगीदष्टमर्मा मुहुस्ते
यामालम्ब्यैव जीवे कथमधरसुधामाधुरीमप्यजानन् ॥

---

## ॥ विषवैद्यम् ॥

## No. 1370 F. VIṢAVAIDYAM.

C. O. L. No. 2098 F.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—3. 9 lines per page and 24 letters per line. Script — Malayāḷam. No. of Granthas—40.

Owner—Same as No. 1370 A.

Subject—Poison-cure.

Beginning:

ഹരിഃ ശ്രീ ഗണപതയേ നമഃ

അവിഘ്നമസ്തു.

എരിതുമുതുകേറുവോനരന മകനാംഗണൻ
ഏററമകതളിർ തന്നിൽ വാണീടുക
എന്മൊഴി തേടുവാൻ വായുകൾ തന്നെയും
എൻെറ ജിഹ്വാവിൽ വസിച്ചു വിളങ്ങുക
ഏകസ്വരൂപനായീടും മുകുന്ദനും
എപ്പോഴുമെന്നിൽ വിളങ്ങി വാണീടുക
തപ്പുകൂടാതെ ഗുരുകൃപ മുററുടൻ
കെല്പുതരിക വിഷഹരമോതുവാൻ
അപ്പോലെ മററും പലരും തുണക്കിലോ
ഇപ്പോഴൊരു വഴിയുണ്ടു പറയുന്നു

മുൽപ്പാടൊരുവക്കൊരു വിഷമെല്ലായും
പില്പാടൊരു വിഷഹാരിയോടോതുവാൻ
തല്പാതൊരു(വർ)വരുന്നോരു നേരത്തു
മുമ്പിൽ വിഷഹാരി വേണ്ടതു കേൾപ്പതും

End :

പിള്ളപ്പാമ്പാകിൽ വിറയൽ ചുഴലുക
ദിക്കമറക്കമതിന്നുമതിരുകൾ
ഏകമന്നായകം മുന്നേമുള്ളകത്തും
കാടിയിൽ തന്നെയരച്ചു കുടിപ്പിതും
കന്നി നാഗത്തി.............................

Colophon :

Author :

Remarks—The last two leaves embody verses 11—33 in the 1st canto of the Raghuvaṃśa.

---

## ॥ दक्षयागप्रबन्धः ॥

### No. 1371 A. DAKṢAYĀGAPRABANDHA.

C. O. L. No. 2502 A.

Substance—Palm leaf. Size—$18\frac{1}{4}'' \times 2''$. Leaves—16. 6 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Nārāyaṇan Mitran Nambūtiri Avl., Cempakaśśeri, Kuḍamāḷūr.

Subject—Same as No. 1369 A.

Beginning etc.—Same as No. 1635, DCSMMPL.

Author :

Remarks—A few verses at the close are missing. The script is legible.

---

## ॥ कामदेवदहनम् ॥

No. 1371 B. KĀMADEVADAHANAM.

C. O. L. No. 2502 B.

Substance—Palm leaf. Size—$18\frac{1}{4}'' \times 2''$. Leaves—14. 6 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—175.

Owner—Same as No. 1371 A.

Subject—Description of Kāma's destruction.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमत्यां दक्षपुत्र्यां पितरि कमितृनिन्दातिरूक्षे प्रकोपा-
दुद्दीप्ते योगवह्नौ हुतवपुषि रुषा प्रस्फुरन्नुद्धटौजाः ।
भीतैर्जातानुतापैस्सपदि सुरगणैस्सान्त्वितश्शान्तमन्युः
कुर्वन् गुर्वीं तपस्यामकृत हिमगिरौ कृत्तिवासा निवासम् ॥

ततस्सतीनां प्रथमा सती सा
समाधिवैश्वानरदग्धगात्री ।

मेनापतेस्तस्य बभूव पुत्री
मैनाकसौभ्रात्रवती हिमाद्रेः ॥

विलासहेलाभिरुदूढहेलं
कलाभिरेषा परिपूर्यमाणा ।
मनोहरा चान्द्रमसीव लेखा
दिने दिने वृद्धिमियाय बाला ॥

तां पार्वतीत्याभिजनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ॥

End :

तथा विचिन्त्यात्मतपोविघातं
वधूजनासक्तिवशादुपेतम् ।
उदूढसंरम्भलवः क्षणेन
पशुः पतीनां सगणस्तिरोऽभूत् ॥

मन्मथस्य पुनर्देहसम्भवाख्यानपूर्वकम् ।
रतिमाश्वासयामास कापि वागशरीरिणी ॥

संरम्भं जगदीश्वरस्य भसितीभावञ्च चेतोभुवः
पश्यन्ती सगणस्य तस्य च तिरोधानं पुराणामरेः ।
कोपत्रासकृपावमानमदनव्यामिश्रभावोदया
शैलाधीशसुता सकाशमगमत् पित्रोस्सखीभ्यां समम् ॥

Colophon :

Author :

Remarks—The story contained in this Ms. is borrowed from the first three cantos of the Kumārasambhava. Most of the verses are almost alike. The last Fol. contains certain citations from an Āṭṭakkatha.

---

## ॥ युद्धोद्यमः ॥

### No. 1371 C. YUDDHODYAMA.

C. O. L. No. 2502 C.

Substance—Palm leaf. Size—18¼" × 2". Leaves—10. 6—7 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas — 150. Incomplete.

Owner—Same as No. 1371 A.

Subject—Description of the preparations for war.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

भद्रं रुद्रपुरस्सरेड्यमहिमा गोपालिकातारका-

चन्द्रश्चन्द्रकमेचको यदुकुलालङ्कारहीरो हरिः ।

शश्वद्विश्वकृपाकटाक्षरसिको मायारसोपासना-
तृष्णः कृष्णपुरस्थलीकृतपदः पुष्णातु युष्माद्दशाम् ॥

वन्दे वृन्दारकाशंसितविशदयशोराशिमानन्दसान्द्रं
रामारामं विदेहेश्वरदुहितृमहाशोकसंशोषशूरम् ।
मित्रं मित्रप्रजायास्सकरुणमरुणाकारमारब्धरक्षो-
बाधं बोधिद्रुमोदुम्बरनिलयगतं श्रीहनूमन् भवन्तम् ॥

शङ्कराभरणं चेम्पट—

लक्ष्मीनाथकृपाकटाक्षशरणं विश्वैकवीरोत्तरं
सौभद्राकलितोत्तरं सहसुहृज्ज्ञातं सदारौरसम् ।
सोढारातिकृतापराधनिकरं सत्यानुकूलात्मकं
कुन्तीनन्दनपञ्चकं सकुतुकं रेमे विराटालये ॥

End :

മുഖാരി ചമ്പട—

സാധുശീലേ ബാലേ കേൾക്ക മാധവി നീ ചാരുഗിരം അഗ്ര
ജൻെറ നിയോഗത്താൽ വ്യഗ്രത കൂടാതെ ഞാനും ദ്വാരകാപു
രത്തിൽ ചെന്നു സാരസാക്ഷിയോടെ ഭൂരികാരുണ്യവാനായി ദ്വാ
രകയിൽ വാഴും തവ സോദരനാം കൃഷ്ണനോടു സാദരമിന്നു
വന്നു ധൂർത്തുകാട്ടി വസിക്കുന്ന ധാർത്തരാഷ്ട്രന്മാരെയെല്ലാം ചീ
ത്തകോപത്തോടു ചെന്നു ചേർത്തീടുവനന്തകങ്കൽ പാഞ്ചാലി
യോടൊന്നിച്ചു നീയഞ്ചാതങ്ങു വസിച്ചാലും. ബന്ധുരാംഗനാം
കൃഷ്ണൻ ബന്ധുവല്ലോ നമുക്കെന്നും.

Colophon :

Author:

Remarks—No internal evidence is available to determine the title of the work. The first leaf contains a discourse of Hiḍimbi which may be a portion of a different work. Since many of the incidents set forth herein point to the preparations for war, the title Yuddhodyama will be sufficiently significant.

---

॥ दूतवाक्यम् ॥

No. 1371 D. DŪTAVĀKYAM.

C. O. L. No. 2502.

Substance—Palm leaf. Size—18¼″ × 2″. Leaves—26. 6 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—350.

Owner—Same as No. 1371 A.

Subject etc.—Same as No. 1370 B.

Author—Melputtūr Nārāyaṇa Bhaṭṭatiri.

Remarks—Certain invocatory verses relating to Viṣṇu are written in small letters.

---

॥ दूतवाक्यम् ॥

No. 1372 A. DŪTAVĀKYAM.

C. O. L. No. 1220 A.

Substance—Palm leaf. Size—9″ × 1⅜″. Leaves—19. 8—9 lines per page and 30—34 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—Nārāyaṇan Nambūri Avl., Taikkāṭṭuśśeri Illom, Certtalai.

Subject etc.—Same as No. 1370 B.

Author :

Remarks :

---

॥ भारतप्रबन्धः ॥

No. 1372 B. BHĀRATAPRABANDHA.

C. O. L. No. 1220 B.

Substance—Palm leaf. Size—9″ × 1⅜″. Leaves—76. 9 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Owner—Nārāyaṇan Nambūtiri Avl., Taikkāṭṭuśśeri Illom, Certtalai.

Subject—The story of the Pāṇḍavas.

Beginning :

हरिः

घाचा दानवसूदनस्य विदिते विद्वेपिणामुद्यमे
राज्याशामपहाय (घोरस)मरारम्भी स धर्मात्मभूः ।
आहूयाथ महीश्वरानुरुचमूसञ्छादिताशामुखान्
पाञ्चालप्रमुखान् मिथस्समुचितामूचे गभीरां गिरम् ॥

भो भो भूपालवीराः शृणुत मम गिरं धार्तराष्ट्रैर्यदेतत्
सौभ्रात्रं नो गरीयः परिणतमधुना नूनमन्यादृशं तत् ।
देवेनानेन दौत्यादपि नृपसमितौ याचितः पञ्चदेशान्
वाचा दुर्योधनो मे न खलु कलुपधीर्दत्तवानुत्तरं वा ॥

शिशुमेव वृकोदरं निहन्तुं प्रयतन्ते स्म पुरा निगूढमेते ।
गरदानजलप्रपातनाद्यैरुरुदोषैरवति स्म दैवमेनम् ॥

End :

धर्मेण त्रिदशेश्वरेण च समं सर्वैश्च वृन्दारकै-
स्सामोदोल्लसितस्तदा सुरधुनीं संप्राप्य पुण्योदकाम् ।
राजा वासवसिन्धुरेन्द्रमदगन्धोदञ्चिते तज्जले
सोऽप्यामज्य शि.... राज सुकृती त्यक्त्वा वपुर्मानुषम् ॥

विद्योतमाननवदिव्यमनोज्ञदेहो
विद्योतयन् दश दिशो निजकान्तिपू... ।
उद्यान...पवनेन निषेव्यमाण-
.. द्यो....नयनमोदभरं वितेने ॥

Colophon :

किरीटमणि....गद .... .... भयन्ना....स्फुरन्माणि सिता..

Author :

Remarks—A few leaves at the close are missing.

---

॥ दूतवाक्यम् ॥

No. 1373. DŪTAVĀKYAM.

C. O. L. No. 202.

Substance — Paper. Size—11″ × 9″. Pages—29. 20 lines per page and 11—21 letters per line. Script—Malayaḷam. No. of Granthas—290.

Owner—C. O.

Subject etc.—Same as No. 1370 B.

End :

तत्तेजो नष्टदृष्टिप्रसरमत इतः कर्णदुर्योधनाभ्यां
भूपाः प्रागेव पेतुर्भुवि कृपाविदुरद्रोणभीष्मादिलोकः।
मूर्धन्याबद्धहस्तः सपदि जयजयेत्युच्चकैरुच्चरंस्तं
दृष्ट्वा दृष्ट्वा चिराय स्वरसपरचिदान्दसिन्धौ न्यमांक्षीत् ॥

पुत्रस्नेहाकुलं मामयि स तु भगवन् वस्तुतः त्वत्प्रपन्नं
... ... ... ...

Colophon :

Author :

Remarks—A few pages at the close are blank.

---

॥ दूतवाक्यप्रबन्धः ॥

No. 1374 A. DŪTAVĀKYAPRABANDHA.

C. O. L. No. 2439 A.

Substance—Palm leaf. Size—15″ × 2″. Leaves—8. 10 lines per page and 52—64 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner — Cirayil Rāman Koccunārāyaṇan Avl., Certtala.

Subject etc.—Same as No. 1370 B.

End :

पुत्रस्नेहाकुलं मामयि बत भगवन् वस्तुतस्त्वत्प्रसन्नं
जानीहीत्यात्तलापे कुरुपितरि तदा दृष्टिरस्योदमीलत् ।
सोऽप्यानन्देन पश्यन् परपुरुषममुं निस्पृहोऽन्यावलोके
प्रज्ञाचक्षुष्ट्वमेव प्रकृतिजमवृणोद्धन्यजन्मा नृपालः ॥

सन्धातुं धृतराष्ट्रजैः सह सुतान् पाण्डोः प्रपन्नः स्वयं
दौत्यं पार्थगुणौघकीर्तनचलत्कोपेन पापेन यः ।

क्षिप्तोऽतीव सुयोधनेन जगदाधारं सभायां प्रद-
र्श्यात्मानं पदसंश्रितानसुखयत् सोऽयं हरिः पातु वः ॥

Colophon :

दूतवाक्यं प्रबन्धं समाप्तम् ।
श्रीगुरुभ्यो नमः ।

Author:

Remarks :

---

॥ पार्वतीस्वयंवरम् ॥

No. 1374 B. PĀRVATĪSVAYAMVARAM.

C. O. L. No. 2439 B.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—13. 10 lines per page and 46—50 letters per line. Script—Malayaḷam. No. of Granthas—400.

Owner—Same as No. 1374 A.

Subject—The wedding of Pārvatī.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । गुरुभ्यो नमः ।

अद्रीश्वरोऽथ तनयां परिरभ्य दोर्भ्यां
वाताहतामिव लतामतिवेपमानाम् ।

अत्यादरामृतरसाप्लवशीतलाभि-
राश्वास्य वाग्भिरकरोदपनीतभीतिम् ॥

तस्मिन् पञ्चशरे हरेण पुरतो रुष्टेनं भस्मीकृते
भग्नानल्पमनोरथा गिरिसुता जातापमाना भृशम् ।
चातुर्यं वपुषो निजस्य मनसा दीना निनिन्द स्वयं
सौभाग्यैकफलं हि वल्लभजने सौन्दर्यमेणीदृशाम् ॥

समुपेत्य पुरस्स एव यावत्
स्मरवैरी वितरत्यशेषकामान् ।
अतनोव्यवसायमद्रिकन्या
तपसे तावदनूनसत्त्वसारा ॥

काननान्ते तपः कर्तुं मानसे कृतनिश्चयाम् ।
मानिनीं तनयामेनां मेना दीना वचोऽब्रवीत् ॥

End :

हर्म्योदरे स कुसुमास्तरणेऽपि याना-
द्यद्दूयते चरणपङ्कजमायताक्ष्याः ।
आरोपयन्मृदुतरं दयितस्तदेत-
दश्मानमार्द्रहृदयस्स कथञ्चिदेव ॥

हन्तामुं मां हरिणनयने विद्धि दासं त्वदीयं
सन्देहोऽस्मिन्न खलु वचने साक्षिणस्सर्वदेवाः ।
मन्त्रव्याजाद्ध्रुवमिति वदन्नद्रिराजात्मजाया-
श्चन्द्रापीडश्चरणकमलं लोलधीराललम्बे ॥

ध्रुवेण भर्त्रा ध्रुवदर्शनाय
प्रयुज्यमानं प्रियदर्शनेन ।

... ... ... ...

... ... ... ...

Colophon :

Author :

Remarks—The work depends for its theme on cantos 5, 6 and 7 of the Kumārasambhava. The Ms. appears to be of ancient origin.

---

॥ दूतवाक्यप्रबन्धः (व्याख्योपेतः) ॥

No. 1375 A. DŪTAVĀKYAPRABANDHA
with Malayāḷam commentary.

C. O. L. No. 48 A.

Substance—Palm leaf. Size—10½" × 1¾". Leaves—40. 8—10 lines per page and 32—36 letters per line. Script—Malayāḷam. No. of Granthas—775.

Owner—Nārāyaṇan Nambūri Avl., Ceri Maṭhom, Koṭṭayam.

Subject etc.—Same as No. 1370 B.

Author :

Remarks—The work is composed to suit the conveniences of a "discourser." The text is well known as the production of Melputtūr Nārāyaṇabhaṭṭatiri.

---

## ॥ मण्डोदरीपरिणयः ॥

### No. 1375 B. MAṆḌODARĪPARIṆAYA.

C. O. L. No. 48 B.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—5. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Same as No. 1375 A.

Subject—The story of Maṇḍodari's wedding.

Beginning :

हरिः ।

പ്രസന്നോസ്മി സഭാമദ്ധ്യേ ഭവന്തം കാങ്കയാലഹം
പ്രിയാം മണ്ഡോദരീം ലബ്ധ്വാ പ്രസന്നോ രാവണോ യഥാ.

വേദജ്ഞന്മാരായി ശാസ്ത്രജ്ഞന്മാരായി ഉഭയകുലപരിശുദ്ധന്മാരായി രാഗദ്വേഷാദിരഹിതന്മാരായിരിക്കുന്ന മഹാബ്രാഹ്മണരെക്കൊണ്ടും സദ്വൃത്തന്മാരായി സരസന്മാരായി സർവ്വജ്ഞന്മാരായിരിക്കുന്ന വിദ്വാന്മാരെക്കൊണ്ടും തനിക്കു താൻ പോരിക, ദാനശീലത്വം, പരാക്രമം എന്നെല്ലാമുള്ള ഗുണ

ഗണങ്ങളോട്ടകൂടിയിരിക്കുന്ന പ്രഭുവിനെക്കൊണ്ടും മററു നാനാ ജനങ്ങളെക്കൊണ്ടും നിറയപ്പെട്ടിരിക്കുന്ന സഭാമധ്യത്തുങ്കൽ ഭവാനെ സരസനായി സമീപത്തുംകൽ കാൺകകൊണ്ടും നമുക്കാകട്ടെ ഇപ്പോൾ ഏറിയിരിപ്പോരു പ്രസാദമുണ്ടായി ചമഞ്ഞു എന്നാകുന്നതു് അതിന്നു് ഒരു ഉദാഹരണം പറഞ്ഞുകേട്ടാൽ അതു ഉള്ളതുതന്നെ എന്നു ബോധിച്ചുകൊള്ളാം. എന്നാൽ അതും പറഞ്ഞു ബോധിപ്പിക്കാം.

പ്രിയാം മണ്ഡോദരീം ലബ്ധ്വാ
പ്രസന്നോ രാവണോ യഥാ

End :

തദനന്തരം തനിക്കു് ഒന്നു വിവാഹം ചെയ്യണമെന്നു നിശ്ചയിച്ചിരിക്കുന്ന സമയത്തുങ്കൽ ഒരു ദിവസം അവധി കൂടാതെ കണ്ടുള്ള രാക്ഷസരോട്ടകൂടെ ദിഗ്ജയത്തിന്നായിക്കൊണ്ടു് പുറപ്പെട്ട സമയത്തുങ്കൽ മയനാൽ ദത്തയായിരിക്കുന്ന മണ്ഡോദരിയെ സുമുഹൂർത്തത്തുങ്കൽ വിവാഹം ചെയ്തു് നവോഢയായിരിക്കുന്ന മണ്ഡോദരിയെ തൻെറ ലാളനാവിശേഷങ്ങളെക്കൊണ്ടു ക്രമേണ ഗളിതലജ്ജയാക്കി കാമങ്ങളെ യഥാകാമമനുഭവിപ്പതുംചെയ്തു് ലങ്കയിൽ കൃതാൎത്ഥചിത്തനായിട്ടു് വസിപ്പതും ചെയ്ത ആ സമയത്തുങ്കൽ രാവണൻെറ മനസ്സിൽ എത്രയുണ്ടു കൌതുകമെന്നപോലെ ഉള്ള കൌതുകം ഭവാനെ സരസനായി സമീപത്തുങ്കൽ കാങ്കകൊണ്ടു് ഉണ്ടായി എന്നു പറഞ്ഞതു്.

Author :

Remarks :

---

## ॥ श्रीरामावतारः ॥

## No. 1375 C. ŚRĪRĀMĀVATĀRA.

C. O. L. No. 48 C.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—25. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Owner—Same as No. 1375 A.

Subject—The story of Śrī Rāma.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीकैलासगिरीश्वरोपरि वरारामान्तरे बन्धुरे
मन्दारद्रुममूलसीमनि मणिप्रद्योतमानासने ।
पार्वत्या सह (स्व?सु) स्थितं गुहगणेशाद्यैरजाद्यैर्वृतं
चेतः श्रीपरमेश्वरं भज सदा कारुण्यपूर्णार्णवम् ॥

ഐഹികപാരത്രികങ്ങളെ സാധിപ്പാനായിക്കൊണ്ടു് അഖിലജഗത്കാരണഭൂതനായിരിക്കുന്ന ശ്രീപരമേശ്വരനെ സാർവകാലം ചിത്തസരോജമധ്യത്തിങ്കലാമ്മാറുവച്ചു് സേവിച്ചു് സഫലമാക്കിക്കൊള്ളണം. എന്നതുകൂടാതെകണ്ടു് അസാരങ്ങളായി അനിത്യങ്ങളായിരിക്കുന്ന വിഷയങ്ങളിൽ സാരബുദ്ധ്യാ ഭ്രമിച്ചു് ദുർലഭമായിരിക്കുന്ന മനുഷ്യജന്മത്തെ വ്യർത്ഥമാക്കിക്കളയാതെ കണ്ടു് സർവാത്മനാ ഒരു ഈശ്വരനെ ഭക്തിയോടുകൂടി സേവിച്ചു് സഫലമാക്കിക്കൊള്ളണം.

End :

जनाय शुद्धान्तचराय शंसते
कुमारजन्मामृतसम्मिताक्षरम् ।
अदेयमासीद् द्वयमेव भूपतेः
शशिप्रभं छत्रमुभे च चामरे ॥

അമൃതസമ്മിതാക്ഷരം കുമാരജന്മ ശംസതേ ജനായ ശു
ദ്ധാന്തചരായ ജനായ ഭൂപതേർദ്വയം ഏവ അദേയമാസീത്.
അമൃതസമ്മിതാക്ഷരമാകുംവണ്ണം കുമാരജന്മത്തെ ശംസത്തായി
ശുദ്ധാന്തചരന്മാരായിരിക്കുന്ന ജനത്തിനായിക്കൊണ്ടു ഭൂപതിക്കു
രണ്ടു വസ്തു തന്നേ അദ്ദേയമായി ഭവിച്ചതുള്ളു. അ സമയത്തു
ങ്കൽ ശുദ്ധാ(ന്താ)ന്തർഭാഗത്തിൽ എല്ലായ്പോഴും സഞ്ചരി
ക്കുന്ന ജനങ്ങൾ ഞാൻ ചെന്നു് പുത്രജന്മത്തെ അറിയിക്കണം,
ഞാൻ മുമ്പേ ചെന്നു് അറിയിക്കണം. എന്നിങ്ങനെ സൂതി
കാഗൃഹത്തിന്റെ സമീപത്തുങ്കൽ തന്നെ മേവി ഒത്തു പാർക്കുന്ന
സമയത്തുങ്കൽ കൗസല്യ ക

Author :

Remarks :

---

## ॥ स्यमन्तकम् ॥

### No. 1375 D. SYAMANTAKAM.

C. O. L. No. 48 D.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—14. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—275. Complete.

Owner—Same as No. 1375 A.

Subject—The story of the *Syamantaka* gem.

Beginning etc.—Same as No. 2084 A, DCSMMPL.

Remarks—This work is of immense service to "dicoursers" (*Cākyārs*).

---

॥ रुग्माङ्गदचरितम् ॥

No. 1375 E. RUGMĀṄGADACARITAM.

C. O. L. No. 48 E.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—2. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 20. Complete.

Owner—Same as No. 1375 A.

Subject—Magnificence of Ekādaśīvrata.

Beginning :

मह्यं मन्दरपर्वते निवसता सत्यप्रतिज्ञ त्वया
मत्पाणिं प्रतिगृह्णता ननु वरो दत्तो वदान्येन यः ।
दातव्योऽद्य स एव मेऽभिरुचितस्त्वेकादशीवासरे
शाल्यन्नाभ्यवहार एव भवतो हानिस्ततः का भवेत् ॥

किमिह बहुना विष्णोरस्यां तिथावतिथावपि
स्वगृहमनुगृह्णानेनान्येनासत्कृतिरिष्यते ।
कठिनहृदये का वार्ता मदष्टि विधवित(?)
स्त्वमपरमखिलं दास्यामीति किमभ्यधात् ॥

End :

तदानीं तत्रस्था अपि मनुजवर्गाः समभवन्
चतुर्बाहानालीभृतजलजचक्राम्बुजगदाः ।
विमानारूढास्ते विमलतनवो विष्णुनिलयं
विवक्षन्तो याता विमलरुचिविद्योतितदिशः ॥

रुग्माङ्गदस्तदैवासीदष्टबाहुर्महाद्युतिः ।
धर्माङ्गदश्चतुर्बाहुस्तन्माता दिव्यसुन्दरी ॥
आरोप्यामूनमन्दं पुनरथ विनतानन्दनस्योपरिष्टात्
तुष्टात्मा पद्मनाभः स्वयमपि च समारोप्य देदीप्यमानः ।
प्राप्तो वैकुण्ठलोकं प्रचुररुचिभरे सर्पलोकेन्द्रतल्पे
लक्ष्मीधात्रीसमेतः सकलजनप(द)स्पष्टदृश्ये स शिश्ये ॥

Author :

Remarks :

---

## ॥ पाञ्चालीस्वयंवरम् ॥

No. 1375 F. PAÑCĀLĪSVAYAMVARAM.

C. O. L. No. 48 F.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—4. 10 lines per page and 32 letters per line. Script — Malayaḷam. No. of Granthas—75. Complete.

Owner—Same as No. 1375 A.

Subject—The story of Pāñcāli's wedding.

Beginning:

एवमेव नीयमाने समये कस्यांचन त्रियामायां विगलितप्राय-यामायां स्वात्मजाभ्युदयमेकमेव विचिन्तयन्त्यां कुन्त्यां उत्थाय प्राङ्मुखोपविष्टे विशिष्टं किमपि जप्यन् जपति धर्ममये धर्मात्मजे मारुतसुते धार्तराष्ट्राणामतिजुगुप्सितं कर्म ध्यायं ध्यायमलब्ध-निद्रे दीर्घनिश्वासमारुतधुतप्रदीपे निद्रापगमादधिकायामिनीं यामिनीमुन्निद्र एव नयति दर्पकण्डूलं ऊर्जस्वलज्याघातसमेधित-श्यामिकाङ्कं वामेन दक्षिणं दक्षिणेन वामं प्रकोष्ठं कण्डूयमान एव शयाने सव्यसाचिनि धर्मात्मजाहूतोत्थितयोः प्राङ्मुखोपविष्टयो-रपि यमयोः पुर इह दम्पत्युदितं रुदितं अजृम्भिष्ट ।

दीर्घं द्विजकुटुम्बस्य क्रन्दितं दीर्घदर्शिनी ।
क्रमप्रवृद्धमश्रौषीत् कुन्तिभोजस्य नन्दिनी ॥

ചൊന്നാൾ വിപ്രാംഗനാ തത്ക്ഷണമധികശുചാ
ഗദ്ഗദം മദ്ഗതം കേൾ
ധന്യേ ഭാഗ്യോപരോധം മമ പുനരിതു പാടീടി-
നാലെന്തുകാര്യം
എന്നാലും ചെററു വക്ഷ്യേ ഭവതിയൊടധുനാ
നാതിദൂരേടത്ര കശ്ചിദ്
ഘോരാരണ്യേ ബകാഖ്യോ നിവസതി പുരുഷാ-
ദാധിരാജോ ദുരാത്മാ.

End:

प्रदक्षिणीकृत्य ततः प्रणम्य
क्रोदण्डमादाय च सव्यसाची ।

उदञ्चयत् पञ्चपत्रारमेन-
मारोपयामास बली सलीलम् ॥

तदनु तरलमन्तर्यन्त्रमालोक्य दृष्ट्या
सममथ घटयित्वा सायकान् पञ्च मौर्व्याम्।
सुदृढमपि विकर्षन् सोऽयमाहूय लोके
पतितमपि च...क्षं दक्षिणं तत्क्षणेन ॥

मालया कलितामोद
परिभ्राम्य ता(?)लिमालया ।
रमणीं रमणी चक्रे
रमणीयाङ्ग.........

Author :

Remarks—The work is composed in the form of a Campu.

---

## ॥ अङ्गददौत्यम् ॥

No. 1375 G. AṄGADADOUTYAM.

C. O. L. No. 48 G.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaf—1. 10 lines per page and 32 letters per line. Script—Malayaḷam. No. of Granthas — 25. Complete.

Owner—Same as No. 1375 A.

Subject—Angada's message to Rāvaṇa.

Beginning :

उत्थाय प्रयतः प्रभातसमये सन्ध्यामुपास्यास्थितो
राजेन्द्रो रघुनायकोऽखिलविभुः सौमित्रिणा सेवितः ।
सुग्रीवेण विभीषणेन च युतः प्राप्तोऽञ्जनानन्दनः
प्राप्तानन्तरकार्यनिर्णयपरः प्राह प्रकृष्टं वचः ॥

दूतो गच्छतु बुद्धिदाननिपुणः पुत्रोऽङ्गदो वालिनः
पौलस्त्यस्य हि तद् ब्रवीतु तरसा सीता परित्यज्यताम् ।
रामं त्वं शरणं व्रजेति वचनं न स्वीकृतं तेन चेत्
नूनं तर्हि विभीषणं दशमुखस्थानेऽभिषेक्ष्याम्यहम् ॥

नत्वा तस्य रघूत्तमस्य चरणौ साष्टाङ्गमाश्वङ्गदः
सुग्रीवेण स मानितो कपिवरैरन्यैश्च सम्भावितः ।
प्राकाराग्रगतः प्रचण्डचरितं प्रासादमध्ये स्थितं
पौलस्त्यं च ददर्श रत्नखचिते सिंहासने सुस्थितम् ॥

End :

एकः सुग्रीवभृत्यः कपिरखिलवनं पत्तनं चापि दग्ध्वा
तूष्णीं यातस्तदानीं दशमुख भवतः किं कृतं वीरवर्गैः ।
सम्प्राप्तोऽसावखिलकपिभटैर्वार्द्धिमुल्लङ्घ्य योद्धुं
त्वं सीतां मुञ्च मुञ्चेत्यनिशमकथयत् प्रेयसी राघवस्य ॥

എന്നിവണ്ണമൊരുവാക്കുകേട്ടു കുപിതനാ രാക്ഷസ-
ചമൂട്ടനാ
നന്നാരാക്ഷസഭടാൻ വിളിച്ചാക്യ സ ത്ര മുന്നിലാത്മ-
നിധനായ താൻ

ഉന്നതെന്ന നിജബാലഹസ്തപരിശോഭിണാ തച്ചു

പൊടിയാക്കിനാർ

ചെന്നു രാമനൊട്ടു പിന്നെ അംബിനൊട്ടുന്നത്തിനാ-

നഖിലമംഗളൻ.

अङ्गदस्य वचः श्रुत्वा हनुमांश्च विभीषणः ।
सुग्रीवो राघवौ तत्र सर्वे ते विस्मयं गताः ॥

Remarks :

---

## ॥ अहल्यामोक्षः ॥

### No. 1375 H. AHALYĀMOKṢA.

C. O. L. No. 48 H.

Substance—Palm leaf. Size—10″ × 1¾″. Leaves—2. 11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—55. Complete.

Owner—Same as No. 1375 A.

Subject—Ahalya's deliverance from curse by the touch of Rāma's feet.

Beginning etc.—Same as No. 1622 D, DCSMMPL.

Author :

Remarks—The title has been assig: ed just to indicate the subject-matter. A verse from the Bhojacampū is noticed at the close of the work.

---

## ॥ गजेन्द्रमोक्षः ॥

### No. 1375 I. GAJENDRAMOKṢA.

C. O. L. No. 48 I.

Substance—Palm leaf. Size—10″ × 1¾″. Leaves—7. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1375 A.

Subject — A Pāṇḍya King's deliverance from curse.

Beginning :

യിണ്ടായീ മാമകീനാം മനതളിർനിറയുമ്മാറൊ-
രാനന്ദമിപ്പോൾ
തണ്ടാർവാണോപമാനം സഭയിലിഹ സഖേ
കണ്ടാനന്തരം ഭവന്തം.
വണ്ടിൻവാടീനിറം തേടിന മുരമഥനന്പണ്ടു
വാപീതടാന്തേ
ക്കണ്ടന്നപ്പാണ്ഡ്യഭൂപാലകമകുടമണിപ്പൂമ്പിന-
ഞ്ഞെന്നപോലെ,

നമുക്കാകട്ടെ ഇപ്പോൾ വേദജ്ഞന്മാരായി ശാസ്ത്രജ്ഞന്മാരായി ഉഭയകുലപരിശുദ്ധന്മാരായി ഷട്കർമ്മനിരതന്മാരായിരിക്കുന്ന മഹാബ്രാഹ്മണരെക്കൊണ്ടു നിറയപ്പെട്ടിരിക്കുന്ന രംഗമദ്ധ്യത്തിങ്കൽ ഭവാനെ സമ്മുഖനായ്‌ കാൺകകൊണ്ടു് നമ്മുടെ മനസ്സിൽ വളരെ പ്രസാദമുണ്ടായി. പ്രസാദം ഉണ്ടായി? എന്നു പറഞ്ഞതുകൊണ്ടു് ഇതു ബോധിക്കുന്നില്ല എങ്കിൽ അതിന്നു് ഒരു ഉദാഹരണം പറഞ്ഞുകേട്ടാൽ അതു് ഉള്ളതുതന്നെ എന്നു ബോധിച്ചുകൊള്ളാം എന്നാലതും പറഞ്ഞു കേൾപ്പിക്കാം.

End :

കണ്ടാനഹോ സപദി രണ്ടാർവിലോചനമകുണ്ഠാദരം
ഗരുഡകണ്ഠേ
വണ്ടിയലുമളകം നരമണ്ടിവരുമളവധികമുണ്ടിനിയ
വെറയൽ തടവുന്ന
മുരവൈരിതാനിവനൊരു സംശയം ന മമ പരനാകി-
ലെന്നിവകൾ കാണ്മാൻ
ഗരമരിയദനുവരഗളമരിയമരിയുമൊരു ഗദകമല-
മമലവനമാലാ

എന്നിങ്ങനെ കരുതി മന്നിൻമണാളനൊടുതന്നെ പറ
ഞ്ഞു നിജതാപം
എന്നെയൊരു മൊളം ബത വന്നഖിലജഗദധിപനിന്നു
വതിനിതു തുനിഞ്ഞു
കരുണാംബുധേ വരിക തരളാംബുവാഹനിഭ മരണാ-
മയങ്ങൾ സഹിയാ മേ
അരുണമൃദുകമലചരണയുഗമൊഴികെ മമ ശരണമിഹ
നഹി നഹി ദയാലോ.

इत्थं तं संस्तुवन्तं सरसिजनिचयैरर्चयन्तं च पश्यन्
हस्तीन्द्रं दैत्यहन्ता निजभुजलतयाकृष्य कासारवारः ।
चक्रे चक्रेण नक्रं किल दलितमुखं सोऽपि तद्देवलाप्तं
भिन्दन् देहं हि हूहूर्दिवमनु गतवान् हन्त गन्धर्वराजः ॥

तदैव लब्धगोविन्दं सारूप्य.. पतिम् ।
ययौ तेन महाभागो विष्णुना धाम वैष्णवम् ॥

Colophon :

Author :

Remarks—The title is based on the subject-matter.

---

॥ द्रौपदीपरिणयचम्पूः ॥

No. 1376. DRAUPADĪPARIṆAYACAMPŪ.

C. O. L. No 263.

Substance—Paper. Size—14″ × 9″. Pages—102. 20 lines per page and 15 letters per line. Script—Devanāgarī. No. of Granthas—975.

Owner—C. O.

Subject—Description of the wedding of Pāñcālī.

Beginning :

....मन्दरशैलमूलविपुलग्रावावली निष्ठुरा-
घातेन क्षुभितां सुधां हसति यद्वाणी प्रसादान्विता ।

ज्यायांसं तम...............वाचस्पति-
स्तुल्ये येन निरन्तरार्जवजुषा शश्वद्भजन् वक्रताम् ॥

एष रुक्मिणीपार्वतीजानकीदमयन्तीपरिणयप्रपञ्चचतुष्टयसन्दर्भणधुरन्धरेण निर्यत्नरचितचित्ररत्नाकरेण चक्रकविना क्रियते पुण्यश्लोकपाण्डवानां च तत्कथनेनाघौघविघटनप्रतिभूरनघैः पद्यैरतिहृद्यैर्गद्यैश्च निरन्तरतरङ्गितशारदाजयकम्बुः द्रौपदीपरिणयचम्पूः

आर्याः पुर्यामेकचक्राभिधायां
सत्रा मात्रा पाण्डुभूपालपुत्राः ।
स्फा(रा) गारे चक्रिरे विप्रवेष-
च्छन्ना वासं कस्यचिद्भूसुरस्य

End :

इत्थं राज्यमवाप्य............सङ्गता-
स्तत्तादृक्कविचक्रगीतचरितास्तत्कांक्षितार्थप्रदाः ।
इन्द्रप्रस्थजुषः प्रजाहित........
पाञ्चालप्रभुकन्ययाश्रितवपुःश्रीधन्यया रेमिरे ॥

Colophon :

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा सा च पतिव्रता प्रसुपुवे यं मानितं सूरिभिः ।
आश्वासोऽजनि तस्य षष्ठ इह स श्रीचित्ररत्नाकर-
भ्रात....द्रौपदीपरिणये चम्पूप्रबन्धे महान् ॥

इति द्रौपदीपरिणयचम्पूः

Author—Cakrakavi.

Remarks—This work is not available in print. Another original composition by the author is Jānakīpariṇayam. It contains 6 Āśvāsas.

---

## ॥ नलचारितप्रबन्धः ॥

No. 1377. NAḶACARITAPRABANDHA.

C. O. L. No. 241.

Substance — Paper. Size—13½" x 8½". Pages—37. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas — 370.

Owner—C. O.

Subject—The story of Naḷa.

Beginning:

श्रीमान् पुरा निषधनीवृति पुण्यकीर्त्तिः
कामोपमः कमलवैरिकुलावतंसः ।
सामादिवित्समयमतिः श्रितकामदायी
राजा बभूव विमलो नलनामधेयः ॥

विद्यास्वेष चतुर्दशस्वपि नयन् ह्यद्याश्वतस्रो दशाः
स्वाधीत्यादिकहेतुभिः स्वयमतः सम्पादयन् सुष्ठुधीः ।
द्वेधा तत्र चतुर्दशत्वमुदयं बिभ्रत्सदा भास्करं
जेतुं निश्चितधीरहो कविबुधाद्यासहिष्ण्यन्नभात् ॥

End:

अमृतमृदुपदाढ्यं बिभ्रदर्थे गुरुत्वं
यमकमयमनुप्रासोपमाद्यातिरम्यम् ।
बुधजनततिहृद्यं तेऽस्तु सारस्वतं तत्
तत्र खलु दयितायास्तत्कथाध्यायिनां च ॥

एवं दत्वा वरान् ताभ्यां ते तिरोदधुरग्रतः ।
सर्ववादित्रमुखरं दम्पती पुरमीयतुः ॥

Author:

Remarks—The transcript contains the story of Naḷa up to Damayantīsvayaṃvara.

---

॥ नलोपाख्यानम् ॥

No. 1378. NAḶOPĀKHYĀNAM
with Malayāḷam commentary.

C. O. L. No. 288.

Substance—Paper. Size—13" × 8¼". Pages—123. 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Owner—C. O.

Subject—Same as No. 1377.

Beginning :

... ... ... ... ...വണ്ണമുക്തനായിരുന്ന നളൻ പി ന്നെയും ചൊല്ലിയാൻ. ഏതാനുമൊരുപരോധം ചൊല്ലി യാൻ: പോകയിളയ്ക്കാമല്ലോ എന്നിട്ടു ചൊല്ലിയാൻ.

सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ।

സുരക്ഷിതാനി വേശ്മാനി കന്യകമാരുടെ ഭവനം യഥാ വൽ രക്ഷിക്കപ്പെട്ടിരിക്കുമല്ലോ. ദണ്ഡപാണികളായിരിക്കുന്ന സ്ഥവിരന്മാരുണ്ടല്ലോ കന്യാപുരത്തെ രക്ഷിപ്പാൻ. പ്രവേ ഷ്ടും കഥമുത്സഹേ അവിടെ എങ്ങനെ ഞാൻ ചെന്നകത്തു പൂകുന്നവാറ്.

प्रवेक्ष्यतीति तं शक्रः पुनरेवाभ्यभाषत ।

അപ്പോൾ ദേവേന്ദ്രൻ ഞങ്ങളുടെ അനുഗ്രഹംകൊണ്ടു ആരും കാണാതെ കന്യാപുരത്തിങ്കൽ ചെന്നകത്തു പൂകായിട്ടു വരും എന്നരുളിച്ചെയ്തു.

End :

चत्वार एकतो वेदाः साङ्गोपाङ्गास्सविस्तराः ।
स्वधीता मानवश्रेष्ठ ! सत्यमेकं किलैकतः ॥

സത്യകഥനം പെരികെ പ്രധാനമെന്നോ ഭവാനറിഞ്ഞതല്ലോ ഇരിക്കുന്നു. ബ്രഹ്മൻ പണ്ടുതന്നെ മനസ്സാകുന്ന തുലാസ്സിലിട്ടു തൂക്കീട്ടു അവ്വണ്ണമല്ലോ കല്പിച്ചു. ചത്വാര ഏകതോ വേദാഃ ബ്രഹ്മനാൽ തന്റെ മനസ്സാകുന്ന തുലാസ്സിന്റെ ഒരു ഭാഗത്തു നാലു വേദങ്ങളും നിഹിതങ്ങളായി. സാംഗോപാംഗാഃ അംഗ ങ്ങൾ ശിക്ഷാദികൾ ഉപാംഗങ്ങൾ മീമാംസാദികൾ അവ

ററൊട്ടുകൂടിയിരുന്നൊ ചിലവ വേദങ്ങൾ. സവിസ്തരാ: ഇതി-
ഹാസപുരാണങ്ങളോട്ടുകൂടിയിരുന്നൊ ചിലവ. സ്വധീതാഃ
സ്വധീതങ്ങളായിരുന്നൊ ചിലവ. എന്ന വേദാധ്യയനംകൊ
ണ്ടും വേദാൎത്ഥജ്ഞാനംകൊണ്ടും വേദോക്തങ്ങളായിരിക്കുന്ന
കൎമ്മങ്ങളെച്ചെയ്തുകൊണ്ടും യാതൊരു ഫലമുള്ളതു് അതും
അവിടെത്തന്നെ നിഹിതമായി. ഇങ്ങനെ ബ്രഹ്മൻ തന്റെ
മഹസ്സാകുന്ന തുലാസിന്റെ ഒരു തട്ടിൽ ഇങ്ങനെയെല്ലാമിരി
ക്കുന്ന വേദങ്ങളെ വച്ചു. ഏകതഃ സത്യം ഒരു ഭാഗത്തെത്തട്ടിൽ
സത്യത്തേയും വച്ചു. ഇങ്ങനെ വേദങ്ങളേയും സത്യത്തേയും
കൂടെത്തൂക്കിക്കണ്ടു. സത്യമേകം കില അവിടെ സത്യംപോൽ.
ഏകമായതു് പ്രധാനമായതു ഏററവും തൂങ്ങി ... ... ...
... ... ... ... ... ... ...

Colophon:

इति नलोपाख्याने एकादशोऽध्यायः ।

Author:

Remarks—The work commences with a portion of the 3rd Adhyāya and ends with that of the 11th.

---

## ॥ नारदमोहनप्रबन्धः ॥

## No. 1379. NĀRADAMOHANAPRABANDHA.

C. O. L. No. 245.

Substance—Paper. Size — 14″ × 9″. Pages — 16.

16 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—125.

Owner—C. O.

Subject—The story relating to Nārada's test of Śrī Kṛṣṇa's household life.

Beginning:

श्रीकृष्णं बहुदारमीक्षितुमनाः श्रीनारदस्त्वेकदा
प्राप्य द्वारवतीं निरीक्ष्य महिते भैमीगृहे तं पुनः ।
भामागेहगतं विलोक्य च ततो गत्वा ददर्शाखिलै-
र्वृष्णीन्द्रैः सह कार्यचिन्तनरतं भान्तं सभान्ते हरिम् ॥

ततोऽन्यभार्यानिलयेषु चासौ
तत्तत्प्रवृत्तिं प्रसमीक्ष्य कृष्णम् ।
दृष्टोऽधुना तत्र हरिः कथं द्रा-
गत्रागतश्चित्रमिति व्यचिन्ति ॥

(ग)—ततश्च तत्परीक्षाकांक्षी स खलु वारि कांक्षी विविधमणिकृतविश्वोत्कृष्टरामणीयकं विश्वकर्मनिरतिशयकरचातुरीनिकषोपलरीतिमूरीकुर्वाणं रुग्मिणीभवनं प्रविश्य तत्र च मौलीकृतकालमेघपालीलालित्याभिमानकान्तिसन्दोहनिकुरुम्बितदिशाकदम्बकं भास्वरतरपराध्यर्मणिगणघटितमकुटकटककटिसूत्रादिमण्डनप्रकाण्डमण्डनायमानसमस्तावयं कुन्दधवळिममन्दत्वावहललितहसितकन्दलीमिलितैः पुरुदयामृतोक्षितैरीक्षितैः शिशिरीकृतभक्तलोकहृदयं प्रद्युम्नादिभिरात्मनोऽनुहरमाणैरात्मजैः सह विहरमाणं अनितरसाधारणनिखिलगुणगणधामानं दामोदरमामोदभराकुलमतिरालोकयति स्म ।

End :

गायं गायं तदनु स मुनिर्नामधेयानि शौरेः
स्मारं स्मारं सजलजलदश्यामळं कोमळाङ्गम् ।
वादं वादं भवभयहरं तस्य चित्रं चरित्रं
लाभं लाभं प्रमदममितं विष्टपे सञ्चचार ॥

Colophon :

श्रीकृष्णाय नमः । नारदमोहनप्रबन्धः ।

Author :

Remarks—The work is a combination of prose and poetry. The main subject is borrowed from the 10th Skandha of the Bhāgavata. A faithful imitation of Melputtūr Bhaṭṭatiri's style is perceptible herein.

---

## ॥ पञ्चकल्याणकम् ॥

### No. 1380 A. PAÑCAKALYĀṆAKAM.

C. O. L. No. 572 A.

Substance—Paper. Size—11″ x 9″. Pages—50. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—500. Incomplete.

Owner—C. O.

Subject—Campu.

Beginning :

याचं द्राग्वदने स रङ्गसदने वल्गत्पदां वो मदा-
दाचन्द्रार्कमुदश्चदञ्चितरसां तन्याद्विभुः श्रीमतीम् ।
यो हारी रुचिहारिपुष्करकरो योग्यार्पितार्घ्यः पुरो
भास्वान् कर्मसु भामिनी भवति सा यस्य प्रभा वल्लभा ॥

वपुषि च वदने च स्पष्टपुन्नागभावं
कटभुवि वरदानद्योतमानं करे च ।
वशयदतिशयं स्वं पञ्चवक्त्रं विचित्रं
तदपि दिशतु शं वस्तादृशं वस्तु शस्तम् ॥

वासी स भातु धुरि वासनयानयाढ्यो
वक्त्रे करे च वरदानजया जयाय ।
आभाति नाशमुखतामपि यत्र याते
वैचित्र्यशालिनि विनायकताविलासः ॥

End :

इदं व्युत्पत्तिसोत्कण्ठाः कण्ठालङ्कारयन्तु मे ।
चम्पूरत्नं बुधा यत्नात् कल्याः कल्याणपञ्चकम् ॥

जम्भारिदेशिकजये जानितोपलम्भो
दंभारिसेवित(सु)दर्शनसारपारः ।
पुंभावगीर्जयति चित्रकविर्बुधानां
संभावनादिविषयस्स चिदंबरोऽयम् ॥

Colophon :

सूनोः कौशिकभूषणस्य मखिनः श्रीसूर्यनारायण-
क्षोणीन्दोरजनिष्ट कोविदमणेर्यो नन्दनारायणात् ।
यस्यार्थस्तवकश्चिदम्बरकवेः श्रीचम्पुरत्ने कृतौ
तस्यागात् प्रथमोन्तरस्ततपदश्रीः पञ्चकल्याणके ॥

Author—Cidambarakavi.

Remarks—Both at the beginning and end the magnificence of the work is set forth. Only one *Stabaka* is embodied herein.

---

॥ पञ्चकल्याणकव्याख्यानम् ॥

No. 1380 B. PAÑCAKALYĀṆAKAVYĀKHYĀNAM.

C. O. L. No. 572 B.

Substance — Paper. Size—11″ x 9″. Pages—12. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—120.

Owner—C. O.

Subject—A commentary on the Pañcakalyāṇaka.

Beginning :

लोकेशं लोकनीयाङ्गं नगेशनतपादुकम्
राकेशवदनं रामं साकेतसदनं भजे ॥

वरभीषणखरदूषणपरि(तो॑ऽद्रु)षणतरसं
करसङ्कुलशरभङ्गुरदशकन्धरशिरसम् ।
मनुनन्दनकुलमण्डनमधिमानसमहसं
रघुनन्दनमनुचिन्तय रविनन्दनसुहृदम् ॥

अम्भोजलोचनद्वन्द्व शम्भो चन्द्रकलाधर ।
शंभो दद महादेव रंभोरुगिरिजापते ॥

आख्यायते नन्वस्माभिर्व्याख्यानं विदुषां मुदे ।
शब्दशास्त्रविदां सान्द्रं शब्दशाणोपलाभिधम् ॥

* * * * * * *

इह खलु
काव्यं यशसेऽर्थकृते
व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये
कान्तासम्मिततयोपदेशयुजे ॥

इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्य श्रेयस्साधनत्वप्रतिपादनात् काव्यालापांश्च वर्जयेदिति निषेधस्याप्यसत्काव्यविषयत्वात् सत्कथापञ्चकप्रपञ्चप्रतिपादकं किञ्चन चम्पूरत्नमारभमाणस्तस्य प्रारिप्सितप्रकरणस्य प्रत्यर्थं प्रत्यूहप्रवासनकृते आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति वचनादाशीरचनामारभते—वाचमिति ।

वाचं द्रागु वदने स रङ्गसदने वल्गत्पदां वो मदा-
दाचन्द्रार्कमुदञ्चदञ्चितरसां तन्याद्विभुः श्रीमतीम् ।

यो हारी रुचिहारिपुष्कलकरो योग्यार्पितार्घ्यः पुरो
भास्वान् कर्मसु भामिनी भवति सा यस्य प्रभा वल्लभा ॥

स विभुः वः युष्माकं वदने रङ्गसदने रङ्गमण्डपे व्यस्तरूपकम् । उदञ्चन्तः आश्रिताः पूजिताः अञ्चेः पूजायामितीडागमः नाञ्चेः पूजायामिति नलोपप्रतिषेधः । रसाः शृङ्गारादिनवरसाः यस्यास्तां तथोक्तां श्रीमतीं वाचं वाणीमदात् सम्मदात् सन्तोषात् आचन्द्रार्कं द्राक् झटिति वल्गत्पदां वल्गन्ति उल्लोलन्ति पदानि वर्णकदम्बानि चरणन्यस्तानि च यस्यास्तां तथोक्तां तन्यात् विदध्यात् न(र्थ?र्तयात्वित्यर्थः ।

... ... ... ...

End :

नालीकाक्षः श्लाघनानर्मदश्री-
भालीकेळीप्रांशुकान्तद्विजेन्द्रः ।
शर्वो वा वस्सर्वभूतोदयात्मा
पर्वोद्युक्तः (स्यात्?) पद्मभूर्वा हरिर्वा ॥

अळीके निटिले अक्षि यस्य सः अळीकाक्षः बहुव्रीहौ सक्थ्यक्ष्णोरित्यादिना समासः । अळीकाक्षस्त्रिनेत्रः ना पुरुषः श्लाघनानर्मदश्रीः काळकूटं यस्य स तथोक्तः । भाल्या: नक्षत्रपरम्परायाः केल्या लीलया प्रांशुः उन्नतः कान्ते शिरोभागे द्विजेन्द्रश्चन्द्रः यस्य स तथोक्तः । सर्वभूतानां सकलप्रमथगणानां उदये...... आत्मा बुद्धिर्यस्य स तथोक्तः । शर्वो वा ईश्वरो वा वः पर्वसु उत्सवेषुविषये उत्सुकः स्यात् उत्सन्तोषः स्यात् । अन्यत्र अळीके अनृते अक्षि यस्य सः अळीकाक्षः स न भवतीति नाळीकाक्षः

नञर्थस्य नशब्दस्य सुप् सुपेति समासः । श्लाघना नर्मदा श्रीर्वाणी यस्य स तथोक्तः । भाल्याः कान्तिसमृद्ध्याः केल्याः प्रांशुः कान्तः मनोहरः द्विजेन्द्रः हंसः यस्य स तथोक्तः । सर्व-भूतानामुदयः उदयहेतुः सृष्टिहेतुः आत्मा यस्य स तथोक्तः । पद्म-भूर्वा अन्यत् समम् । अपरत्र नाळीकाक्षः पद्मलोचनः श्लाघना नर्मदा श्रीः लक्ष्मीर्यस्य स तथोक्तः भालिकलिप्रांशुः ।

Colophon :

Author :

Remarks—Only the first few stanzas are explained herein. The opening verses show that the commentary is designated Śabdaśāṇopala.

---

## ॥ सिद्धान्तशेखरम् ॥

### No. 1380 C. SIDDHĀNTAŚEKHARAM.

C. O. L. No. 572 C.

Substance — Paper. Size--11″ x 9″. Pages — 47. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—450.

Owner—C. O.

Subject—Astronomy.

Beginning :

उडुग्रहाणां भ्रमणं न तुल्यं
सर्वत्र भूगोळनिवासिनां हि ।

तत्त्वबोधावगतिस्तु गोळा-
दतः स्फुटं गोळमिहाभिधास्ये ॥

यद्वदिन्दुरहिता न शर्वरी
भाति शीलरहिता न चाङ्गना ।
ब्राह्मणश्च न चरित्रवर्जित-
स्तद्वदेव गणको ह्यगोळवित् ॥

अविदितपदलक्ष्यो वावदूको वियात-
श्चतुरबुधसभायां यद्व(दा)याति हास्यम् ।
ग्रह(ग)णितविदेवं गोळतत्त्वानभिज्ञो
गण(क)सदसि विच्छुकत्व(?)क्रान्तिहीनः ॥

अविदितगणितो न वेत्ति गोळं
ग्रहगतिमेव न वेत्त्यगोळवेत्ता ।
य इह गणितगोळयोरवेत्ता
स कथमवैत्यबुधो गतिं ग्रहाणाम् ॥

End :

प्रतिकञ्चुककृत्कृतघ्नाविद्वत्-
पतिताधार्मिकमूर्खदुर्जनेभ्यः ।
इह तन्त्ररहस्यमप्रमेयं
यदि तत् स्यात्सुकृतायुषोर्विनाशः ॥

भक्ताय शिष्याय चिरोपिताय
गुणोपपन्नाय च देयमेतत् ।

आत्रे च मित्राय (च) सूनवे च
सुदुर्लभं स्यादिह गोळतत्त्वम् ॥

Colophon :

पूर्वं प्रणीतकृततन्त्रसदुक्तियुक्ति-
मुक्ताफलैः क्रमनिवेशनभङ्गधीरः ।
श्रीश्रीपतिर्गणकचक्रविभूषणाय
सिद्धान्तशेखरममुं ग्रथयाञ्चकार ॥

इति श्रीमत्श्रीपतिविरचिते सिद्धान्तशेखरे गोळकप्रश्नविधिर्विंशोऽध्यायः ।

Author—Śrīpati.

Remarks--This is an important astronomical treatise. Chapters 18—20 of the Siddhāntaśekhara are alone embodied herein. Some verses lack metrical perfection.

---

॥ प्रह्लादचरितम् ॥

No. 1381 A. PRAHLĀDACARITAM.

C. O. L. No. 262 A.

Substance — Paper. Size—11" × 8¾". Pages—4. 18 lines per page and 18 letters per line. Script — Malayāḷam. No. of Granthas — 45. Complete.

Owner—C. O.

Subject—The story of Prahlāda.

Beginning :

ततोऽस्य प्रह्लादः समजनि सुतो गर्भवसतौ
मुनेर्वीणापाणेरधिगतमहद्भक्तिमहिमा ।
स वै जात्या दैत्यः शिशुरपि समेत्याच्युतरतिं
गतस्तद्भक्तानां सपदि परमोदाहरणताम् ॥

सुरारीणां हास्यं रिपुचरणदास्यं निजसुते
स दृष्ट्वा दुष्टात्मा गुरुभिरशिशिक्षच्चिरममुम् ।
गुरुप्रोक्तं चासाविदमिदमभद्राय दृढमि-
त्यपाकुर्वन् सर्वं हरिचरणभक्त्यैव ववृधे ॥

अधीतेषु श्रेष्ठं किमिति परिपृष्टे स तनये
हरौ भक्तिं वर्यामभिगदति पर्याकुलधृतिः ।
गुरुभ्यो रोपित्वा सहजमतिरस्येत्यभिविदन्
वधोपायानस्मिन् व्यतनुत हृषीकेशचरणे ।

स शूलैराविद्धः सुबहु मथितो दिग्गजगणै-
(र्म)हासर्पै(र्दृ)(र्द)ष्टोऽप्यनशनगराहारविधुतः ।
गिरीन्द्रावक्षिप्तो हहह परमात्मन्यपि हरौ
दृढं न्यस्तात्मत्वात्किमपि न निपीडामभजताम् ॥

ആൎത്തി പൂണ്ടഥ പിതാ........വരജവൃത്തിഭംഗപ-

............രോരപകാരകൌശലമജസ്രമൊത്തു മരുവുംവിധൌ

ഷീൎത്ത നീതിനിപുണാൻ ഗുരുക്തനിജപുത്രവാൎത്ത പരി-

ചോട്ടകേ-

ട്ടത്തലാന്നിനിജപുത്രകം ന്യതുണദഞ്ജസാ സവരുണായുധൈഃ

ധന്യശീലനഥ പിന്നെയും മററിതഭക്തിപൂണ്ടു പരമാത്മനി

ഷിന്നതാംപമരികത്തുനിന്ന ഗുരുഭ്രതനാശ്രു പിരിയുംവിധൌ

ഝരന്നമേവ നിജതത്ത്വബോധമനുഗാനഹോ ദനുജബാലകാൻ

അനാശാസയദഹന്നിശം നിയതമന്യബോധമുപസംഹരൻ!

End :

तावन्मांसवसाकरालवपुपं घोरान्त्रमालाधरं
तन्मध्येसभमिद्धकोपमपिकं दुर्वारगुर्वारवम् ।
अभ्येतुं न शशाक कोऽपि भुवने दूरे स्थिता भीरवः
सर्वे शर्वविरिञ्चिवासवमुखाः प्रत्येकमस्तोषत ॥

भूयोऽप्यक्षयरोषधामानि हरौ ब्रह्माज्ञया तत्सुते
प्रह्लादे पदयोर्नमत्यपभये कारुण्यभाराकुलः ।
शान्तोऽसौ करमस्य मूर्ध्नि समधात् स्तोत्रैरथोद्गायत-
स्तस्याकामधियोऽतनोदथ वरं लोकाय चानुग्रहम् ॥

Colophon :

प्रह्लादचरितं चम्पु समाप्तम् ।

Author :

Remarks :

---

॥ दक्षयागप्रबन्धः ॥

No. 1381 B. DAKṢAYĀGAPRABANDHA.

C. O. L. No. 262 B.

Substance—Paper. Size—11″ × 8¾″. Pages — 20. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—225. Complete.

Owner—C. O.

Subject—Details of the 'sacrifice' performed by Dakṣa.

Beginning—Same as No. 1635, DCSMMPL.

Author :

Remarks :

---

॥ कृष्णसाह्यापेक्षा ॥

No. 1381 C. KṚṢṆASĀHYĀPEKṢĀ.

C. O. L. No. 262 C.

Substance — Paper. Size—11″ × 8¾″. Pages—3. 20 lines per page and 19 letters per line. Script—Malayāḷam. No. of Granthas—35.

Owner—C. O.

Subject—The message of Duryodhana and Arjuna to Kṛṣṇa for His alliance in the battle.

Beginning :

नीतिज्ञो मधुरोक्तिभिः शमयितुं विद्वेपिणामुग्रमं
पाश्चालः स्वपुरोहितं प्रहितवान् वेगेन नागाह्वयम् ।
पूर्वामन्त्रणकर्मणा वशयितुं साधारणान् भूपतीन्
मात्स्येन्द्रोऽपि दिशासु दूतनिवहान् पार्थानुमत्या जवात् ॥

प्रोत्सारिता दूतवनैर्भ्रमद्भिः
प्रत्याशमुद्दीर्णनिदेशतोयैः ।
उच्चेलुरुर्वीपतयस्तमाप्तं
सरित्प्रवाहा इव वारिराशिम् ॥

कर्णाटानर्तवङ्गद्रमिलनिपधकाम्बोजसौवीरभोजा-
न्ध्रारट्टावन्तिकुन्त्यश्मकमगधकलिङ्गाङ्गपुण्ड्राधिनाथाः ।
अन्ये च क्षोणिपालाः क्षपितरिपुबला मूर्धभि—रनग्रै-
राज्ञां राज्ञां गृहीत्वा समदमुदचलन्नुत्सुका युद्धकेल्याम् ॥

पार्थस्य विज्ञाय चरैः प्रवृत्तिं विसृज्य राजन्यगणाय दूतान् ।
अर्थी स्वयं द्वारवतीमगच्छत् सुयोधनः सोऽपि सुतो मघोनः ॥

ततश्च तास्मिन् द्वारभुवि निवेशितबले दूरापसृतपौरजनकोरकि-
तकरारविन्ददन्तुरितोभयपार्श्वेन मार्गेण समतीत्य कस्यवृन्दाऽक्ष्या-
न्तराणि क(टि?लि)तकपटस्वापस्यास्य कुहनामानुषस्य भगवतो
वासुदेवस्य वासभवनं प्रविश्य तत्र ... गनिहितमहितभद्रसिंहासन-
मध्यमध्यासीने मानधने सुयोधने त्वरितमुपगम्य धनञ्जयोऽपि तस्य
वैकुण्ठस्य चरणोपकण्ठे कुण्ठेतरधियां वरिष्ठः तिष्ठन्नेव प्रभोः
प्रबोधसमयं प्रतिपालयामास ॥

End :

इति वादिनं मधुभेदिनमेव वृतवति कृतधियामग्रेसरे फल्गुने समुदञ्चितनागकेतुः तद्बलं परिगृह्य उल्बणभुजबलोद्भटानां भटानां कृतवर्मयुक्तया समस्तभुवनविक्षोभिण्या अक्षौहिण्या सह स्वपुरमयासीत् ॥

निर्यातेऽथ सुयोधने निजकरेणाबद्ध्य सख्युः करं
प्रोन्मीलन्मृदुलस्मिताद्र्रतरया वाचा तमूचे हरिः ।
कार्यं किं पुनराकलय्य सहसा योधानबाधानिमा-
नाधून्वन्नमिताननस्त्वमयि मामेकं वृथैवावृथाः ॥

जानन्नेव किमद्य मोहयसि मां नाथ त्वदेवाश्रयं
किं देवैरपि सासुरैर्मम यदि प्रत्यर्थिपक्षे भवान् ।
कामो? स्याद्बहुरेक एव यदि वा शस्त्री विशस्त्रोऽथवा
जेतुं त्रीणि जगन्त्यपि प्रभुरहं सान्निध्यमात्रेण ते ॥

Colophon :

Author :

Remarks :

---

## ॥ पात्रचरितम् ॥

No. 1381 D. PATRACARITAM.

C. O. L. No. 262 D.

Substance — Paper. Size—11" × 8¾". Pages—2.

20 lines per page and 21 letters per line. Script—Malayaḷam. No. of Granthas—18.

Owner—C. O.

Subject—Durvasa's visit to the Pāṇḍavas in the forest on the instigation of Duryodhana.

Beginning :

कौन्तेयानवबुद्ध्यसिद्ध्यदशनोपायान् कुरूणां प्रभुः
श्रीदुर्वाससमेकदा कुटिलधीरामन्त्र्य नागाह्वये ।
शिष्याणामयुतेन सार्धमधिकप्राज्यैः स भोज्यादिभिः
पूज्यं तं समवीभवत्स च मुनिस्तुष्टोऽपरं पृष्टवान् ॥

धर्मात्मा ननु धर्मजः कुलपतिः सोऽस्माकमास्ते वने
तस्याप्येवमनुग्रहार्थमुटजं यायात् कुलश्रेयसे ।
एतावानधुना यतीश्वरवरः किं त्वत्र खेदासहा
पाञ्चाली क्षुधया न सीदतु तया भुक्ते ततो गम्यताम् ॥

इत्थं पार्थिवकेतुनार्थितवरः शिष्यैः समेतो मुनि-
र्दिव्यज्ञानविलोकितद्रुपदजाभुक्तिः स म(द्ध?ध्य)न्दिने ।
अष्टाशीतिसहस्र...स्वजनश्लिष्टान्तिकं धर्मजं
प्रापत्सोऽपि च तं ननाम मघवा साक्षादिव त्रीक्षणम् ॥

End :

प्रोक्तो वार्तां धृतार्त्या बत नृपसुतया क्षुध्यते लब्धमन्नं
मह्यं देहीति शासन्नधिकविवशया प्रोक्तसर्वान्नहानि ।
स्था(नी?ली)लग्नशशाकप्रतिकिलसमपानाय्य(?) विश्वैकमूर्ति-
र्भुक्त्वा तृप्तोऽस्मि सोऽहं सति सपदि मुनीनाह्वयेत्यादिदेश ॥

तावद्वेगागतास्ते नृवर शिवशिवार्णोगताः पूर्णपूर्णा-
स्तूर्णं तीर्णक्षुधो (मे?ये) वयमयि जय जीवेति तोपोत्थघोषाः ।
योगीन्द्रा व्यर्थपाकोदयचकितधियः प्रद्रुतं विद्रुतास्ते
वृ(ष्णे?ष्णी)शोऽथ प्रकाशो नृपतिमपि भृशं प्रीणयित्वा तिरोऽ
[भूत ॥

Colophon :

Author :

Remarks—This transcript begins on the portion dealing with Pāñcali's procurement of the Akṣayapātra from the Sun.

---

## ॥ श्रीरामविलापः ॥

### No. 1381 E. ŚRĪRĀMAVILĀPA.

C. O. L. No. 262 E.

Substance — Paper. Size—11″ × 8¾″. Pages—2. 18 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—13.

Owner—C. O.

Subject—Description of Rāma's grief consequent on the separation of Sītā.

Beginning :

तौ राघवौ तत्र तदा विमुक्तौ
मारीचमायाशकटानुबन्धात् ।

आरूढतापौ पुनरूढचापौ
वीरौ निजं प्रापतुराश्रमान्तम् ॥

पर्णशालात्रिकोणेषु पश्यन्मनुकुलोत्तमः ।
अभावभीत्या वैदेह्या नान्यत्कोणमवैक्षत ॥

हा कष्टमत्र नहि सा किमिदं प्रवृत्त-
मालोकयामि चटुलामिह पादमुद्राम् ।
मां वीक्ष्य नूनमगृहीतमृगं मुहूर्त-
मन्तर्हिता...रोषवतीव सीता ॥

End :

इत्थं विलप्य दयितां विपिने विचिन्वन्
रामो न तत्र ध......क्ष्मणश्च ।
तादृग्विधामपि कथां कथयन् स्ववाचा
वल्मीक.......................... ।

......സഖി കുസുമലതേ മല്ലികേ ജാതിമുല്ലേ
നീയുണ്ടോ ചൂതമേ കണ്ടിതു വകുളതവ........കനിഞ്ഞ്-
മാഗയാനാം
നീയുണ്ടോ നൽതമാലദ്രുമകുരവകപുന്നാമമേ കണ്ടിതയ്യോ
ജായാം മേ ജാതു യുഷ്മജ്ജനനി......വിപിനേ ജാനകീം
ദീനദീനാം.

Colophon :

Author :

Remarks :

———

## ॥ बकवधः ॥

## No. 1381 F. BAKAVADHA.

C. O. L. No. 262 F.

Substance—Paper. Size—11″ × 8¾″. Pages — 2. 21 lines per page and 15 letters per line. Script—Malayāḻam. No. of Granthas—20.

Owner—C. O.

Subject—The story of the killing of Bakāsura by Bhīmasena.

Beginning :

പൃഥ്വീദേവേന്ദ്രപൂണ്ണേ വരസദസി ഭവാനോട്ട
ചേന്നോരുനേരം
എത്തീട്ടന്നോരുകൌതൂഹലസരണികളെന്തോഴ വാഴ്ത്തീട-
വല്ലേൻ
ഹതാ ഘോരം ബകാഖ്യം നിശിചരമരികേ വന്നു ക്ലൃപ്തം
നഭസാത്
പുത്രം തദ്ഭ്രാതരം കണ്ടളവിലിനധർമ്മാത്മജന്നെന്നപോലെ ഫ

മാതൃവാചമഖിലം നിശമ്യ പദതാരിൽ വീണിഹ നമസ്ക്കരി-
ച്ചാദരേണ നിജസോദരം ച സമുദം പ്രണമ്യ ശമനാത്മജം
യാതുധാനപതിമേഷകൊൽവതിനഹോ വൃകോദരനുദാരധീ
രോദനാഞ്ചിതമനാവിരഞ്ഞുസഹസാ യയാവഹിതകാനനം. ഫ

കങ്കജംബൂകകടംബകാകുലൈരാചിതം നരകരംകരാശിഭിഃ
ഝില്ലികാമുഖരസാലമാസദത്പൂതിഗന്ധിപുരുഷാദകാനനം ന

End :

द्वन्द्वयुद्धरभसश्रमालसं
तं प्रगृह्य चरणे निशाचरम् ।

व्योमनि भ्रमणवेगविह्वलं
वायुसूनुरवनाववपातयत् ॥

हत्वा बकासुरममुष्य शवाङ्गमुच्चै-
रुत्तुङ्गसालविटपे विनिधाय मानी ।
सुस्नात एष समुपेत्य गृहं द्विजाते-
र्भक्त्या युधिष्ठिरपदाम्बुरुहे ननाम ॥

Colophon :

Author :

Remarks :

---

## ॥ मत्स्यावतारचम्पूः ॥

No. 1381 G. MATSYĀVATĀRACAMPŪ.

C. O. L. No. 262 G.

Substance — Paper. Size—11″ × 8¾″. Pages—16. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—180.

Owner—C. O.

Subject—The story of the divine incarnation as *Matsya*.

Beginning :

किं मत्स्याकृतिमश्रितोऽसि दयिते त्वन्नेत्रमैत्रीरसात्
किं ते तोयगतिः सुखाय भवती तत्सम्भवेत्यादरः ।

शोच्या नन्वनिमेषता तव कथं त्वां पश्यतो नो भवे-
दित्थं सल्लपितं मुकुन्दरमयोर्मुग्धं शिवायास्तु वः ॥

निगमहरणगर्वाध्मातदुर्वारदैत्य-
क्षपणनिपुणघोरप्रक्रमं चक्रपाणेः ।
वपुरधिकविशालव्यायतं त्रायतां तत्
प्रलयजलधिलीलाश्रीभरं शाफरं वः ॥

पुरा विश्वप्लाविन्युपनमति कल्पान्तसमये
पुरस्तादुत्तिष्ठन्नपर इव संवर्तसमयः ।
घनध्वानो(द)ग्रस्त्रिभुवनविनाशं प्रकटयन्
हयग्रीवो नाम त्रिदशकुलवैरी समुदभूत् ॥

स खलु समरधरणीषु परिमथितसकलसुरमहिमा निजतेजसा दहनस्यापि दाहदायी तपनस्यापि तापहेतुः शतमन्युमपि गतमन्युमादधानः दण्डधरेऽपि दण्डमर्पयन् पाशिनमप्यपाशतामुपनयन् प्रभञ्जनस्यापि भञ्जनं सञ्जनयन् भूयस्तरवैरभारेण सुरशब्दमप्यसहमान इव पृथ्वीसुरानप्यपरिमर्दयन्(?)अध्वराणामनवभृथमपि समाप्तिसमयमुत्पादयन् अध्ययनेष्वपि निजगर्जितैरकाण्डमनध्यायमुत्थापयन् पुनरपि चैकप्रयत्नेन सकलधर्मपथनिर्मूलनकर्मण्युपायमालोच्य निखिलमूलभूतनिगमकुलापहरणमेव साधुतरं मन्यमानः कदाचन सञ्चरिष्णुर्विष्णुपदेन ब्रह्मणः पदमुपरन्(?)

End :

सत्यव्रतोऽपि च तथा भुवनप्रकम्पे
चित्रं निधाय सुदृढं पुरुषे पुराणे ।

अत्यम्बुसीमनि परिप्लवते स्म यावत्
सप्तर्षिमण्डलमदृश्यत तावदारात् ॥

तानपि मुनीननारतघनाघनवर्षणवशेन गगनपृष्ठादवभ्रष्टानिव सलिले दृष्ट्वा किमपि कृतार्थीकृतोऽपि सत्यव्रतोऽयमनालम्ब-महाम्बुपूरे तैरेकमाकम्पितमतिः सम्प्लवमानो जलप्रकरपरिप्लवन-परिग्लपितभुजबलः समुल्लोलकल्लोलजालसमास्फालननिरुच्छ्वासी-कृतवदनवृथाविधव(?)दनकपटशफराधिपवचसि विश्वस्तचेतोऽवि-श्वस्थितिहेतुं तमेव भगवन्तं करुणाभरणं शरणं ययौ ॥

Colophon :

Author :

Remarks—The transcript extends up to the portion describing Satyavrata's visit to Bhagavān.

---

## ॥ स्वाहासुधाकरः ॥

No. 1381 H. SVĀHĀSUDHĀKARA.

C. O. L. No. 262 H.

Substance — Paper. Size—11″ × 8¾″. Pages—6. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—65.

Owner—C. O.

Subject—The story of love between Svāhā and Sudhākara.

Beginning etc.—Same as No. 1662, DCSMMPL.

Author—Devanārāyaṇa.

Remarks:

---

## ॥ अहल्यामोक्षः ॥

## No. 1381 I. AHALYĀMOKṢA.

C. O. L. No. 262 I.

Substance—Paper. Size—11″ × 8¾″. Pages—13. 20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—155.

Owner—C. O.

Subject—Same as No. 1375 H.

Beginning:

अस्ति किल जगत्त्रयपरित्राणविचक्षणा(ना)मक्षतभुजद्रविणभूषणानामुज्ज्वलयशःप्रकरचन्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनस्कारकैरवाकराणाममेयमहिमाद्भुतानामहिमांशुवंशोद्भवानामवनीश्वराणां शाश्वतं निवासस्थानमनेकविधमणिकिरणजालनिर्व्यूढवलभासनसहस्रभास्वरमहाभवनशिखरविराजमानमहारजतकुम्भसङ्घातसङ्कटस्खलनजर्जरितखुरपुटघोटकवृन्दमन्दायमानमध्यन्दिनसमयसञ्चारदिवाकरम् आसन्नवाहिन्या च विबुधविलासिनीविहारविलब्धविलोचनामोदवासिताया कमलप्रमोदसम्पादिन्या च तटिन्या सरय्वा परिशोभमानपरिसरमवनिवनितातिलकायमानं पुरोत्तममयोध्या नाम। तत्र च त्रिदशराजनगरसुन्दरीवृन्दवन्दी-

करणचणवृन्दारकवैरिवृन्दारकगलदविरलरुधिरच्छटालङ्कोक्षयकक्ष-
विपक्षराजमनोरथो दशरथो नाम नरपतिरराजत ।

End—Same as No. 1622 D, DCSMMPL.

Colophon :

अहल्यामोक्षं समाप्तम् ।

Author :

Remarks :

---

## ॥ कैलासवर्णनम् ॥

## No. 1381 J. KAILĀSAVARṆANAM.

C. O. L. No. 262 J.

Substance — Paper. Size—11″ × $8\frac{3}{4}$″. Pages—3. 20 lines per page and 20 letters per line. Script—Malayaḷam. No. of Granthas—40.

Owner—C. O.

Subject—Description of Mount Kailāsa.

Beginning :

अथ विमतजनविलासिनीनयनवारिनिर्झरप्रवर्धनकलाकौशल-
धुरीणदोर्दण्डचाण्डिमा स पाण्डुसूनुरारादेव दूरतरविसारिणीभिर्ना-
रायणभुजाबलविफलमानमन्दरमहीधरान्दोलितकलशाम्बुराशिकल्लो-
लमालापरम्परोन्मदुति(?)ष्फतरफेनकूटपाण्डित्यपाटच्चरद्युतिभिरु-

ल्कलताण्डवाडम्बरप्रसृमरप्रमोदत्रिपुरहरवदनसरसिजोदित्वरमहाट्ट-
हासद्युतिभिरिव सहचारिणीभिरविरतसन्निहित .शुपतिमकुटतटशशा-
ङ्कलेखासौहृदय्यसमापतितसकललोककैरवाकरकान्तिकदम्बकाविड -
म्बिनीभिः प्रभामण्डलीभिरपिहितापरवर्णाधिकरणधावल्याद्वैत-
विद्यासिद्धान्तमध्यापयन्तमाशाविभागानन्तरिक्षपरिमाणजिघृक्षयेव
स्वीकृतनिरातिशयौन्नत्यपरिणाहैरतिवेलनैर्मल्ययोगादविभाव्यमान-
रूपैः स्वेच्छानुरूपसञ्चाररसिकादिविजाविमानसरभससङ्घट्टनसाध्व-
सध्वस्तमानमानिनीस्वयंग्रहसुखायमानवैमानिकाभिनन्द्यमानैरपेत-
सङ्ख्यैः शिखरैरुल्लिकतोऽस्वर्णकटाहमुमरनगरतरङ्गिणीतुङ्गतरतर-
ङ्गभङ्गशीकरभारिवालसमीरणसञ्चरणसुभगयता(?)भवनविहरणमा-
णासुरचारणकिन्नरसीमन्तिनीवदनसरसिजनिर्गच्छदच्छिन्नभवदपदा-
नगर्भनिर्भरमनोहरसङ्गीताकर्णनसमुत्सुकस्तिमितोत्कर्णकुरङ्गयूथम् ।

End—Same as No. 1622 A, DCSMMPL.

Author :

Remarks—The story recounted herein deals with Arjuna's penance.

———

## ॥ बालरामविजयचम्पूः ॥

## No. 1382. BALARAMAVIJAYACAMPŪ.

C. O. L. No. 1246.

Substance—Palm leaf. Size—10″ × 2″. Leaves—57.

7—9 lines per page and 57 letters per line. Script—Malayāḷam. No. of Granthas—925.

Owner — Pāzhūrmanakal Viṣṇutrātan Śaṅkaran Nambūri Avl., Mūvāttupuzha.

Subject—An account of Balarāma's success over his enemies.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

श्रीरामवर्मप्रभवे नमः ।

श्रीमाननादिरतिबन्धुरसिन्धुरास्यः
पायादपायतरुभञ्जनशौण्डशुण्डः ।
गण्डोद्गलन्मदधुनीतरळोर्मिजालै-
र्धीरोऽन्तरायपुळिनं शमयन् द्रुतेन ॥

अपि च,

मन्दाकिनीरसमरन्दविभूषितं ते
पादारविन्दमयि पार्वति नूपुरेण ।
संभूपितं विहर कालदशा विशङ्क-
मित्यालिवाक्यहसिता ललिताव्रताद्वः ॥

अपि च,

जयविजयदशास्यकुम्भकर्ण-
प्रमुखसुरारिजयात्सुरैः स्तुतो यः ।

वितरतु नितरां श्रियं कविभ्यो
जनकसुतापतिरद्य वीरराम: ॥

यदीयवाग्वैभवलाभलोभा-
त्पठन्ति शास्त्राण्यधुनापि सन्त: ।
पातञ्जलोक्त्या परिपूतकीर्तीन्
श्रीरामभद्राख्यमखीन् गुरून् न: ॥

End :

अपूजयच्च विबुधान् यौवराज्यागतानपि ।
मान्त्रिणो यूथपालांश्च सामन्तांश्च यथाक्रमम् ॥

धनैराभरणै: क्षौमैरायुधैरपि चोत्तमै: ।
प्रीणयित्वा मुदा सर्वानभजत्प्रीतिमुत्तमाम् ॥

तदनन्तरं समवाप्तस(कल)मनोरथ: समरक्षतविपक्षयूथ: संभावितसकलविबुधनाथ: वन्दिवृन्दसंस्तूयमानस्वपक्ष: संपूजितकमलाक्ष: समाराधितविरूपाक्ष: सकललोकनिपुणप्रेक्ष: ॥

संलब्धसमस्तकल्याणनिदानभूतजगदम्बिकामूकाम्बिकाकरुणाकटाक्ष: समस्तजनतारक्षणदक्ष: सन्त्यक्तखलकुलपक्ष: बिम्बलक्ष्मा सहस्राक्ष:

श्रीमान्बालराम: सुखेन सर्वामपि मेदिनीं सर्वानपि विबुधान्सर्वानपि बन्धून् सर्वानपि कवीन्द्रान् रञ्जयित्वा राजते विजयते च ।

आचन्द्रमातारकमस्तु भूमिः
श्रीबालरामेन्द्रमनोभिरामा ।
श्रीरामभद्राङ्घ्रिसरोजभक्तो
मूकाम्बिकावीक्षणरक्षितश्रीः ॥

Colophon :

इति श्रीसीतारामकविविरचिते श्रीबालरामविजयचम्पुकाव्ये द्वितीयः स्तवकः ॥

Author—Sītārāmakavi.

Remarks—The Ms. contains only two *stabakas.*

---

॥ बृहत्कथासारः ॥

No. 1383. BṚHATKATHĀSĀRA.

C. O. L. No. 104.

Substance—Paper. Size—14″ × 8″. Pages — 56. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—500.

Owner—C. O.

Subject—The story of Udayana.

Beginning :

श्री

अस्ति स्वस्तिकरी समस्तजगतामस्तारिविस्तारिका
सालस्तम्भिततारकासरणिमत्प्रासादलम्बाम्बुदा ।

कौबेरीव महर्द्धिका शशिकुलक्षोणीभृतामास्पदं
कौशाम्बीति पुरा कुशाम्बरचिता कौशाम्बपूरा पुरी ॥

पार्थो नामेन्दुवंश्यादजनि जितरिपुः पाण्डुतः सप्तमोऽस्मात्
कौशाम्बीशो निचक्रः कुरुकुलवृषभो वृष्णिमांस्तस्य नप्ता ।
क्ष्मारक्षी क्षेमकोऽभूत्तदुपरि दशमस्तत्सुतापत्यपुत्रा-
दन्योऽत्रान्यङ्कलक्ष्मीरभवदथ शतानीकनामा नरेन्द्रः ॥

सम्पूर्णां रथहयसादिवृन्दैः सम्मोदं जनमनसां समेधयन्ती ।
वत्सानामधिपतिरात्मकीर्त्तिरम्यां कौशाम्बीममरसमः पुरीं शशास ॥

महीपालस्य तस्यासीन्महिषी मृगयावती ।
महेन्द्रस्येव पौलोमी महेळानां शिखामणिः ॥

सन्ततं सन्ततेर्वृद्धिं चिन्तयन्तं महीपतिम् ।
सन्तर्पयन्ती भर्तारमन्तर्वत्नी बभूव सा ॥

End:

पद्मावती बहुमता यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया ।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता ॥

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा यद्विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम् ॥

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि ।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥
इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥

गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके ज्ञातारस्तु सुदुर्लभाः ॥

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः ।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिम(हतामिव चिन्तयामि) ॥

Colophon :

Author :

Remarks—The verses occurring at the end are borrowed from the Svapnavāsavadatta etc.

---

## ॥ बृहत्कथासारः ॥

No. 1384. BṚHATKATHĀSĀRA.

C. O. L. No. 2322.

Substance—Palm leaf. Size—20″ × 2″. Leaves—134.

9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—5600.

Owner—Agni Śarman Bhaṭṭatiri Avl., Tiruvalla.

Subject—A compendium of stories.

Beginning:

उमाप्रणामसंक्रान्तचरणालक्तकः शशी ।
सन्ध्यारुण इवाभाति यस्य पायात् स वः शिवः ॥

सरस्वतीविभ्रमदर्पणानां
सूक्तामृतक्षीरमहोदधीनाम् ।
सन्मानसोल्लासि सुधाकराणां
कवीश्वराणां जयति प्रकर्षः ॥

दोषालोकननिपुणाः
परुषगिरो दुर्जनाश्च वक्राश्च ।
दर्शनमपि भयजननं
येषामनिमित्तपिशुनानाम् ॥

... ... ... ...

एवं किल पुराणेषु सर्वागमविधायिषु ।
विश्वशासनशालिन्यां श्रुतौ च श्रूयते यथा ॥

अस्ति विद्याधरवधूविलासहसितद्युतिः ।
जाह्नवीनिर्झरोष्णीषशर्वाणीजनको गिरिः ॥

End :

सेयं हरमुखोद्गीर्णा कथानुग्रहकारिणी ।
पिशाचवाचि पतिता सञ्जाता विघ्नदायिनी ॥

ततः सुखनिषेव्यासौ कृतिः संस्कृतया गिरा ।
समां भुवमिवानीता ... श्रावपातिनी ॥

काश्मीरके गुणाधारः प्रकाशेन्द्राभिधोऽभवत् ।
मानार्थिसार्थसंकल्पपूरणे कल्पपादपः ॥

यस्य मेरोरिवोदारकल्याणापूर्णसंपदः ।
अवारितमभूद्गेहे भोज्यसत्रं द्विजन्मनाम् ॥

सूर्यग्रहे त्रिभिर्लक्षैर्दत्त्वा कृष्णाजिनत्रयम् ।
अल्पप्रदोऽसीत्यभवद् यो लज्जानतकन्धरः ॥

स्वयम्भुनिलये श्रीमान् यः प्रतिष्ठाप्य देवताः ।
दत्त्वा कोशचतुर्भागं देवद्विजमठादिषु ॥

पूजयित्वा स्वयं शम्भुं प्रसरद्बाष्पनिर्झरः ।
गाढं दोर्भ्यां समालिङ्ग्य यस्तत्रैव व्यपद्यत ॥

क्षेमेन्द्रनामा तनयस्तस्याभूत् तस्य पर्ययः
प्रयातः कविगोष्ठीषु नामग्रहणयोग्यताम् ॥

श्रुत्वाभिनवगुप्ताख्यो साहित्यं बोधवारिधेः ।
आचार्यशेखरमणेर्विद्याविधृतिकारिणः ॥

श्रीमद्भागवताचार्यः सोमपादाब्जरेणुभिः ।
धन्यतां यः परं यातो नारायणपरायणः ॥

कदाचिदेत्य विप्रेण स द्वादश्यामुपोषितः ।
प्रार्थिते रा...यशसा सरसस्वच्छचेतसा ॥

कथामेतामनध्यायदिनेषु विपुलेक्षणः ।
विदधे विबुधानन्दः सुधास्यन्दतरङ्गिणीम् ॥

Colophon :

इति बृहत्कथासारः समाप्तः ।
शतवनशंकरेणार्जितं बृहत्कथासारं समाप्तम् ।

Author—Kṣemendra.

Remarks—This work has been printed.

---

## ॥ भागवतचम्पूः ॥

### No. 1385. BHĀGAVATACAMPŪ.

C. O. L. No. 2374.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—64. 6—9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1325. Complete.

Owner—Kūttālakkāḍu Nampūripād Avl., Paḍutol. Pāzhūr Manakkal, Piravom Pakuty, Mūvāttupuzha.

Subject—The story of Lord Kṛṣṇa.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

हस्तिमस्तकमस्तोकं वस्तु स्वस्तिकृदस्तु नः ।
यत्तु प्रत्यूहविध्वस्तिं विधत्ते वस्तुतः स्तुतम् ॥

श्रीनारायणभट्टपादगुरुपादानां कृपानुग्रहः
श्रीकृष्णस्य कथां कथापयति यश्चम्पुप्रबन्धात्मिकाम् ।
रामो नाम स पाणिवादकुलजः पाणी शिरस्यर्पयन्
ब्रह्मभ्यः प्रणतिं करोति खलु वः सभ्यास्समभ्यागताः ॥

लक्ष्मीकान्तेन पूर्वं निजनिशितमहाचक्रधारातिथित्वं
नीता ये दैत्यवीरा न तु गतिमगमन् कर्मशेषानुबन्धात् ।
तेष्वेवोद्भूय कंसप्रभृतिषु महतां धर्ममुन्मूलयत्सु
क्रान्ता भारेण तेषां शरणमुपययौ वेधसं भूतधात्री ॥

तं च भगवन्तं पुलस्त्यपुलहप्रभृतिभिस्तपोधनप्रवरैरमरैश्च शतमुखप्रमुखैः समन्ततः समुपास्यमानमनवरतविकस्वरं कमलविष्टरमध्यासीनमाननचतुष्टयेनापि त्रयीमुच्चारयन्तमन्तरुन्मिषितसन्तोषप्रसरप्रसन्नमुखपङ्कजं पङ्कजासनं प्रणम्य सहजलज्जानुबन्धनमितकन्धरा विनयबन्धुरा वसुन्धरा देवी सबाष्पमन्थरमिदं विज्ञापयामास ।

अनादृत्य व्रीळां प्रलपति समाजेषु महता-
मशङ्कं यद्योषा तदिह खलु दोषाय महते ।
तथाप्युच्चैरार्तिर्मुखरयति मां दुस्सहतमा
विवेकः क ब्रह्मन् क च पुनरधीरा युवतयः ॥

End :

म्लेच्छानुच्छिद्य सद्यो बहुधननिचयं वाहयन् रासभोष्ट्रै-
गच्छन्नप्यच्युतस्तं मगधनृपमुदीक्ष्यैतमुज्झाञ्चकार ।
अत्रासोऽप्याशु सत्रासवदथ सबलो धावमानो महाद्रा-
वालीनस्तावदेनं द्रुतमनुगतवान्मागधोऽनीकिनीभिः ॥

प्रवर्षणं नाम महीध्रमुच्चकै-
रमुं समारुह्य निलीनयोस्तयोः ।
जरासुतस्तं परितो महानलं
प्रदीपयामास महान्ध इन्धनैः ॥

दग्धौ तौ मन्यमानोऽसौ मगधानामधीश्वरः ।
ससैनिको निजामेव नगरीं प्रतियातवान् ॥

प्रायोऽस्माद्दशयोजनोन्नतिमतश्शैलादुपप्लुत्य तौ
प्राप्तौ द्वारवतीं पयोधिपरिखामेकान्तरम्यां पुरीम् ।
पित्राद्यैरथ तत्र मित्रनिवहैः सत्रा च गोत्रामर-
श्रेष्ठैः प्रेष्ठतमौ सतां चिरमरंसातां बलश्रीधरौ ॥

Colophon :

इति श्रीभागवतचम्पुप्रबन्धे रामपाणिवादविरचिते सान-
न्दगोविन्दो नाम सप्तमः स्तवकः ।

Author—Ramapaṇivada.

Remarks :

## ॥ भागवतचम्पूः ॥

## No. 1386. BHĀGAVATACAMPŪ.

C. O. L. No. 2394.

Substance—Palm leaf. Size—$3\frac{3}{4}'' \times 1\frac{5}{8}''$. Leaves—99. 12 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—950. Incomplete.

Owner—Pāṭakam Śaṅkaran Nambiār Avl.

Subject—Same as No. 1385.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रातः स्वप्नजमग्रजं निजमनामन्त्र्यैव कैश्चिद्वृतो
बालैराशु विधाय कृत्यमुचितं प्राक्तनं जातुचित् ।
केलिं कालियसर्पदर्पशमनीं निश्चित्य तस्मिन् दिने
कालिन्दीतटमाप कालजलदश्यामोऽथ दामोदरः ॥

पुलिन्दवरसुन्दरीपुलकितोरुवक्षोरुह-
प्रगाढपरिपीडनप्रथितसौरभोत्सेकिभिः ।
कलिन्दतनयातटीविटपिवाटसञ्चारिभिः
प्रगे हरिरसेव्यत भ्रमरसारुतैर्मारुतैः ॥

ईक्षामास करालकालियमहाकाकोलवह्निच्छटा-
दूरप्लोपिततीरपादपलतावृन्दां कलिन्दात्मजाम् ।

रूक्षाम्भःपरिपानमूर्छितपतत्पान्थाण्डजश्वापदा-
मेवम्भूतमहापदां पदमथो कृष्णः कृपावारिधिः ॥

तत्र च समये क्रमशः क्रमश-
स्तरुणिमभाजस्तरणेः किरणैः ।
तप्ततयाथ नखम्पचपांसुनि
तरणिसुतातटसीमानि विपिने ॥

कालियविषमविपानलदग्धे
कलितोज्ज्वलमृगतृष्णास्निग्धे ।
सञ्चरमाणं चरणैरतिभृश-
दवथुविसंस्थुलविनिवेशैस्तत् ॥

End :

वैरेणापि स्मरणमनिशं वासुदेवस्य कुर्वन्
निर्वाणं द्रागभजत हरेरैकरूप्यं स कंसः ।
भक्त्या योऽसौ भजति सुजनः श्रीपतिं तस्य किन्तु
ब्रूमः क्षेमं चरितमजितस्यान्यदेवेति वाच्यम् ॥

अष्टौ कंसस्यानुजा रुष्टचित्ता
मुष्टौ पा......श्चापखड्गादिमन्तः ।
औद्धत्येन प्राप्य संयुद्ध्यमाना
और्ध्वीं नीता रौहिणेयेन सिद्धिम् ॥

Colophon :

इति श्रीभागवते चम्पुप्रबन्धे मधुराप्रवेशो नाम पञ्चमः
स्तबकः ।

Author :

Remarks—The work breaks off on a fragment of the 6th *stabaka*.

---

## ॥ भारतप्रबन्धः (केरलभाषा) ॥

### No. 1387. BHĀRATAPRABANDHA with Malayāḷam commentary.

C. O. L. No. 235.

Substance — Paper. Size—13″ × 8½″. Pages—42. 32 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1000. Incomplete.

Owner—C. O.

Subject—The story of the Pāṇḍavas.

Beginning :

എങ്കിലോ പണ്ടു അഖണ്ഡഭാനുവംശമഃസ്ഥാനഭൂതന്മാരായിരിക്കുന്ന പാണ്ഡവന്മാർ പാണ്ഡുവിന്റെ അപായാനന്തരം ശതശൃംഗപർവ്വതത്തിങ്കൽനിന്നു് തന്നിവാസികളായിരിക്കുന്ന മുനീന്ദ്രന്മാരാൽ ഹസ്തിനപുരത്തെ നീതന്മാരായി ധൃതരാഷ്ട്രസ്മീപത്തിങ്കൽ ദുര്യോധനാദികളോടുകൂടെ വർത്തിക്കുന്ന കാലം അസൂയാനിധിയായിരിക്കുന്ന ദുര്യോധനൻ വ്യാപരിച്ചിരിക്കുന്ന ദുർവ്യാപാരങ്ങൾ വ്യാപരിച്ചതിലൊന്നും ഫലിയാഞ്ഞതിന്റെ ശേഷം പിന്നെ വാരണാവതമാകുന്ന നഗരത്തിങ്കൽ ജതുഗേഹമുണ്ടാക്കിച്ചമച്ചു. അതയവിടെക്കൊണ്ടു പാണ്ഡവന്മാരെ ഇരുപ്പൂത്തും ചെയ്തു. എന്നതിന്റെ ശേഷമാകുന്നു.

अथ जतुगृहदाहे निर्गता दैवगत्या
शमितवति हिडिम्बं यातुधानं क्षणेन ।
वलिनियमनिकेतात् पावना पाण्डुपुत्राः
मुदितमुखजचक्रामेकचक्रामनूषुः ॥

अथ पाण्डुपुत्राः जतुगृहदाहे दैवगत्या निर्गताः । अनन्तरम् ।

അനന്തരം പാണ്ഡുപുത്രന്മാര് ജതുഗൃഹദാഹം നിമിത്തമായി ദൈവഗതി ഹേതുവായിട്ടു നിർഗതന്മാരായി ഭവിച്ചു. കുനീതിയായിരിക്കുന്ന ദുര്യ്യോധനന്റെ നിയോഗംകൊണ്ടു് ജതുഗൃഹത്തെ ദഹിപ്പിപ്പാനായിക്കൊണ്ടു് വന്നിരിക്കുന്ന പുരോചനനെ നിശാസമയത്തിങ്കൽ അവന്റെ കയ്യിലിരിക്കുന്ന തീക്കൊള്ളികൊണ്ടുതന്നെ അവന്റെ വായിൽ കുത്തിക്കൊല്ലുതും ചെയ്തു. ഭീമസേനൻ തദനന്തരം ജതുഗൃഹത്തെ ദഹിപ്പൂതും ചെയ്തു. ഈശ്വരാനുഗ്രഹംകൊണ്ടു് പാണ്ഡവന്മാരൈവരും കുന്തീദേവിയും പ്രാതഃകാലത്തിങ്കൽ ഖനകനിർമ്മിതമായിരിക്കുന്ന ഗുഹയിലൂടെ പുറപ്പെട്ടു ഗംഗാതീരത്തിങ്കൽ ചെന്നു തോണിക്കാരനെ വിളിച്ചുവരുത്തി ഗംഗ കടന്നു ഹിഡിംബനാകുന്ന രാക്ഷസനിരിക്കുന്ന വനപ്രദേശത്തിങ്കൽ ചെല്ലുതും ചെയ്തു. അസ്സമയത്തിങ്കൽ ഹിഡിംബൻ അവരുടെ വരവറിഞ്ഞു ബുഭുക്ഷ ഹേതുവായിട്ടു തന്റെ സഹോദരിയാകുന്ന ഹിഡിംബിയെ പറഞ്ഞയച്ചു.

End :

प्रोत्साहिता दूतघनैः श्रमद्भिः
प्रत्यागमुद्गीर्णनिदेशतोयैः ।
उच्चेलुरुर्वीपतयः समस्ताः
सरित्प्रवाहा इव वारिराशिम् ॥

प्रत्याशं भ्रमद्भिः दूतघनैः उद्गीर्णनिदेशतोयैः प्रोत्साहिताः
उर्वीपतयः तं आप्तुं उच्चेलुः प्रवाहाः वारिराशिं इव

ആശകളെക്കുറിച്ചു ഭ്രമന്തുകളായിരിക്കുന്ന ദൂതഘനങ്ങളാൽ
ഉദ്ഗീർണ്ണനിദേശതോയങ്ങളെക്കൊണ്ടു എല്ലാ ദിക്കുകളിലും
പരിഭ്രമത്തോടുകൂടി സഞ്ചരിക്കുന്ന ദൂതന്മാരുടെ നിയോഗം
കൊണ്ടു ഉത്സാഹത്തോടുകൂടെ രാജാക്കന്മാരാകനാം ധർമ്മ
പുത്രര ഇരിക്കുന്നിടത്തു പോകതന്നെ എന്നു നിശ്ചയിച്ചു ഉള
കി പുറപ്പെട്ടുതും ചെയ്തു. ഒട്ടൊഴിയാതെയുള്ള നദികളിലെ
പ്രവാഹങ്ങൾ സമുദ്രത്തെ പ്രാപിക്കുന്നതു എങ്ങിനെ എന്നതു
പോലെ ആകുന്നതു്.

कर्णाटानर्तवङ्गद्रमिलनिपधकाम्बोजसौवीरभोजा-
न्ध्रारट्टावन्तिकुन्त्यश्मकमगधकलिंगाङ्गपुण्ड्राधिनाथाः ।
अन्येऽपि क्षोणिपालाः क्षपितरिपुबलाः मूर्धभिर्दूरनम्रै-
राज्ञां राज्ञो गृहीत्वा समदमुदचलन्नुत्सुका युद्धकेल्याम् ॥

कर्णाटानर्तवङ्गद्रमिळनिपधकाम्बोजसौवीरभोजान्ध्रारट्टावन्ति-
कुन्त्यश्मकमगधकलिङ्गाङ्गपुण्ड्राधिनाथाः अ.

Author :

Remarks—The Ms. contains the story of the Pāṇḍavas commencing on their sojourn in the wax-building and ending on the declaration of the battle with the Kauravas.

---

## ॥ भारतप्रबन्धः ॥

## No. 1388. BHĀRATAPRABANDHA.

C. O. L. No. 489 A&B.

Substance — Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—510. 18—21 lines per page and 16—24 letters per line. Script—Devanāgarī. No. of Granthas—5650.

Owner—C. O.

Subject—The story of the Mahābhārata.

Beginning:

हरिः श्री गणपतये नमः ।

श्रीमान् सीमातिगामिप्रसृमरमहिमा चन्द्रमाः सान्द्रमोदं
सेन्द्रैरास्वाद्यमानः सकलसुरगणै रोहिणीप्राणनाथः ।
नेत्रादत्रेः पुराभूत् प्रभव उरुभुजाविक्रमाक्रान्तविश्व-
क्षोणीचक्रान्तराणां भरतकुलभुवां भूभुजां मानभाजाम् ॥

अभवदथ बुधोऽस्मादब्जतस्तारमुक्ता-
मणिरिव शुभवृत्तो गुम्भितः सद्गुणेन ।
अतिललितमहेळावर्तुळोत्तुङ्गलीन-
स्तनभरपरिषङ्गश्लाघितो लब्धवर्णः ॥

निखिलजगतीचक्रव्याप्तोरुकीर्त्तिरतो बुधा-
दिह शुभकृतामाद्यो नाम्ना नृपोऽथ पुरूरवाः ।

द्विजवरकुले सम्भूतानामशेषमहीभुजां
प्रथम उदभून्मन्त्रौघानामयं प्रणवो यथा ॥

योऽसाविळापतिरिळातनयो विचित्रं
स्त्रीमातृकोऽपि खलु पूरुषमातृकश्च ।
वाणीविराजिवदनाम्बुरुहोऽपि नित्यं
वाणीविदूरतर एव वरीवृतीति ॥

अभूदभूतोपमभूरिभूतिर्नृपो नृपालावलिमौलिभूतः ।
महीमहीनां कलयन् कराग्रे सदा सदानन्दकृदायुरस्मात् ॥

अजायताजातसपत्नजातः सुजातजन्मा नहुषोऽथ तस्मात् ।
नन्द(?)म्यमानावनिपालमौलिर्नेनिज्यमानामलवादवीरः ॥

... ... ... ...

ततः स वृत्रासुरवधागसा वित्रासिते सुत्रामणि कुत्रापि सपदि नाकलयमविनाकलयति तिरोहिते रोहिताश्वमुखैरखिलमपि भोगजातमनुदिनमनुवोभूयमानः कदाचन वलवैरिजायां वलजां पुलोमजां विलोकयन् विषमेषुविशिखविदूषितमनाः सपदि तदभिसरणेहया वाहकभाववरिष्ठतममैत्रावरुणिशापाद्वाहसभावं स्वकीयंभूयः क्षिप्रजाततत्प्रसादान्निजवंशजादेव भवित्रीं शापमुक्तिं प्रतिपन्नमोदं प्रतिपालयन् यामुनाभिधानस्य गिरिवरस्य गरीयसीं दरीं कष्टतरदिष्टबलादध्यशयिष्ट ॥

End:

सुरर्षिगणसेवितस्तदनु शङ्खभेरीरव-
प्रकामबधरीकृताशमवनीशमौलिस्तदा ।

जगाम सहजान्तिकं कुसुमवर्षहर्षाकुलं
प्रसन्नसुरयौवतोल्लसदुलूलुनादाञ्चितः ॥

स्वर्वन्दिगीतचरितो धृतदिव्यदेहै-
स्सर्वैस्सबन्धुभिरमा स महानरेन्द्रः ।
अम्लानकान्तिरमरालयमध्युवास
धर्मात्मजो भुवनमङ्गलकीर्तिलक्ष्मीः ॥

Colophon :

इति स्वर्गारोहणं प्रबन्धम् ।

Author :

Remarks :

---

## ॥ भारतप्रबन्धः ॥

No. 1389 A. BHĀRATAPRABANDHA.

C. O. L. No. 2343 A.

Substance—Palm leaf. Size—$8\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—64. 10—11 lines per page and 32 letters per line. Script—Malayaḷam. No. of Granthas—1350.

Owner — Keśava Śāstrigal Nīlakaṇṭha Śāstrigal Avl., Tiruvaṭṭār.

Subject—Same as No. 1388.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथापरेद्युः कथिताभिजात्या कर्णं विभेत्तुं धृतराष्ट्रजेभ्यः ।
भागीरथीतीरमवाप कुन्ती यत्र स्थितोऽसौ नियमेन युक्तः ॥

तस्यात्मजस्यार्कनिविष्टदृष्टे-
व्रतावसानं प्रतिपाल्य तस्थौ ।
प्रायस्तदंशं चिरसंगृहीतं
पयः स्तनाभ्यां मुहुरुद्गिरन्ती ॥

स तत्र पूतस्सवनाभिषेकै-
स्तपोवसाने तपनस्य सूनुः ।
श्रोत्रे वितेने शुचिमक्षमालां
नेत्रे च राज्ञीं निकटं प्रपन्नाम् ॥

End and Colophon—Same as No. 1388.

Author :

Remarks :

---

## ॥ भीष्मोपदेशः ॥

### No. 1389 B. BHĪṢMOPADEŚA.

C. O. L. No. 2343 B.

Substance—Palm leaf. Size—$8\frac{1}{4}'' \times 1\frac{3}{8}''$. Leaves—2. 12 lines per page and 32 letters per line. Script—Malayaḷam. No. of Granthas—35.

Owner—Same as No. 1389 A.

Subject—Hortatory discourses of Bhīṣma.

Beginning:

हरिः ।

भृङ्गाराम्बु निरस्य कौरवपतेः क्षौमोपधानं तथा
पार्थास्त्रप्रतिपादितं तदुभयं लब्ध्वा कृतार्थान्तरम् ।
आत्मायत्तमृतिं प्रतीक्षितदिवोनाथोत्तराशागतिं
गाङ्गेयं शरतल्पभाजमभजद्राजाथ धर्मात्मजः ॥

अनुजग्मुरमुं विनीतिभाजो मुनयो धौम्यमुखास्सहोदराये ।
भगवानपि भक्तभक्तिचिन्ताद्रवदन्तःकरणो रथाङ्गपाणिः ॥

जेतारं क्षत्रमत्ताक्षपणविधिपटोर्जामदग्न्यस्य साक्षाद्
भूम्ना धाम्ना ज्वलन्तं च्युतमिव नभसो दिव्यमव्याजभव्यम् ।
शय्यायां बाणमय्यामविदितशरसंपातखेदं शयानं
ध्यायन्तं ब्रह्म सर्वे ददृशुरनुपमं व्योमवापीतनूजम् ॥

End:

सोऽपि विशीर्यमाणनिजदेहगेहोदरनिहितमतिपेटिकानिक्षिप्तानि निर्मलधर्मशास्त्ररहस्यरत्नानि तत्तादृशे पात्रविशेषे प्रतिपिपादयिषुः तदनुयोगजनितनमस्कारमनुकुलप्रणीतागमविशारदेषु नारदादिषु महामुनिषु च दत्तकर्णेषु उपनिषद्भिरप्यलक्षितवैभवे भूभारापहारमात्रसंसारिणि कंसारौ च उररीकृतोपश्रोतृभावे सरागविरागाधिकारिभेदभिन्नतया विहितोभयविधलक्षणान् विचक्षणवर्णनीयान् वर्णाश्रमधर्मान् अभिनवसुधावेण्या वाण्या नानाख्यानेतिहासपरिमळनमिळितविरळेतरपरिमळानुवेलानुरागमुपदिदेश ।

पश्चात् पृच्छति धर्मजन्मनि परं धर्मं च दैवं परं
जप्यं मुक्तिफलप्रदश्च मुदितोऽवादीन्नदीनन्दनः ।
दैव्यं दिव्यमयं(?) हरिस्त्रिजगतां सेव्यास्य धर्मः परं
श्रीमन्नामसहस्रमस्य तु जपन्मुक्तो नरस्स्यादिति ॥

Author :

Remarks :

---

॥ स्वाहासुधाकरः ॥

No. 1389 C. SVĀHĀSUDHĀKARA.

C. O. L. No. 2343 C.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—5. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Same as No. 1389 A.

Subject—Same as No. 1381 H.

Beginning etc.—Same as No. 1662, DCSMMPL.

Author :

Remarks—A few leaves after the close of the work contain certain isolated verses from the Mahābhārata.

---

## ॥ राजसूयम् ॥

### No. 1390 A. RĀJASŪYAM.

C. O. L. No 612 A.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—96. 7—9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1750. Incomplete.

Owner—Mitran Mitran Nambūri Avl., Kuḍamāḷūr, Ettumānūr.

Subject—Description of the Rājasūya 'sacrifice' performed by Dharmaputra.

Beginning etc.—Same as No. 1658 B, DCSMMPL.

Author :

Remarks :

---

## ॥ किरातम् ॥

### No. 1390 B. KIRĀTAM.

C. O. L. No. 612 B.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—2. 8 lines per page and 32 letters per line. Script — Malayāḷam. No. of Granthas—32. Incomplete.

Owner—Same as No. 1390 A.

Subject — The story of Śiva's incarnation as a tribesman (*Kirāta*).

Beginning :

... धर्मसुतस्य मूर्धनि वहन् कृष्णाकटाक्षाञ्चल-
श्रीमन्मङ्गलदाम वक्षसि वहन् चण्डं धनुर्गाण्डिवम् ।
गत्वा प्राप्य तमिन्द्रकीलमचलं तत्रेन्द्रमाराधयन्
तद्वाक्यादुपसेदिवान् पुनरसौ कैलासमद्रीश्वरम् ॥

शरच्चन्द्रसमच्छायं शैलं शङ्करशङ्करम्
ददर्श विपुलैः शृङ्गैरुल्लिहन्तमिवाम्बरम् ॥
नानाधातुविचित्राङ्गं नानाद्रुमलतावृतम् ।
नानारत्नसमाकीर्णं नानापक्षिसमाकुलम् ॥

क्वचिद् उल्बणगणपतिविषाणकोणखण्डिततटशिलाधूलीसमुद्धूलितदिगन्तरालं, क्वचिद् कुमारकोदण्डाभ्याससन्दर्शितदेवकुलं, क्वचिद् नन्दिकेश्वरकरतलताड्यमानभैरवमुखरवमुखरितं क्वचिद्विजृम्भमाणकुम्भोदरं, क्वचिदामोदमानसिंहोदरं ... ... ...
... ... ... ... ...
... ... ... क्वचित्परितः सकलसिंहशार्दूलवराहसृगालकृमिकीटकगिरिशिलासञ्चये स्थावरजङ्गमैरुपासितसकलभुवनैकनाथम् ।

End :

ततः सर्वान् परित्यज्य नियमान् मुनिसेवितान् ।
पार्थः पञ्चाग्निमध्यस्थः पादाङ्गुष्ठाग्रविष्ठितः ॥

अ(नि?ग्नि)केतुश्च वर्षासु शिशिरे जलसंश्रयः ।
ग्रीष्मे पञ्चाग्निमध्यस्थश्चचारैवं तपश्चिरम् ॥

इन्द्रियपञ्चकतुरगानिन्द्रसुतो हृदयमन्दुरानिलये ।
चन्द्राभरणस्तम्भे हन्त(बबन्धाशु) धैर्यपाशेन ॥

... ... ... ...

.... .... र्म्मलोऽन्वहं बभूव पक्षे बहुले यथा शशी ॥

उदग्रतेजोभिहतैर्महर्षिभिर्निवेदिता तादृशि सव्यसाचिनि ।
तपश्चरन्तं तमनन्यदैवतं विज्ञापयामास गिरीशमम्बिका ॥

ततः पिनाकी भगवान् सर्वपापहरो हरः ।
कैरातं रूपमास्थाय काञ्चनद्रुमसन्निभम् ॥

अथ देवी महादेवं कैरातं वपुरास्थितम् ।
विलोक्य चारुसर्वाङ्गी शबरीवेषमा(स्थिता) ॥

श्वानः केचन वागुराश्च कतिचित्पाशास्तथान्ये पराः
घण्टाः केऽपि वनेचराश्च मृगयाव्यापारकोलाहले ।
आसन् भूतगणाः पिनाकधनुपस्त्रासेन चञ्चन्मृग-
क्षोणीक्षोभविकम्पमानधरणीपृष्ठेऽथ पृष्ठानुगाः ॥

युगपञ्चसहस्राणां सूर्याणामुदयो यथा ।
तथाभूत् .... .... .... ॥

Colophon :

Author :

Remarks—The Ms. extends up to the portion dealing with the appearance of Śiva in the guise of a Kirāta or mountaineer.

---

## ॥ अज्ञातवासः ॥

## No. 1390 C. AJÑĀTAVĀSA.

C. O. L. No. 612 C.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas — 18. Incomplete.

Owner—Same as No. 1390 A.

Subject—The story of the Pāṇḍavas in concealment.

Beginning :

हरिः ।

ततः प्रमुदिता देवी कृष्णां निर्वर्ण्य चेतसा ।
स्वगृहे वासयामास तामुक्तप्रबलाश्रयाम् ॥

अथैकदा तत्र सुदेष्णायाः प्रेक्षणेन मदनोत्सवासवाय वासवासवायतनसदृशं(?) वासगेहमागतां कौरवाधमकरपरिक्लेशदुःखादिव विवर्णेन वाससावगुण्ठिताङ्गीं नखशशिपरम्परासेवनलालसयेव प्रपदसम्मुखीनलोचननीलोत्पलां राजीवशङ्कयानुव्रजता राजहंसेनेव राजितभाजनेन राजितकराञ्चलां पाञ्चालसुतां विलोक्य

पञ्चेषुणा वञ्चितविवेको मञ्चाद्रुपसृत्य किञ्चिदाकुञ्चितमौलिः कीचको वाचमुवाच ।

End :

अथ शनैरुत्तस्थुषी याज्ञसेनी धरातलपरागधूसरतिरोहितगात्रशोभा सूतान्ववायस्य जनपदस्य प्रथमामीतिबाधामिव बाष्पधारामुत्सृजन्ती मन्दं मन्दं भूपतिभवनमागत्य तत्परिभवं मनसि सन्निधाय यथापुरं राजमहिषीनियोगं कर्तुमारभत ।

मात्स्यमक्षविनोदेन धर्मसूनुरतोपयत् ।
इतरेऽपि प्रतिदिनं स्वाधिकारैर्गुणोत्तरैः ॥

यतिपौरोगवक्लीबसादिगोपालकाकृतीन् ।
कृष्णां च पौरा नाजानन् सैरन्ध्रीरूपधारिणीम् ॥

Colophon :

Author :

Remarks—The closing portion is missing.

---

## ॥ पूजाप्रकारः ॥

No. 1390 D. PŪJAPRAKĀRA.

C. O. L. No. 612 D.

Substance—Palm leaf. Size—9½″ × 1½″. Leaf—1. 8 lines per page and 36 letters per line. Script — Malayāḷam. No. of Granthas — 18. Incomplete.

Owner—Same as No. 1390 A.

Subject—Rites relating to worship.

Beginning :

.......... .......... .......... ..........

हुं नमः । वां नेत्रत्रयाय वौषट् नमः । यः अस्त्राय फट् नमः । परशवे नमः । हरिणाय नमः । अभया.........वरदाय नमः । शिं अघोराय नमः । यं सद्योजाताय नमः । वां वामदेवाय नमः । नं ईशानाय नमः । इति पूर्वादिचतुर्दिक्षु ।

ഈശകോണിലും ഇതു പ്രഥമാവരണം.

End :

ഇങ്ങനെ ജലാദിജലാന്തം പൂജിച്ചു് പരിവാരൈക്യം കല്പിച്ചു് പാദ്യാദിത്രയത്തെ കൊടുത്തു് പിന്നെ നിവേദിപ്പാൻ ദേവന്റെ മുമ്പിൽ മെഴുകി ഒരു പൂവിട്ടു നിവേദ്യം മുമ്പിൽ വച്ചു് ഒരു പൂവുഴിഞ്ഞു് ക്രവ്യാദാംശം നിരൃതികോണിൽ കളഞ്ഞു് വലത്തുകൈയിൽ വെള്ളം ഒഴിച്ചു് പ്രണവം എട്ടുരു ജപിച്ചു് ഷഡന്തപ്രണവംകൊണ്ടു് പ്രോക്ഷിച്ചു് അസ്ത്രംകൊണ്ടു സ്ഥലത്രയാദി രക്ഷിച്ചു് പിന്നെയും വലത്തുകൈയിൽ വെള്ളം എടുത്തു് യം എന്നു് എട്ടുരു ജപിച്ചു് പ്രോക്ഷിച്ചു് ശോഷണം ചെയ്‌വൂ. പിന്നെ രം എന്നു വലത്തുകൈയിൽ എഴുതി നിവേദ്യത്തിൽ കാട്ടി ദഹനം ചെയ്‌വൂ. പിന്നെ...

.... .... .... ....

Colophon :

Author :

Remarks—This Ms. is lacking in its beginning and end.

## ॥ चन्द्रदर्शनादिफलम् ॥

### No. 1390 E. CANDRADARŚANĀDIPHALAM.

C. O. L. No. 612 E.

Substance—Palm leaf. Size—9″ × 1½″. Leaf—1. 7 lines per page and 24 letters per line. Script — Malayāḷam. No. of Granthas — 10. Incomplete.

Owner—Same as No. 1390 A.

Subject—Effects of seeing *Candra* on different days of the week.

Beginning :

.... .... .... ....

യും വെള്ളവും തീയും കാററുമാകാശവും ക്രമാൽ

सौख्यं जळत्वं मरणं महाभयं
धनागमं प्राणसमासमागमम् ।
दुःखं च सूर्यादिषु वासरेषु
सुदर्शनाद् दास्यति बालचन्द्रः ॥

വീട്ടെക്കെട്ടുക്ക പാതിയോടു പുണൎന്നിരിക്കും
ദുഃഖം പെരുക്കുമുടനേ ചില പുത്രരുണ്ടാം
അൎത്ഥം മികയ്ക്കുമഴകേറുമതീവ നാശം
മുൽപ്പത്തിരുന്നു പരിചെണ്ണുക സൂൎയ്യവാരാൽ.

End :

प्रथमायां तु पुत्राढ्या द्वितीयायां तथैव च ।
तृतीयायां भोगवती चतुर्थ्यां परसङ्गिनी ॥

पञ्चम्यां पुत्रवती चैव षष्ठ्यां पुत्रविनाशिनी ।
सप्तम्यां भोगमाप्नोति अष्टम्यां मरणं भवेत् ॥

नवम्यां चेद्दरिद्रा स्याद् दशम्यां सुखभोगिनी ।
एकादश्यां पुत्रवती द्वादश्यां विधवा भवेत् ॥

त्रयोदश्यां पुत्रवती चतुर्द................ ।

Colophon :

Author :

Remarks—Both the beginning and end are missing.

---

## ॥ कुचेलवृत्तम् ॥

No. 1390 F. KUCELAVṚTTAM.

C. O. L. No. 612 F.

Substance—Palm leaf. Size—$11'' \times 1\frac{1}{2}''$. Leaves—2. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 50. Complete.

Owner—Same as No. 1390 A.

Subject—Kucela's interview with Lord Kṛṣṇa.

Beginning :

... ... ... ...कुलाभिभूतां ।
दारिद्र्यनाम्नि नरकांबुनिधौ निमग्नाम् ॥

अयि ब्रह्मन् ब्रह्मादिभिरभिनुतो दैवतगणैः
स्वयं लक्ष्मीजानिर्ननु तव वयस्यो यदुपतिः ।
सकृद् गत्वा पश्य प्रणतजनवश्यं त्वमचिरा-
दवश्यं विश्वात्मा द्रविणमतुलं दास्यति स ते ॥

स च तपोनिधिरितिवदन्तीमन्तरमान्तीमार्तीमिवोद्वमन्ती अनूनधनायाक्रान्तहृदयाम्बुजामम्बुजाक्षदिदृक्षातिरेकगुणीभवद्द्रविणाग्रहो गृहिणीमित्थमकथयत् ।

End :

अभ्यर्चितं विधिवदप्रतिमानभाग्य-
मर्धासने समुपवेश्य पुरः समेपाम् ।
अस्तोकमोदपरवानरविन्दनेत्रो
हस्तेन हस्तमवलम्ब्य हसन् बभाषे ॥

सखे दृष्ट्या दृष्टः किमपरमयं मे सुदिवसो
भवादृग्भिः सद्भिर्न खलु सुलभं सङ्गमसुखम् ।
पराधीना यूयं प्रतिदिनमनुष्ठाननियमै-
रमी तन्त्रावापैरपि च परतन्त्रा बत वयम् ॥

अपि च ।

कच्चित् सखे स्मरति तां गुरुगेहवृत्तिं
शुश्रूषयैव नयतो दिवसानशेषान् ।
यच्छक्तिरप्रतिहता स्वयमेव पुंसाम्
इच्छानुरूपमचिरेण फलं प्रसूते ॥

स्मरसि ननु हृदन्तरिन्धना...... ।

... ... ... ... ॥

Colophon :

Author :

Remarks :

---

॥ गजेन्द्रमोक्षः ॥

No. 1390 G. GAJENDRAMOKṢA.

C. O. L. No. 612 G.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 8 lines per page and 36 letters per line. Script — Malayāḷam. No. of Granthas—20.

Owner—Same as No. 1390 A.

Subject—Same as No. 1375 I.

Beginning :

हरिः

इन्द्रद्युम्न इति त्रिलोकविदितः पाण्ड्याधिराजः पुरा
पुत्रे राज्यभरं निधाय मलये तन्वंस्तपो दुश्चरम् ।
आतिथ्याकरणादगस्त्यमुनिना शप्तः समाधिस्थितो
दुग्धाम्भोनिधिमध्यभाजि गजतामाप त्रिकूटाचले ॥

End :

तदनु चायमतनुमदमदनानुरोधवीतबाधचेताः वासनानुगत्या नित्यानुबद्धहरिध्यानशक्तिरनुरक्तानेकहस्तिनीपरिवारितः दूरतो निरस्तसमस्तसत्त्वजातो यूथमापालयन् देवालयदन्तिनामपि स्पृहणीयचरितः परितस्त्रिकूटाचलमतिपेशलदलबहलपरिमलतालतमालहिन्तालरसालनालिकेरमूकपण्डपुण्ड्रेक्षुरम्भाकलमफुल्लसल्लकीपनससरलैलादिविपिनविहरणविनोदाविदितगलितबहुकालः कदाचिदूष्मलग्रीष्मतापासहिष्णून् गणान् प्राचेतसं सरोवरं प्रणीय पानीयपानविहरणमृणालाहरणाभ्यवहारादिभिर्वीतखेदान विधाय अतिचिरं स्वैरलीलामाकलयन् देवलोकगाथकेन हूहूनामकेन देवलतनिशापग्राहितग्राहाकृतिना गृहीतचरणो विमोचनासमर्थेषु विहितभयबृंहितसंहिताकाण्डप्रलयघनघटास्तनितशङ्कातङ्किताशेषजन्तुजातेषु यूथेषु तूर्णोत्तीर्णेषु देशदशाविशेषवशाद्विशालबलविक्रमोपक्रमोदग्रेण समं ग्राहपतिना संग्रामकेलिभिः कमपि समयं गमयन् श्रमयन्नभिमातिमतानुवर्तीनि निधूतकुहरपाथांसि इतरयादांसि रमयन्ननामयपिशुनैरपि समाश्वासनसुजनैः सविलासनयनवलनैरवशंवशा यूथं क्रमेण वत्सरसहस्रावसाने मत्सरिणा मदं शमयितुं च मनः विहिताध्यवसितैर्नियतः प्रभावादिभाधिराजः परा.................... ॥

Colophon :

Author :

Remarks—The concluding portion is missing.

## ॥ भीष्मगतिः ॥

## No. 1390 H. BHĪṢMAGATI.

C. O. L. No. 612 H.

Substance—Palm leaf. Size—11" × 1½". Leaves—3. 43 lines per page and 40 letters per line. Script—Malayaḷam. No. of Granthas — 54. Complete.

Owner—Same as No. 1390 A.

Subject—Bhīṣma's death on a bed of arrows.

Beginning :

हरिः ।

भृङ्गाराम्बु निरस्य कौरवपतेः क्षौमोपधानं तथा
पार्थास्त्रप्रतिपादितं तदुभयं लब्ध्वा कृतार्थान्तरः ।
आत्मायत्तमृतिं प्रतीक्षितदिवोनाथोत्तराशागतिं
गाङ्गेयं शरतल्पभाजमभजद्राजा स धर्मात्मजः ॥

अनुजग्मुरमुं विनीतिभाजं
मुनयो धौम्यमुखाः सहोदराश्च ।
भगवानपि भक्तभक्तिचिन्ता-
द्रवदन्तःकरणो रथाङ्गपाणिः ॥

जेतारं क्षत्रसत्ताक्षपणविधिपटोर्जामदग्न्यस्य साक्षाद्
भूम्ना धाम्ना ज्वलन्तं च्युतमिव नभसो दिव्यमव्याजभव्यम् ।

शय्यायां बाणमय्यामविदितशरसंपातखेदं शयानं
ध्यायन्तं ब्रह्म सर्वे ददृशुरनुपमं व्योमवापीतनूजम् ॥

End :

स्तावं स्तावं मुहुरिति हरिं कान्तिधारां तदीयां
पायं पायं नयनचुलुकैरुद्गलन् बाष्पपूरम् ।
दर्शं दर्शं परिचिदमलानन्दरूपं स्वभन्त-
र्देहं मोहालयमिव जहत् सोऽभजद् ब्रह्मभूयम् ॥

तूष्णीकेषु सभागतेषु नभसो भेरीरवे निष्पतत्-
पुष्पौघोत्थितषट्पदारवपराभूतेऽपि भूयस्तरे ।
शोचिष्केशवशा विधाय सहसा देहं सुपैतामहं
गङ्गायां कृतपैतृकः पुरमगाद् धर्मात्मजः सानुजः ॥

Colophon :

Author :

Remarks :

---

## ॥ पाण्डवगतिः ॥

### No. 1390 I. PAṆḌAVAGATI.

C. O. L. No. 612 I.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 18 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 22. Incomplete.

Owner—Same as No. 1390 A.

Subject—Dissolution of the Pāṇḍavas.

Beginning:

श्रीकैलासगिरीश्वरोपरि वरारामान्तरे बन्धुरे
मन्दारद्रुममूलसीमनि मणिप्रद्योतमानासने ।
पार्वत्या सह सुस्थितं गुहगणेशाद्यैरजाद्यैर्वृतं
चेतः! श्रीपरमेश्वरं भज सदा कारुण्यपूर्णार्णवम् ॥

मरणमनायासतया
मरणावधि वर्तनं त्वदीनतया ।
कारणमुभयेहितयोः
स्मरणं स्मरवैरिपदसरोरुहयोः ॥

दुर्वृत्तो वा सुवृत्तो वा धूर्तः पण्डित एव वा ।
काषायदण्डमात्रेण यतिः पूज्यः सदा जनैः ॥

कृत्वा पौत्रमथो परीक्षितमिह क्षोणीपतिं प्रस्थिताः
पार्थास्ते सह कृष्णया पथि शुना केनापि चानुद्रुताः ।
प्राणत्राणपराङ्मुखाः परिलसच्चीराम्बराः प्राङ्मुखा-
श्चाक्रम्य क्रमशो दिशः प्रतिगताः पश्चाद्ययुश्चोत्तराम् ॥

End:

दुस्त्यजान् सहजान् पुत्रान् प्रियां च त्यक्तवानसि ।
किं न मुञ्चसि पापिष्ठं कुक्कुरं सद्गुणाम्बुधे ॥

अप्रीतिदानं शरणागतस्य
स्त्रियो वधो विप्रधनापहारः ।

मित्रप्रपीडा च तथैव शक्र!
धर्मेतराण्याश्रितमोचनं च ॥

तद्धर्मपुत्रस्य निशम्य वाक्यं
धर्मस्वरूपी भगवानुवाच ।
प्रीतोऽस्मि ते धर्मपरीक्षयाद्य
साधो सुखेनाश्रय...... ॥

Colophon :

Author :

Remarks :

---

॥ भगवद्दौत्यम् ॥

No. 1390 J. BHAGAVADDOUTYAM.

C. O. L. No. 612 J.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—4. 6—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 50. Incomplete.

Owner—Same as No. 1390 A.

Subject—Lord Kṛṣṇa's mission to the court of the Kauravas.

Beginning :

.... .... ... ...

......रिणतमधुना नूनमन्यादृशं तद् ।

देवेनानेन दौत्यादपि नृपसमितौ याचितः पञ्च देशान्
वाचा दुर्योधनो मे न खलु कलुषधीर्दत्तवानुत्तरं वा ॥

शिशुमेव वृकोदरं निहन्तुं प्रयतन्ते स्म पुरा निगूढमेते ।
गरदानजलप्रपातनाद्यैरुरुदोःपरिरक्षति स्म देवमेनम् ।

जतुभवननिवासे कष्टमस्मानकस्मा-
दपकरुणममीषां दग्धुमासन् प्रयासाः ॥
विदुरविहितनीत्या निर्गता नूनमस्मात्
कथमपि वयमायुःशेषशक्त्या तदानीम् ॥

End :

पुत्रस्नेहाकुलं मामयि बत भगवन् वस्तुतस्त्वत्प्रपन्नं
जानीहीत्यार्तलापे कुरुपितरि जवाद् दृष्टिरस्योदमीलत् ।
सोऽप्यानन्देन पश्यन् परपुरुषममुं निःस्पृहोऽद्यावलोके(?)
प्रज्ञाचक्षुष्ट्वमेव प्रकृतिजमवृणोद्धन्यजन्मा नृपालः ॥

ओजस्त्वेदमुपसंहर माधवेति
घुष्यत्सु सत्सु गुरुभीष्मपुरोगमेषु ।
घोरं विहाय निमिषेण कुशेशयाक्षो
गोपीदृशां कुतुकहेतुमवाप रूपम् ॥

Colophon :

Author :

Remarks :

---

॥ किरातम् ॥

No. 1390 K. KIRĀTAM.

C. O. L. No. 612 K.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—2. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—16. Incomplete.

Owner—Same as No. 1390 A.

Subject—Same as No. 1390 B.

Beginning:

हरिः ।

पार्थः कदाचिद्गुरुसाग्रजस्य
कोदण्डपाणिः सशरो जटावान् ।
उपेत्य कैलासगिरीन्द्रसानुं
परं तपः सुस्थिरधीरतानीत् ॥

तावत्तपोबलनिरुद्धवलिते दिगन्ते
देवार्थितः स भगवानथ चन्द्रमौलिः ।
साकं गणैर्धृतकिरातवपुर्मृडान्या
सुत्रामसूनुसविधं सहसा समागात् ॥

End:

रे रे गच्छ किरात दूरमशनैर्जानीहि मामर्जुनं
जाने पार्थ सहस्रनेत्रतनयं त्वामप्यहं सान्त्वयम् ।

प्राप्तोऽहं पशुभर्तुरङ्घ्रियुगलस्याराधनायाधुना
त्वत्कामप्रद एव कृत्तिवसनः सेव्यस्त्वया सादरम् ॥

रोपातिभूमिमचिरेण किरातपार्थौ-
वीपाम्बभूवतुरथात्तशरासनस्य ।
संग्राममुग्रतरमादधतां तदानीं

* * * * * * *

Colophon :

Author :

Remarks :

---

॥ राजसूयम् ॥

No. 1390 L. RĀJASŪYAM.

C. O. L. No. 612 L.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—24. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—430.

Owner—Same as No. 1390 A.

Subject—Description of the Rājasūya "sacrifice" performed by Dharmaputra.

Beginning :

कामं भीमार्जुनाद्यैरजितपृथुमहोवर्धितैरुद्धृतानां
पृथ्वीशानां जयेन प्रसभमुपहृते निस्तुले वित्तराशौ ।

तद्वृत्तं धर्मसूनुः सपदि परममित्राय भर्त्रे यदूना-
मावेद्य व्यासमुख्यैः सममभृत परद्रव्यवद् द्रव्यभारम् ॥

भगवानपि भुवनानुग्रहैकदीक्षितः सततं वीक्षितानिखिलवृत्तान्तोऽपि तदुदन्तनिशमनानन्तरमेव निखिलात्मकस्य स्वस्यैव वरिवस्याहेतोरधिकदुःसाधनस्य समस्तामरमुनिमनुजस्तोमसंप्रीतिसम्भावनीयस्य सप्ततन्तुप्रवरस्य संसाधनमिषेण तत इतः समामिलितबहुतरसुकृतोत्तरजननयनहृदयेषु चिदानन्दामृतरसलहरीं वितरीतुमनाः सकलहरिदन्तरसन्ततां विभूतिमुपसंहृत्य पाण्डवपुरमेव मज्जयन्तीं महालक्ष्मीं वासवसज्जिकामिवाभिसर्तुकामस्तथाविधमहोत्सवसमुचितवेषभूषादेदीप्यमानयदुनृपसुतपृतनाशतावृतः सपरिकरसकलमहिषीगणपरिवीयमाणः सुरपुरदुर्लभनिजलक्ष्मीहल्लोहलतुल्यविभवं पृथुतरपृथासुतप्रणयभारसमुचितमतुलमणिगणबहुलमिति विविधमुपदापदार्थसार्थमुद्वाहयन् कुशस्थलीपुरस्थलादभिप्रस्थाय हरिप्रस्थनगरीमभूतपूर्वपरमाडम्बरोचितवादित्रादिघोषसंपदा कम्पितभुवनावकाशः समाससाद ॥

End—Same as No. 1658 B, DCSMMPL.

Author:

Remarks—This work is different from the one noticed under No. 1390 A.

---

## ॥ दूतवाक्यम् ॥

## No. 1390 M. DŪTAVĀKYAM.

C. O. L. No. 612 M.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—21.

8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 400.

Owner—Same as No. 1390 A.

Subject etc.—Same as No. 1390 J.

Author :

Remarks :

---

॥ कीचकवधः ॥

No. 1390 N. KĪCAKAVADHAM.

C. O. L. No. 612 N.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—3. 7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 45. Incomplete.

Owner—Same as No. 1390 A.

Subject—The story of the killing of Kīcaka.

Beginning :

* * * * * *

सायं महानसशयं शनकैर्ययौ सा
भीमं रहः पृथुशरावकृतोपधानम् ।
धूमाधिरोहमलिनं वसनं वसानं
नीलाम्बुवाहपरिवीतमिवाचलेन्द्रम् ॥

निःश्वस्य दीर्घमियमन्तिकमावसन्ती
स्पृष्टेन बाष्पमुकुलैः कुचयोः स्खलद्भिः ।
बुद्धेन तेन किमिदं व्यसनं तवेति
पृष्टा सगद्गदमुवाच विषण्णचेताः ।

किमद्य मे दुःखमपत्रपा का
को वीरपत्नीत्वपदेऽभिमानः ।
सर्वं गतं कीचकनीचपिद्राड्
दत्वा कचं ताडनमातवत्या(?) ॥

End:

ततस्ते सोदरविपत्तिनिमित्तमेपेति रोपरूपितचेतसः निवेशितशवपिण्डभारेण चरमविमानेन पाञ्चालराजपुत्रीं कौन्तेयसीमन्तिनीं निबध्य तिमिरमुदिरसौदामिनीभिः करदीपिकाभिर्दीयमानचंक्रमणावकाशेन पथा पितृवनमुपनीय भोस्तव नाशहेतुमिमां कथं न गणयसीत्युच्चैररोदिषुः ।

गन्धर्वभीरुषु जनेष्वितरेषु तत्र
विष्वक्पलायनपरेषु विमुक्तबन्धा ।
कृष्णा च कीचकरिपुश्च कृतप्रशंसा-
वन्योन्यमभ्यगमतां नगरं पुनस्ते ॥

Colophon:

कीचकवधः समाप्तः ॥

Author:

Remarks:

## ॥ त्रिपुरदहनम् ॥

## No. 1390 O. TRIPURADAHANAM.

C. O. L. No. 612 O.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—25.

Owner—Same as No. 1390 A.

Subject — Destruction of the Tripurās by Paramesvara.

Beginning :

हरिः ।

नीते पावकिनाथ दानववरे कालालयं तारके
तत्पुत्रास्तपसान्यदुश्चरतरेणाराध्य गौरीपतिम् ।
हेमायोरजतात्मिकामपि ततो गेहत्रयीं कामगां
लब्ध्वा हन्त चतुर्दशापि भुवनान्यालोलयाञ्चक्रिरे ।

चक्रे स्वःसुन्दरीणां घनकुटिलमनोहारिधम्मिल्लभार-
प्रध्वंसः कल्पशाखिप्रकरविटपमूलातिभङ्गो वितेने ।
देहे प्रत्युप्तनानाविधमणिनिकरप्रोद्यदच्छांशुजाल-
ग्रस्ताशामण्डलीका दितिजपरिवृढैर्गेहपाली सुराणाम् ॥

End :

तच्छ्रुत्वा कुपिते रुद्रे ततो देवाः समागताः ।
दानवानां वधायाशु सन्नाहं चक्रिरे ततः ॥

सुमेरुरभवच्चापं ज्या बभूवाथ वासुकिः ।
पत्रं वायुर्मुखं वह्निः शरकाण्डं जनार्दनः ॥

एकबाणेन तं देवास्त्रिपुरं परमेश्वरः ।
निजघ्ने सासुरगणं देवदेवो महेश्वरः ॥

Colophon :

त्रिपुरदहनं समाप्तम् ।

Author :

Remarks :

---

॥ रुग्माङ्गदचरितम् ॥

No. 1390 P. RUGMĀṄGADACARITAM.

C. O. L. No. 612 P.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 25. Complete.

Owner —Same as No. 1390 A.

Subject—Glorification of the Ekādaśī-fast.

Beginning :

हरिः ।

मह्यं मन्दरपर्वते निवसता सत्यप्रतिज्ञ! त्वया ।
मत्पाणिं प्रतिगृह्णता ननु वरो दत्तो वदान्येन यः ।

दातव्योऽद्य स एष मेऽभिरुचितस्त्वेकादशीवासरे
शाल्यन्नाभ्यवहार एव भवतो हानिस्ततः का भवेत् ॥

किमिह बहुना विष्णोरस्यां तिथावतिथावपि
स्वगृहमनुगृह्णानेनान्नेन सत्कृतिरिष्यते ।
कठिनहृदये का वा वार्त्ता मदष्टिविधानत-
स्त्वपरमखिलं दास्यामीति स्फुटं नृवरोऽभ्यधात् ॥

End :

आक्रन्दन् मुक्तकण्ठं मुरमथन हरे पद्मनाभ प्रसीदे-
त्यादायासिं कथञ्चित्तरलकरतलभ्रश्यमानं नरेन्द्रः ।
यावत् पुत्रस्य कण्ठं विदलयितुमुपाचक्रमे चक्रपाणिः
प्रत्यक्षीभूय तावत्स्वयमसिसहितं पाणिमस्याभ्यगृह्णात् ॥

रुग्माङ्गदस्तदैवासीदष्टबाहुर्महाद्युतिः ।
धर्माङ्गदश्चतुर्बाहुस्तन्माता दिव्यसुन्दरी ॥

तदानीं तत्रस्था अपि मनुजवर्गाः समभवं-
श्चतुर्बाहानालीधृतजलजचक्राम्बुजगदाः ।
विमानारूढास्ते विमलतनवो विष्णुनिलयं
विविक्षन्तो याता विततरुचिविद्योतितदिशः ॥

आरोप्यामूनमन्दं पुनरथ विनतानन्दनस्योपरिष्टात्
तुष्टात्मा पद्मनाभः स्वयमपि च समारुह्य देदीप्यमानः ।
प्राप्तो वैकुण्ठलोकं प्रचुररुचिभरे सर्पलोकेन्द्रतल्पे
लक्ष्मीधात्रीसमेतः सकलजनपरिस्पष्टदृश्ये स शिश्ये ॥

Colophon :

Author :

Remarks :

---

## ॥ रावणवधः ॥

## No. 1390 Q. RĀVAṆAVADHA.

C. O. L. No. 612 Q.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—3. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—60.

Owner—Same as No. 1390 A.

Subject—The killing of Rāvaṇa.

Beginning :

मन्दाक्रान्तकन्धरः, रामाय प्रतिपक्षकक्षशिखिने दत्त्वा दैन्यं भगिन्या सुग्रीवस्य पदाहतच्युतमणिः कैलासाद्रीश्वरोन्मूलनचतुरतरोच्चण्डदोर्दण्डपण्डैः इत्युदीर्य तदनन्तरं दशकन्धरः सभातलनिविष्टमणिमयसिंहासनमधिष्ठाय निष्ठुरमतिरूढकोपशाली हतशेषान्निशाचरानाहूय सर्वैः समराय सन्नद्धतामिति सम्भाषमाणः संकलसमज्ञनाशनादिकृत्य सन्नद्धवर्मा सकलद्याहिनीसमेतः समराय सकललोकरावणः स रावणः प्रतस्थे ।

End :

अमोघं सन्दधे चास्य धनुष्येकधनुर्द्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥

भो लङ्केश्वर ! आविर्भूता यदि स्यात् ।

न दीयते जनकसुता मया हृता
न दीयते त्रिजगति रत्नसम्मता ।
न दीयते विजयपदानुयायिनी
मनस्विनां मनुज ! न जातु संभ्रमः ॥

इत्थमुद्धताटोपं युद्ध्यमानं शश्वन्निरुपमधामा सवितृवंशकेतुः पैतामहमहास्त्रमहाप्टेन दिव्यशरेण विदारितकठोरविशालवक्षःस्थलमपगतजीवितमवनौ निपातयामास ॥

Colophon :

Author :

Remarks :

---

## ॥ नृगमोक्षः ॥

### No. 1390 R. NṚGAMOKṢA.

C. O. L. No. 612 R.

Substance—Palm leaf. Size—11" × 1⅓". Leaves—11. 5—9 lines per page and 36 letters per line.

Script—Malayāḷam. No. of Granthas — 175. Complete.

Owner—Same as No. 1390 A.

Subject—Emancipation of Nṛga from his curse.

Beginning etc.—Same as No. 1658 B, DCSMMPL.

Author :

Remarks :

---

॥ श्रीकृष्णस्तुतिः ॥

No. 1390 S. ŚRĪKṚṢṆASTUTI.

C. O. L. No. 612 S.

Substance—Palm leaf. Size—11″ × 1″. Leaves—2. 6 lines per page and 32 letters per line. Script—Malayāḷam No. of Granthas — 20. Incomplete.

Owner—Same as No. 1390 A.

Subject—A panegyric of Śrī Kṛṣṇa.

Beginning :

अभिनवनवनीतस्निग्धमापीतदुग्धं
दधिकणपरिदिग्धं मुग्धमङ्गं मुरारेः ।
दिशतु भुवनकृच्छ्रच्छेदि तापिञ्छगुच्छ-
च्छवि नवशिखिपिञ्छालाञ्छितं वाञ्छितं नः ॥

देवः पायात् पयसि विमले यामुने मज्जतीनां
याचन्तीनामनुनयपदैर्वाञ्छितान्यंशुकानि ।
लज्जालोलैरलसविलसैरुन्मिपत्पञ्चबाणै-
र्गोपस्त्रीणां नयनकुसुमैरर्चितः केशवो नः ॥

शम्भो ! स्वागतमास्यतामित इतो वामेन पद्मासन !
क्रौञ्चारे! कुशलं सुखं सुरपते! वित्तेश! नो दृश्यसे ।
इत्थं स्वप्नगतस्य कैटभरिपोः श्रुत्वा यशोदा वचः
किं किं बालक! जल्पसीति रचितं धूधूकृतं पातु वः ॥

End :

यासां गोपाङ्गनानां प्रचुरसिततरालोललीलाकटाक्षा
यन्नासाचारुमुक्तागुणरुचिनिकरव्योमगङ्गाप्रवाहे ।
मीनायन्तेऽपि तासामतिरभसलसल्लीलनीलालकान्ता
भृङ्गायन्ते यदङ्घ्रिद्वयसरसिरुहे पातु पीताम्बरो वः ॥

यद्वेणुश्रेणिरूपस्थितसुषिरमुखोद्गीर्णनादप्रभिन्ना
एणाक्ष्यस्तत्क्षणेन त्रुटितनिजपतिप्रेमबद्धा बभूवुः ।
अस्तव्यस्तालकान्ताः स्फुरदधरकुचद्वन्द्वनाभिप्रदेशा
कामावेशात् कटाक्षप्रकटितपुलकः पातु पीताम्बरो नः ॥

कलात्तमायाल......मूर्तिः कलक्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो नः ॥

Colophon :

Author :

Remarks :

---

|| महाप्रस्थानप्रबन्धः ||

## No. 1390 T. MAHĀPRASTHĀNAPRABANDHA.

C. O. L. No. 612 T.

Substance —Palm leaf. Size—11″ × 1½″. Leaves—3. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—80. Incomplete.

Owner—Same as No. 1390 A.

Subject—The story of the *Mahāprasthāna* of the Pāṇḍavās.

Beginning :

..................................................................

........................................देवलोकम् ||

इत्यूचुषो विरचिताञ्जलिरेष राजा
धर्मस्य यातिमुदितस्य तदा नियोगात् ।
आरोहदिन्द्रकरदत्तकरावलम्बो
दिव्यं रथं गगनसंभृतदीप्ततेजाः ||

आरोह्याराध्यशीलं नृपतिमथ रथं धर्मदेवश्च शक्रो
वायुर्नासत्यदेवौ नभसि सकलदेवाश्च देवर्षयोऽपि ।
सर्वे सम्मोदमानास्त्रिदिवमभिययुः संघशः शङ्खभेरी-
संघोषोन्मिश्रवैमानिकनिकरजयोद्घोषणाघूर्णिताशम् ||

End:

धर्मेण त्रिदशेश्वरेण च समं सर्वैश्च वृन्दारकैः
संमोदोल्लसितस्तदा सुरधुनीं सम्प्राप्य पुण्योदकाम् ।
राजा वासवसिन्धुरेन्द्रमदगन्धोदश्चिते तज्जले
मङ्क्त्वासौ महसोन्ममज्ज सुकृती दिव्याकृतिर्धर्मजः ॥

स्वर्गे वीक्ष्य मुदान्वितः स्वसहजान् कृष्णां च साक्षाद्दिवो
लक्ष्मीमक्षतपुण्यसञ्चयजितानासाद्य लोकानसौ ।
प्रीतिं सातिशयां महीभरहरैर्वृत्तैश्चिराद्रेचितैः
कुर्वन् सर्वदिवौकसां दिवि बभौ धर्मात्मजन्मा नृपः ॥

कृष्णविश्लेषजं दुःखं वहन्त्यपि वसुन्धरा ।
विष्णुरातभुजागुप्ता विष्णुपत्नी मदं दधौ ॥

Colophon:

महाप्रस्थानं प्रबन्धं कृतं च तत्क्षणम् ।

Author:

Remarks—A few lines are missing at the beginning.

---

## ॥ कुचेलवृत्तम् ॥

### No. 1390 U. KUCELAVṚTTAM.

C. O. L. No. 612 U.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—3. 10 lines per page and 48 letters per line.

Script—Malayāḷam. No. of Granthas — 64.
Incomplete.

Owner—Same as No. 13.0 A.

Subject—The story of Kucela.

Beginning:

आसीदस्तरजस्तमोगुणकथः शान्तान्तरात्मा वशी
शिष्यः पुष्यदुदारकीर्तितपसः काश्यस्य सान्दीपनेः ।
उत्पन्नोपनिषद्विचारसरणिः सब्रह्मचारी हरे-
र्विप्रः कोऽपि निवृत्तिमार्गकुशलो धीमान् कुचेलाभिधः ॥

भक्तो मुकुन्दचरणाम्बुजयोर्वितन्वन्
नित्यानि निर्मलमतिः फलनिर्व्यपेक्षम् ।
यत्नं विना समुदितेन धनेन तुष्यन्
पत्न्या समं स्वनिलये सुचिरं न्यवात्सीत् ॥

ऐश्वर्यसम्भवात्सोऽयमीश्वरस्मृतिरोधकात् ।
दरिद्रतां वरं मेने हरिस्मृतिविधायिनीम् ॥

End:

तदनु निजनिकेतं प्राप्य पत्नीसहायः
परिजनपरिक्लृप्तं मज्जनाद्यं विधाय ।
अभजत हृदि पश्यन्नच्युतं विश्वनाथं
सुभगकुसुममालावासितं वासगेहम् ॥

सह मुक्तामयैर्द्वारैर्गृहे मुक्तामये सुखम् ।
वसतस्तस्य न चिराद्आसीन्मुक्तात्मता मुनेः ॥

इत्थं वसन्नपि गृहे हरिपादभक्त्या
निर्धूतविश्वविषयाभिरतिः क्रमेण ।
पृथ्वीसुरः किमपि धाम जनार्दनाख्यं
तत्त्वंपदार्थपरमार्थमयं प्रपेदे ॥

Colophon :

Author :

Remarks—A gap is noticeable in the middle.

---

॥ पूतनामोक्षः ॥

No. 1390 V. PŪTANĀMOKṢA.

C. O. L. No. 612 V.

Substance—Palm leaf. Size—11″ × 1½″. Leaf—1. 12 lines per page and 40 letters per line. Script—Malayaḷam. No. of Granthas — 15. Complete.

Owner—Same as No. 1390 A.

Subject—The story of the destruction of Pūtana.

Beginning :

हरिः । श्रीगणपते नमः । अविघ्नमस्तु ।
अनिशमपहरन्ती जीवितं बालकानां
दिशि दिशि विचरन्ती पूतना यातुधानी ।

अविशदथ निशायां कंसधात्री कदाचि-
त्स्खलितयुवतिभावं विन्दती नन्दगेहम् ॥

നീലാളിവർണ്ണനുടെ ലീലാവിലാസരസകോലാഹലങ്ങ-
ളവൾ കണ്ടാൾ
നാലു ദിശി പത്മപാകലനീലമിഴികളുമവിടെ ബാലനൊടു
കളികൾ കരുതുന്നു
വന്നാലുമെന്മടിയിലെന്നുണ്ണിയെൻമുല നുകർന്നാലുമെ-
ന്നൊരുവൾ ചൊന്നാൾ
നിൻകളികൾ പുതുമകളുമെങ്കലൊരുകുറിയരുളി-
യെങ്കിലിഹ പെരുത്തു സുകൃതം മേ.

ചാഞ്ചാടു നീ കിമപി തഞ്ചാടുമാറുടലിലഞ്ചാതെവന്നു
പുണരേണം
കാഞ്ചീമണിതളവളകൾതഞ്ചുമൊരു കളകളവു-
മെഞ്ചെവിയിലനിശമിയലേണം
എന്നോടു കൺമിഴികളെന്നോടു പുഞ്ചിരികളെന്നോർത്തു
ഗോപികളശേഷം
നന്ദനുടെ ഭവനമതിൽ വന്നു പല വിവശതകൾ
നന്ദസുതനരികിവിയലുന്നു.

End :

എന്നുണ്ണിക്കെൻമുലപ്പാലതിമധുരമിദം നൾകുവേ-
നിങ്ങുവന്നാ.
ലെന്നെല്ലാം ചൊല്ലിയപ്പൂതനകപടതയാ ബാലനെ-
കൈക്കയിലാക്കി
മന്ദം മന്ദം ചിരിച്ചമ്പൊടു മധുമഥനൻതാൻ മുല-
പ്പാൽ കുടിപ്പാ-
നന്നേരം ചെൻറു കൂടീടവളുടെ ദുരിതം പോക്കുവാ-
നാക്കമോടേ.

ജീവനോടുസമമേവ തൻമുല കുടിച്ചിതന്നൊടു കുമാരകൻ
കേവലം വലിയ ശൈലശൃംഗമിവ വീണിതാശു ഭുവി പൂതനാ
ദേവിയാകിയ യശോദ ചെന്നു നിജപാണികൊണ്ടു
ശവശായിനം
ദേവകീസുതമെടുത്തു തന്നുടെ ഗേഹം ജഗാമ മുദിതാശയാ.

Colophon :

Author :

Remarks—The work is entitled after the subject-matter.

---

## ॥ शम्बरवधः ॥

## No. 1390 W. ŚAMBARAVADHA.

C. O. L. No. 612 W.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—6. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—105.

Owner—Same as No. 1390 A.

Subject—The story of Kāmadeva's resurrection and the death of Śambara.

Beginning :

कामे भीमललाटलोचनशिखिज्वालाविलीनाङ्गके
रुग्मिण्या विशति क्रमेण जठरं तस्मिन् पुनर्जन्मने ।

स्वैरं नारदनामकः स भगवानासाद्य तद्वैरिणं
धीरं शम्बरदानवं गदितवानायोधनार्थी मुनिः ॥

ഉൾക്കേറീടിനശംബരാസുര ഭവാനോർക്കാതെ പാർക്കേണ്ടെടോ
മുക്കണ്ണപ്പെരുമാളെരിച്ച മദനപ്പാഴൻ ജനിച്ചീട്ടുവോൻ
വെക്കംവന്നു വിദർഭരാജതനയാഗർഭത്തിലുൾപ്പുക്കവൻ
തക്കംനോക്കിയിരിപ്പതുണ്ടതു നിനക്കാപത്തുമെത്തുംദൃഢം.

സമരശ്രുതകൌതുകപ്രൌഢിമേറ്റം മുനി-
ശ്രേഷ്ഠന്റെ ഭാഷിതംകേട്ടോരു ശംബരൻ
വെട്ടിച്ചിരിച്ചാശു കണ്ണുംചുവപ്പിച്ചു
പെട്ടെന്നു ചാടിപ്പുറപ്പെട്ടു നേരത്തു
ക്കൂട്ടം കലമ്പിപ്പുലമ്പുന്ന ദാനവ
ക്കൂട്ടത്തെ നോക്കിപ്പറഞ്ഞാനിവണ്ണം

End :

प्रद्युम्नं दलितेन्द्रनीलरुचिरं रत्या सहाभ्यागतं
विद्युत्वन्तमिवाम्बुदं लवणिमस्वच्छामृतोद्गारिणम् ।
दृष्ट्वा द्वारवतीपुरे युवतयो गोविन्द एव स्वयं
पुष्टानन्दमुपैति केयमबला तस्येति शङ्कां दधुः ॥

മായാമാനുഷനായ മാധവനുടൻ താത്താജ്ഞതെ-
നെന്നാകിലും
കോടയം സുന്ദരനെന്നു സംശയമിയന്നീടുന്നു
കാലാന്തരേ.
വൈദർഭിക്കു വിചാരമുള്ളിലധികം
ജാതം തദാലോകനാൽ
വേദാന്തപ്രതിപാദിനാരദഗിരാ സർവ്വം
പ്രകാശീകൃതം.

इति मदनमुदारं लाळयन्त्या सदारं
चतुरमधुरशीलं कान्तया साकमेव ।
विततरसविहारी पूरुषो द्वारकायां
वितरतु विपुलं वो मङ्गलं शार्ङ्गधन्वा ॥

Colophon :

हरिः ।

Author :

Remarks :

---

## ॥ सभाप्रवेशः ॥

## No. 1390 X. SABHĀPRAVEŚA.

C. O. L. No. 612 X.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—2. 17 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—20.

Owner—Same as No. 1390 A.

Subject—Duryodhana's visit to Indraprastha.

Beginning :

हरिः ।

इन्द्रप्रस्थाभिधाने नरवरभवने सुप्रभायां सभायां
स्मृत्वा पूर्वोपकारं तदनु दनुभुवा शिल्पिना कल्पितायाम् ।
धर्मात्मा धर्मजन्मा सह मधुरिपुणा राजसूयावसाने
भीमाद्यैः सोदरैश्च द्रुपदतनयया चोपजुष्टो विरेजे ॥

കണ്ടാലതീവ സുഖമുണ്ടായ്വരുന്ന സഭകൊണ്ടാടി-
നാരവനിപന്മാർ
മണിമയമശേഷം പണികളുമനേകം
സ്ഫടികമണിഘടിതവെഹ്റപടികൾ പല കൊട്ടമുടി-
കളിടകലരുമൊരു ഗിരിസമാനം
നീരാഴമുള്ള പല തോട്ടം കുളങ്ങളുമോരോ വിശേഷ-
മൊരു ഭാഗേ
സ്ഥലജലവിമോഹം കലരുമൊരു ഭാഗേ
പലരുചികൾ പുലരുമൊരു മണിശിലകൾ മണി-
പുരികൾ മണിമതിലുമതിലുമൊരുഭാഗം
നാരീവിലാസഗതി ചേരുന്ന പാവകളി-
ലോരോ രസങ്ങൾ പകരുന്നു

End :

ചിരിച്ചാൾ പാഞ്ചാലീ മുലയിണ കുലുങ്ങി പ്രകടിതം
മറച്ചാൾ പാണിഭ്യാം വദനകമലം ചാരുവദനാ
തിരിച്ചാനന്നേരം കുരുപതി മഹാകോപകലുഷൻ
ധരിച്ചാനുള്ളത്തിൽ പരുഷതരവൈരാനലശിഖാം.

ധർമ്മനന്ദനനരിന്ദമൻ മുകുരനിർമ്മലാശയനകന്മഷൻ
കർമ്മദോഷമിതു നമ്മുടെ നിയതമേവമേവ കരുതീടിനാൻ
നല്ലനീളമിടവും ദശപ്പുമിവയുള്ള പട്ടുപുടകൊണ്ടുപോയ്
മെല്ലവേ കുരുവരന്നു നൾകുവതിനാശയാ നികടമാപ്തവാൻ.

പട്ടുംകൊണ്ടുവരുന്ന പാണ്ഡുസുതനോട്ടുച്ചൈ ഭുജംഗധ്വജൻ
മുട്ടുന്നോളുപകാരമെന്നതുചിതംതന്നേ പൃഥാനന്ദന!
ഒട്ടുംസംപ്രതി പട്ടുകിട്ടുകിലഹോ! മോഹം നമുക്കില്ലെടോ
മുട്ടുംമൂർച്ഛയുമെൻപിയാകിലതുതാൻ സമ്മോദമെന്മാനസേ.

इति किमपि भणित्वा कर्णदुःशासनाद्यैः
सह निजपुरमापत् कौरवो वैरशाली ।

मुररिपुरिदमूचे मन्दमन्दं हसित्वा
जयति समरनाट्ये सूत्रधारप्रवेशः ॥

Colophon :

हरिः ।

Author :

Remarks :

---

## ॥ उत्सववर्णनम् ॥

## No. 1390 Y. UTSAVAVARṆANAM.

C. O. L. No. 612 Y.

Substance—Palm leaf. Size—11″ × $1\frac{1}{2}$″. Leaf—1. 9 lines per page and 40 letters per line. Script — Malayāḷam. No. of Granthas—22. Incomplete.

Owner—Same as No. 1390 A.

Subject — Description of festivals in the Śiva Temple.

Beginning :

ഗന്ധർവ്വരാജനായി പണ്ടടിയൻ സ്വഗേഹേ
ബന്ധുക്കളോടുമൊരുമിച്ചമരും ദശായാം.
ബന്ധംവരാതെയൊരു ശാപവശാദചലാരേ-
രന്ധത്വമേററിതവനു നരനായ്പിറന്നേൻ.

ഹര ഹര ശിവ ശിവ ചിത്രമിതെത്രയു-
മവനിസുതന്മാരഴകൊട്ടു വന്നവ-
രതികുതുകം ചില ഭാഷപറഞ്ഞും
ഘോഷരവംകൊണ്ടുലകു മുഴക്കി-
ക്കടലിലെഴും തിരമാലകൾപോലെ
കലിതരസം ചില വസ്ത്രമുടുത്തും
മതികല ചൂടിന മദനാഹരന്റെ
മതിലിനകത്തു നിറഞ്ഞു നികാമം
ഉണ്ണുന്നൊന്തിനു മാധവനിപ്പോൾ
പൊണ്ണനിതൊന്നുമറിഞ്ഞില്ലെന്നും
ദണ്ഡുമെടുത്തോടിവരുന്നോ-
രുണ്ണികൾനികരം വന്നുനിറഞ്ഞു
കെട്ടുമെടുത്തുകുതിച്ചുനടന്നും
പൊട്ടുളിയൻവടി കൈയിലെടുത്തും
പട്ടുപണംവില വിക്കണമെന്നും
പട്ടപ്പുടെക്കിതു ചട്ടമിതെന്നും
നഷ്ടമൊനക്കു ഭവിക്കുമിതെന്നും
കഷ്ടതരം ചില വാക്കുപറഞ്ഞും
ധൃഷ്ടതയേറിന പട്ടന്മാരുടെ
കോലാഹലമിതു കുഹചന ഭാഗേ.
ശൃംഗമതിൽ ചിലഗോപിവരച്ചും
ഭംഗികലന്നൊരു പട്ടുധരിച്ചും
'മംഗളസംഗീകിങ്ങ്ഗിമ'യെന്നും
തങ്ങളിലോരോ ഭാഷപറഞ്ഞും
തിങ്ങിയമോദമൊടാശ്രുവരും ചില
കൊങ്ങിണിനികരം മറെറാരു ഭാഗേ.

End :

ചെക്കനെയെങ്ങും കണ്ടില്ലെന്നും
തിക്കിഞെരിഞ്ഞു കിടക്കുകയല്ലീ
ത്തുക്കിപ്പാസനാ മക്കളിതെന്നും
തക്കമെതിച്ചില വാക്കുപറഞ്ഞും
ചക്കികളുണ്ടൊരു ദിക്കിലനേകം
വായുന്നമ്പൊട്ടു മദ്യപ്പുമുറന്നും
ചായം തേച്ചന്നൊരു ശീലയുടുത്തും
ഞായത്തിച്ചില വാക്കുപറഞ്ഞും
നായന്മാരുടെ കൂട്ടമിതല്ലോ
ചാക്യാർകൂത്തും ചാത്തരുകളിയും
ചാത്തിറിപട്ടർ പുരാണവിനോദം
ഭാഗവതാളുടെ ഗീതവിനോദം
വാദ്യക്കാരുടെ വാദ്യവിനോദം
തീയാടിപ്പട ഘോഷമൊരേട-
ത്താട്ടക്കാരുടെ നർമ്മമുദാരം
പന്തലിലുള്ളൊരു വിസ്മയമെല്ലാ-
മെന്തിനു ഞാൻ പറയുന്നിതു ഗോഹാ-
ദന്തകവൈരിമഹോത്സവഘോഷം
ചിന്തയിലോർക്കുവരിന്നുമസാദ്ധ്യം.

* * * * * *

Colophon :

Author :

Remarks :

## ॥ सन्तानगोपालः ॥

No. 1390 Z. SANTĀNAGOPĀLAM.

C. O. L. No. 612 Z.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—22. 7—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 30. Incomplete.

Owner—Same as No. 1390 A.

Subject — Arjuna's undertaking to rescue ten Brahmin boys from premature death.

Beginning :

हरिः ।

श्रीमानामोददायी निजचरणजुषां नृत्यदम्भोधिकन्या
भास्वत्पादाम्बुजालंकृततरलतुलाकोटिवाचालितायाम् ।
ख्यातायां द्वारकायामथ तनयसुहृज्ज्ञातिसंघैरसंख्यै-
स्संयुक्तो वासुदेवश्चिरतरमवनीं पालयन् स न्यवात्सीत् ॥

अथ कदाचिदविरतमोदमानमानसैश्चातुर्वर्ण्यजनैः समावृते तस्मिन् पुरवरे कश्चन महीसुरः निजगृहिण्या अनुवत्सरं प्रसूतेषु अष्टसु कुमारेषु दिष्टवशान्मृतेषु च नवमसंभूतडिम्भशवशरीरमादाय शोकभारविवशीकृतमानसः अनेकयादवप्रवरसंपूजितायां सभायामाश्रितस्य भगवतो मधुसूदनस्य पुरतो निधाय सोरस्ताडं साधिक्षेपमिदमभ्यभाषत ।

End :

उरुतरमयि धीमन् ! खेदमेतं त्यज त्वं
कुरुवर कुरु मा मा साहसं सव्यसाचिन् ।
मुररिपुरिति जल्पन् वेगतोऽभ्येत्य जिष्णोः
करकमलमगृह्णाद् भक्तलोकार्तिहन्ता ॥

वासुदेवकुरुनन्दनौ सपदि भूसुरात्मजविलोकना-
यावरुह्य रथिनौ रथं तदनु पश्चिमां दिशमुपागतौ ।
अन्धकारपरिमोचनाय समुपागतारिविदिताध्वना
दुग्धवारिधिमवापतुर्वसति यत्र सोऽपि जगदीशिता ॥

तदानीं च दूरत एव समालोकितमणिमयाभ्रंकषतोरणगोपु-
रसौधसालजालौ आकर्णितानेकभक्तजननुतिवचनकोलाहलौ क्रमेण
च व्यतीतसकलकक्ष्यान्तरौ अतिधवलजलधिजलपरिपतनशिशिर-
तरमृदुपवनपरिचलितनवकुसुममधुमुदितमधुपकुलझङ्कारमुखरितदि-
गन्तरालं... ... ... ...
... ... ... .... .... .... ।

Colophon :

Author :

Remarks—A gap is seen at the end.

---

## ॥ राजसूयचम्पुकाव्यव्याख्या ॥

No. 1391. RĀJASŪYACAMPUKĀYAVYĀKHYĀ.

C. O. L. No. 2109.

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—86.

9—11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2900.

Owner—S. Vāsudevan Mūssu Avl., Maṅgalappaḷḷy, Āranmuḷa.

Subject—A commentary on the Rājasūyacampū.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

ശ്രീഷഡക്ഷരോത്തരശതം.

श्रीमत्पादाम्बुजयुगं हेरम्बं प्रणतोऽस्म्यहम् ।
यद्रेणुस्पर्शमात्रेण क्षीयन्ते विघ्नसागराः ॥

नानार्थशब्दसन्दोहदोहने कामधेनवः ।
कटाक्षाः करुणापूर्णाः सरस्वत्याः पुनन्तु माम् ॥

गुरूणामनिशं सर्वगुरूणां करुणात्मनाम् ।
चरणाम्बुरुहद्वन्द्वं शरणं मम सर्वदा ॥

पुण्डरीकपुरनाथलसत्पत्पुण्डरीकमधु मे परिपातु ।
मण्डयत्विह चिराय रसज्ञां पाण्डवेयगुणवर्णनशब्दैः ॥

दुरन्तसंसारमहान्धकारनिरन्तरान्धीकृतलोचनानाम् ।
पदाम्बुजन्मांबुजबन्धुबिम्बं कृष्णस्य पुष्णात्विह मङ्गलानि ॥

मार्ताण्डवर्म्मीश्वरभागिनेयः सर्वप्रजानामपि भागधेयम् ।
सद्धर्मवर्मप्रतिगुप्तदेहः श्रीरामवर्मा नृपतिर्विभाति ॥

सुधर्मायामिन्द्रः सदसि विदुषां भोजनृपति-
द्विजश्रेणीमध्ये पुनरमृतगुः कल्पकतरुः ।

सुरोद्याने लोकैरिह यदवलोके सति समं
प्रदृश्यन्ते सोऽयं जयति सुगुणाश्लेपनृपतिः ॥

आज्ञापितस्तत्पदाभ्यामज्ञोऽपि ग्रन्थकर्मणि ।
यते सति महालम्बे केन किं किं न साध्यते ॥

व्याघ्रालयेशदासोऽहं शिवद्विजकुलोद्भवः ।
प्रबन्धं राजसूयाख्यं व्याचिख्यासे यथामति ॥

End :

साल्वो भैष्मीविवाहे यदुबलविजितश्चन्द्रचूडाद्विमानं
विन्दन् सौभं स भायी त्वयि वसति कुरूंस्त्वत्पुरीमभ्यभाङ्क्षीत् ।

इति ।

उत्तरश्लोके—

"तावत्त्वं रामशाली त्वरितमुपगतः खण्डितप्रायसैन्यं
सौभेशं तं निरुन्ध्या" इति च। अत्र स्वेच्छया प्रवर्तमाने कार्ये भगवता सामीप्यस्थित्यनौचित्यशङ्काया असंभाव्यत्वेऽपि लौकिकरीत्या सम्भावनादुत्प्रेक्षालंकारः ।

Colophon :

पुष्णातु कृष्णकारुण्यं तारुण्यं पुण्यनर्मणः ।
यद्वर्णनमपूर्णं वा भक्तया पूर्णफलप्रदम् ॥

श्रीकृष्णाय नमः । श्रीपडंकुरेशाय नमः ।

1034-ാം ആണ്ടു് വൃശ്ചികമാസം 24-ാംനു ബുധവാരവും ഉത്രാടവും പൂർവ്വപക്ഷത്തു് ത്രിതീയയും ഗരജകരണവും കൂടിയ ദിവസം മകരം രാശി സമയത്തു് എഴുതിതീൎന്ന പുസ്തകം.

राजसूयाख्यचम्पूकाव्यस्य व्याख्या समाप्ता ।

Author—A Brāhmin belonging to Vaikom.

Remarks—The script is clear and legible. It is clear from the introductory portion that the work was composed by a Śivadvija under orders from H. H. Āyilyamtirunāḷ Mahāraja of Travancore.

---

॥ राजसूयप्रबन्धः भाषाव्याख्योपेतः ॥

No. 1392. RĀJASŪYABHĀṢĀVYĀKHYĀ.
with Malayāḷam commentary.

C. O. L. No. 2184.

Substance—Palm leaf. Size—14" × 2". Leaves—105. 9—10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—3350.

Owner—Kaṇṭan Govinda Vārrier, Avl., Kuṭṭanperūr, Mānnār.

Subject — A commentary in Malayāḷam on the Rājasūyaprabandha.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रणम्य गुरुपादाब्जं कुलशेखरभूपतेः ।
प्रीतये राजसूयाख्यकाव्यं व्याख्यायते (मया) ॥

इहान्वयक्रमेणैव व्याख्यानं क्रियतेऽधुना ।
तत्र प्रमादो यद्यस्ति सन्तस्तं क्षन्तुमर्हथ ॥

इष्टदेवताप्रणामपूर्वकं काव्यनिर्माणमिति जानीते—
गोविन्दमानन्दरसैकसान्द्रमापद्य नारायणभूसुरेन्द्रः ।
निर्माति धर्मात्मजराजसूयसम्पन्मयं संप्रति चम्पुकाव्यम् ॥

ഗോവിന്ദമിതി നാരായണഭൂസുരേന്ദ്രൻ നാരായണനാമത്തോടുകൂടിയിരിക്കുന്ന ബ്രാഹ്മണശ്രേഷ്ഠൻ, ആനന്ദരസൈകസാന്ദ്രനായി, ആനന്ദം, സുഖം, രസം, അനുഭവം തദ്രൂപനും ഏകനായും അദ്വിതീയനായും സാന്ദ്രാനന്ദപരിപൂൎണ്ണനായും ഇരിക്കുന്ന ഗോവിന്ദനെ ശ്രീകൃഷ്ണനെ വഴിപോലെ വന്ദിച്ചിട്ടു് ധൎമ്മാത്മജരാജസൂയസമ്പന്മയമായി, ധൎമ്മാത്മജന്റെ ധൎമ്മപുത്രരുടെ രാജസൂയസമ്പത്തി രാജസൂയസമൃദ്ധി തന്മയമായി അതിനെ വൎണ്ണിക്ക പ്രധാനമായിട്ടുള്ളതായിരിക്കുന്ന ചമ്പുകാവ്യത്തെ, ഗദ്യപദ്യമായിരിക്കുന്ന കാവ്യത്തെ ഇപ്പോഴ് നിൎമ്മിക്കുന്നു.

End:

മത്കൃപയുടെ എന്റെ കൃപയുടെ കാരുണ്യത്തിന്റെ വിലസിതം പരിണാമം ഏതാവത് വല്ലു. ഇത്ര ഉണ്ടെന്നു് ഉച്ചൈസ്സാകുംവണ്ണം ദർശിപ്പിച്ചിട്ടു് വിശദാനന്ദാഭിവർഷിയായി വിശദജനത്തിനും ആനന്ദത്തെ സുഖത്തെ വർഷിക്കുന്നവനായി ചൈദ്യാരി ശ്രീകൃഷ്ണൻ പാൎത്ഥന്മാരാൽ പിന്നെയും വസതിയെ സ്ഥിതിയെ പ്രാൎത്ഥ്യമാനൻ എങ്കിലും പ്രാൎത്ഥിക്കപ്പെട്ടുന്നവനെങ്കിലും ദൈവഗതികൊണ്ടു് ഭവ—ന്നിവരാൻ? ഇരിക്കുന്നതായി അവസ്ഥാമയി? ഞാൻ സവിധഗതനായി സമീപത്തിരിക്കുമ്പോഴ് വേണ്ടാ എന്നിട്ടു് വിചാരിച്ചിട്ടെന്നപോലെ അന്തശ്ചേതസ്സായിട്ടു് നിശ്ചയിച്ചിരിക്കുന്ന ചേതസ്സോട്ടു് ബുദ്ധിയോടു

കൂടിയവൻ എന്നപോലെ സൗഭാഗ്യയായിരിക്കുന്ന പുരിയെ പൊടുന്നനവെ ആശായിൽ പ്രാപിച്ചു.

Colophon :

शुभमस्तु ।

पञ्चास्यमस्तके भान्तीं पाशाङ्कुशलसत्कराम् ।
पार्वतीमनिशं वन्दे नन्दालयनिवासिनीम् ॥

രാജസൂയം ഗ്രന്ഥത്തിന് ഓല ൨൦൩-ം രാമായണസംക്ഷേപം മറ്റും പലതുംകൂടെ ഓല ൩൭൦-ം ആകെ---൫൭൩

Author :

Remarks—Though it is written in the Ms. that it contains also Rāmāyaṇa Saṅgraha and other works they are not extant in it at present.

---

## ॥ रामायणसंक्षेपः ॥

### No 1393. RĀMĀYAṆASAṀKṢEPA

C. O. L. No. 230.

Substance—Paper. Size—13½″ × 8″. Pages—50. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas — 750. Complete.

Owner—C. O.

Subject—An abbreviated account of the Rāmāyaṇa.

Beginning :

गजवदनमस्तु महते.... ....देवतां च पराम् ।
श्वश्रेयसाय भवता गुर.... ....दयश्च सदा ॥

सतां परित्राणपरः.... ... ....
....रपि स्वर्गतया महीयान् ।
विभ्राज.... .... ....क्रमश्री-
रादित्यवर्मा नरलोकवीरः ॥

चिरा.... .... .... ....
गुर्वी मुदं यः सुमनोजनानाम् ।
मही.... .... .... ....
मोदते राम इव प्रकामम् ॥

तस्याज्ञा.... ....विस्तरा रामकथा पवित्रा निबध्यते ।
गद्यं.... ....तोऽनुगृह्णन्तु नितान्तमस्याः ॥

अस्ति किल.... .... ....त्राणविचक्षणानामक्षतभुजद्र.... .... ....नामुज्ज्वलयशःप्रसरचन्द्रिकानिष्यन्द.... ....मनस्कारकैरवाकराणाममेयमहिमाद्भु.... ....शोद्भवानामवनीश्वराणां शाश्वतं निवासस्थानमनेकविधमणिकिरणजालनिर्व्यूढवलशासनशरासनसहस्रभास्वरमहाभवनशिखरविराजमानमहारजतकुम्भसङ्घातसङ्कटस्खलनजर्जरितखुरपुटघोटकवृन्दमन्दायमानमाध्यन्दिनसमयसञ्चारदिवाकरं आसन्नवाहिन्या च विबुधविलासिनीविहारविलब्धविलेपनामोदवासितया चन्द्रमूर्त्येव मानसोद्भवया कुमुदाभोगदायिन्या च सूर्यमूर्त्येव तमोपहया कमलप्रसादसम्पादिन्या

च तटिन्या सरय्वा परिशोभमानपरिसरम्, अवनिवनितातिलकायमानं पुरोत्तममयोध्या नाम।

End :

इति विहितविबुधकार्यो विश्वानुजिघृक्षया गृहीतमानुषवेषो भगवानरविन्दनाभः सदारावरजः सकलमित्रपरिवृतो निसर्गनिस्तुलनिजचरितवितीर्णनिखिलभुवनानन्दश्चिराय परमेण सुखेन सुतरां विरराज ।

Colophon :

श्रीरामाय नमस्तस्मै सानुजाय सजानये ।
सूर्यवंशप्रदीपाय प्रणतानन्ददायिने ॥

शालानिवासविलसद्गुरुपादपद्म-
पांसूत्करोज्ज्वलितमानसदर्पणेन ।
शश्वत्स्वदेशिकदयापरमाश्रयेण
रामेण पुस्तकमिदं निखिलं व्यलेखि ॥

Author :

Remarks—The scribe's name is furnished in the colophon.

---

## ॥ रामायणप्रबन्धः ॥

### No. 1394 A. RĀMĀYAṆAPRABANDHA.

C. O. L. No. 2341 A.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—100. 6—7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1125.

Owner—Keśava Śāstrial, Nīlakaṇṭha Śāstrial Avl.

Subject—The story of Śrī Rāma.

Beginning :

श्रीगुरुभ्यो नमः । आञ्जनेयस्वामिने नमः । हरिः ।

उदपतदुपभोक्तुं मण्डलं चण्डभानोः
परिणतफलबुद्ध्या बालभावेऽपि सोऽयम् ।
तदनु कुलिशवेगक्षुण्णगण्डाय तस्मै
वरमदिशदमेयं वायुतुष्ट्यै विधाता ॥

अयमहिमरुचरथाग्रयायी
समपठदेकदिनेन शब्दविद्याम् ।
स तु निजसुतमित्रतामगुष्माद्
गुरुमहिमा गुरुदक्षिणां प्रपेदे ॥

पितुरिव बलवेगयोरमुष्य
स्थितिरमराधिपतेरिवोरुतेजः ।
कमलभुव इवोद्यमस्समाधौ
कपटवटोरिव कामरूपता च ॥

त्वं हि वायु(सु)तो वत्स प्लवने चापि तत्समः ।
तव क्षेमाय भूयास्तामजेयौ रामलक्ष्मणौ ॥

सागरोल्लंघने शक्तिर्भवत्येवाङ्गदादिषु ।
किन्तु मायाविभिर्योद्धुं प्रत्यागन्तुं त्वमीशिषे ॥

End :

ततश्चाभिषेकमहोत्सवोपलंभसंभृतपरमानन्दतुन्दिलात्मानौ महात्मानौ पौलस्त्यविकर्तनात्मजौ कतिपयदिवसापगमे महीपतिर्महितंविविधसत्कारविकस्वरप्रमोदपरिजनपरीतौ विरहासहवार्पित...पालनलक्षणमात्मविशोधनैकप्रयोजनमकरणप्रत्यवायविधायिनं स्वधर्ममनुतिष्ठतमित्यन्तः सौहार्देन प्रयुक्तधामा निजपदाय प्रस्थापयामास । इति विहितविबुधकार्यो विश्वानुजिघृक्षया गृहीतमानुषवेषो भगवानरविन्दनाभः सदारावरजः सकलमित्रपरिवृतो निसर्गनिस्तुलनिजचरितवितीर्णनिखिलभुवनानन्दश्चिराय परमेण सुखेन सुतरां विरराज ।

देवाद्यैः परिपूजितो नृपगणैरासेवितो नित्यशः
सुग्रीवप्रमुखानपि प्रि(य)सखान् स्वे स्वे पदे स्थापयन् ।
स्वच्छन्दः सुचिरं सुखान्यनुभवन् देव्या तया सीतया
रामः पालयति स्म कीर्तिविभवैरामोदिनीं मेदिनीम् ॥

वामे भूमिसुता पुरस्तु हनुमान् पश्चात्सुमित्रात्मजः
शत्रुघ्नो भरतश्च पार्श्वतलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलतनुं रामं भजे श्यामलम् ॥

Colophon :

श्री रामचन्द्राय परब्रह्मणे नमः श्रीकृष्णाय नमः सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रपरब्रह्मणे नमः

॥ श्रीगुरुभ्यो नमः ॥

Author—The Ms. is of recent origin and the script is legible. It comprises the Kāṇḍas Sundara and Yuddha only.

Remarks :

---

## ॥ पाशुपतास्त्रलाभः ॥

No. 1394 B. PĀŚUPATĀSTRALĀBHA.

C. O. L. No. 2341 B.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—3. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—40.

Owner—Same as No. 1394 A.

Subject — Arjuna's acquisition of Pāśupata by means of religious penance.

Beginning :

श्रीगुरुभ्यो नमः,

रे क्षुद्रात्मन् किरात श्वगणपरिवृतः क्षुल्लकैस्सार्धमेभि-
र्मार्गैर्न्मार्गान्यभीक्ष्णं गिरितटभुवि नो वेत्सि वृत्तानि राज्ञाम् ।
अज्ञात्वा तत्त्वतो माममरपुरवधूगीयमानापदानं
युद्धायासि प्रवृत्तः फलमनु(भ)व तस्याविवेकस्य सद्यः ॥

रे क्षुद्र! क्षितिपतिवंशकीट साक्षात्कर्तारं जगदवगश्च(?) सांप्रतं माम् ।
यद्वंशं व्यपदिशसि स्फुरन्तमेनं जानामि प्रकलंकवंहिमानम् ॥

दारस्त्रैणेयश्च तस्यात्मजं तं
जानाम्येव त्वादृशां वंशबीजम् ।
तद्वंश्यानां वेद्मि मुख्यं ययातिं
विप्रस्त्रीं तां योऽभिकः पर्यगृह्णात् ॥

End :

बीभत्सनाथधनुषा ताडितश्चन्द्रशेखरः ।
तदा शरासनं तस्य जाह्नव्यापहृतं बलात् ॥

गाढमुष्टितलजानुनिपातध्वानपूरितदिगन्तनिकुञ्जौ ।
तौ चिराय कुरुतः स्म नियुद्धं व्याधराजकुरुराजकुमारौ ॥

बाहुभ्यामभिवृद्धतालकठिनस्थूलायताभ्यां जवा-
दापीड्योरसि विस्तृते मृगयुना व्याधूय मुक्तो बलात् ।
विस्रस्तावयवः क्षणादपगताशेषाभिमानः श्वसन्
मूर्च्छाकुड्मलितेक्षणस्स्रवदसृग्वक्त्रः पपातार्जु(नः) ॥

Colophon :

Author :

Remarks—Only a few leaves embodying 18 verses are extant herein.

---

## ॥ वासवदत्तव्याख्या ॥

## No. 1395 VĀSAVADATTAVYĀKHYĀ.

C. O. L. No. 371.

Substance — Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—150.

20 lines per page and 16—22 letters per line. Script—Devanāgarī. No. of Granthas—1850.

Owner—C. O.

Subject—A commentary on the Vāsavadattā.

Beginning:

हरिः श्रीगणपतये नमः ।

पुण्यं तत्सवितुस्तेजो वरणीयं महात्मभिः ।
उत्पन्नाघौघविध्वंसि धियो दिशंतु नः प्रभोः ।
सुब्रह्मण्यमुपासेऽहं शक्त्या सकलयागतम् ।
आतन्वानं सुमनसां निर्वाणं गोभिरीडितम् ॥

चक्रं नेत्रं च यस्यास्ता(?)धर्मेतरकरौ हृदि ।
सभेऽस्तु दत्वा यः पूर्वं हरेः परमवाप च ॥

गुरोरस्मि प्रसादेन व्याचिख्यासुर्महत्तरम् ।
काव्यं सुबन्धोस्तत् सन्तश्चानुगृह्णन्तु मां समाः ॥

तत्र प्रथमं सुजनशिखामणिः सुबन्धुः सरस्वतीदत्तवरप्रसादपरिपूर्णेन प्रतिभातिरेकेण रसपरिपूर्णता गद्यकाव्यस्येति गद्यकाव्यं चिकीर्षुः पद्यैः काव्यमुखं कुर्वन् 'यदीयशक्तयनाविष्टं जगत् स्पन्दितुमक्षममि'त्याभाणकवचनानुसारेण प्रकृतिप्रशंसाविधित्सया स्वाभिमतसरस्वतीविषयां काव्यमुखोचितां च नमस्क्रियां करोति—करबदरेति ।

End:

अथ कन्दर्पकेतुः शापवृत्तान्तं श्रुत्वा वासवदत्तया समागतेन मकरन्देन च सह पाटलीपुत्रं नाम नगरं प्रविश्य ताभ्यां सह मनोभिलषितानि सुखान्यनुभवन् अनेकं कालं निनाय नीतवान् ।

दोषान् वै विरसान्निरूप्य सुधियो निर्मत्सराः शोधय-
न्त्वाशाबद्धमतिप्रवेशचटुलेनैवेदमालोचितम् ।
सा देवी शरपाशचापसृणिभिर्विद्योतमाना शिवा
कारुण्यं मयि पूर्णचन्द्रवदना नित्यं करोत्वम्बिका ॥

परिवादः । अलाबुचुर............(?)

Author :

Remarks :

---

॥ सन्तानगोपालम् ॥

No. 1396 A. SANTĀNAGOPĀLAM.

C. O. L. No. 1450 A.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—8. 7 lines per page and 40—44 letters per line. Script—Malayāḷam. No. of Granthas — 135. Complete.

Owner — Padmanābhan Tampi Avl., Śrīkaṇṭheś-varam, Trivandrum.

Subject—Same as No. 1390 Z.

Beginning etc.—Same as No. 1657, DCSMMPL.

Author :

Remarks :

## ॥ रुग्मिणीकल्याणम् ॥

### No. 1396 B. RUGMIṆĪKALYĀṆAM.

C. O. L. No. 1450 B.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—65. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1050. Complete.

Owner—Same as No. 1396 A.

Subject—The story of Rugmiṇī's wedding.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

वामालकावल्लभभावमुद्रासीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये सोमावतंसः स सुखाय भूयात् ॥

यः स्थाणुना केवलमाततज्यं
तन्वन् क्षणाद्धन्यवरं सभङ्गम् ।
सीतां शुभांकूरसमृद्धिमाधाद्
भूत्यै स भूयान्महिमा घनश्रीः ॥

जयाय भूयाज्जनकात्मजा सा
कुचेन कूलङ्कषगौरवेण ।
पतिव्रतौचित्यपरा पुरारि-
शरासगर्वं समकोचयद्या ॥

मुधा रुदन् गर्भगृहे सखेता-
मादातुमालिङ्ग्य हठेन राधाम् ।
कुर्वन्नखाङ्कान् कुचयोरमुष्या
मायाशिशुर्मङ्गलमातनोतु ॥

रदाग्रसंचूर्णितरत्नसानु-
रजोभरैरङ्कजुषो रमण्याः ।
सीमन्तसीमान्तरमादधानः
सिन्दूरितं दीव्यति सिन्धुरेन्द्रः ॥

उन्मीलयेदुक्तिभरं समग्रं
वल्मीकजन्मा कविवल्लभो मे ।
वाणी सुवृत्ताप्यभिसारिणीव
वत्रे यमुल्लङ्घितकाननालिः ॥

End:

देशं समेत्य वन दण्डधराधिवासं
प्रायः क्रमेण परिहीनवसुप्रकर्षः ।
भूयोऽपि भूरिवसुलाभकृताभिलाषो
राजन्वतीं रविरगाद्धनदेशकाष्ठाम् ॥

प्रायः कराग्रपरिमर्शनकेलिभिन्न-
प्रालेयसंहतिदुकूलकृतावकुण्ठम् ।
अम्भोजबन्धुरलकाभरणं चिरेण
मुग्धं चुचुम्ब मुखमुत्तरदिङ्मृगाक्ष्याः ॥

मलयमरुत्किशोरकम्पितमाधविका-
परिमलपूरदूरपरिमग्नजगन्ति चिरम् ।

मधुदिनेत्रमघानि मधुसूदन एव दृशा
किमपि कृशार्थं यस्य हृतकेतकपत्रदृशा(?) ॥

Colophon :

इति दन्तिद्योतिदिवाप्रदीपाङ्कसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु रुग्मिणीकल्याणनाम्नि काव्ये दशमः सर्गः ॥

श्रीगुरुभ्यो नमः ।

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

श्रीदक्षिणामूर्तये नमः । सरस्वत्यै नमः शुभमस्तु ।

Author—Rājacūḍāmaṇidīkṣita.

Remarks—The author's father was Śrīnivāsadīkṣita, his mother, Kāmākṣī and his preceptor, Ardhanārīśvaradīkṣita.

---

॥ कृष्णीयम् ॥

No. 1396 C. KṚṢṆĪYAM.

C. O. L. No. 1450 C.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—32. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—640. Incomplete.

Owner—Same as No. 1396 A.

Subject—*Phalabhāga* in astrology.

Beginning:

प्रष्टारूढं राशिं ये वीक्षन्ते ग्रहा बलोपेताः ।
तेषां क्षेत्रं प्रष्टुर्जन्मर्क्षं निर्दिशेन्मतिमान् ॥

ग्रहवीक्षणनिर्मुक्ते केन्द्रं बलवत्तरं भवेज्जन्म ।
विषमे पुरुषगृहे वा स्थित्वारेणेक्षिते मेषः ॥

युग्मे स्त्रीराशौ वा स्थित्वा यदि लग्नमीक्षते भौमः ।
जन्माष्टमराशिः स्याच्छेषैरपि निर्दिशेन्मतिमान् ॥

End:

बलिहोमतन्त्रपुष्पैरादित्यादीन् ग्रहान् समभ्यर्च्य ।
प्रारभ्यमिदं शास्त्रं विधिवत् कृत्वा गुरोः पूजाम् ॥

विधिवन्मन्त्राः पठिता भवन्ति सर्वार्थसाधका लोके ।
एवं फलवच्छास्त्रं भवति हि विधिपूर्वकं पठितम् ॥
सर्वस्यादेशस्य तु लाभालाभस्य पर्याप्तम् ।

Colophon:

व्याकरणादीन्यङ्गान्यधिगततत्त्वस्य दैवशास्त्रविदः ॥
कृष्णस्य कृतिश्चिन्ताज्ञानं कृष्णीयमिति नाम्ना ।

इति कृष्णीयशास्त्रे विंशोऽध्यायः ।

सौम्याब्दे चाश्वियुजे मासे कृष्णे तृतीयायाम् ।
सौम्यदिने कन्यार्के कृष्णो ह्यलिखत्तु कृष्णाख्यम् ।

शुभमस्तु । श्रीगुरवे नमः ।

Author—Kṛṣṇa.

Remarks—The colophon suggests that the author was well versed in *Vyākaraṇa* and other Śāstras.

---

## ॥ सीमन्तिनीचरितम् ॥

### No. 1397 A. SĪMANTINĪCARITAM.

C. O. L. No. 2344 A.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—5. 6 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Keśava Śāstrial Nīlakaṇṭha Śāstrial Avl., Tiruvaṭṭār.

Subject—The story of Sīmantinī.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आर्यावर्ताधिनाथः समभवदतुलश्चित्रवर्मा महात्मा
तत्पुत्री चारुगात्री समजनि दमयन्तीव सीमन्तिनीति ।
सा वामा केलिलोला ललिततरगती राजहंसस्य तस्यां
सन्तोषं कुर्वती च प्रचुरमनुगतं मन्दमन्दं नगर्याम् ॥

अथ च

कश्चिद् भूदेववर्यो नृपवरवचसा जन्मकालं विचिन्त्य
स्त्रीरत्नस्यास्य धीमान् ध्रुवमिति कथितः केन वैधव्ययोगः ।

भाग्ये युक्ते शुभे यत् सह पतितनयैर्वर्तनं दृश्यते तत्
किं चास्याश्चक्रवर्ती पतिरपि च सुता दिग्गजानूनसाराः ॥

End :

अथ च पन्नगयातुधानकुमारौ नृपकुमारसख्यलाभेनातीव मुदितौ कथञ्चिद्राज्ञोऽनुमतिं लब्ध्वा बालमामन्त्र्य भूयोऽपि दर्शनमिच्छन्तौ सर्पलोकं प्रविश्य आशीविषराजं प्रति तौ दम्पतीनुपस्त्वां पन्नगाधीश! विभो! शङ्करभूषण! "अपारे दुःखपाथोधौ त्वत्कृपैव तरिस्तदा एवमस्तु पीतां(?) इत्यूचतुः। नैषधस्तु निजजनपदं प्राप्य भुवनमशेषं परिपालयामास। ततः समभवन् सीमन्तिन्याः अष्टौ पुत्राः। ते लोकपालविभूतयो भूतिभूषणमेवोपतस्थुः ॥

स्वर्णदीभूषणं देवं देवदेवं दयानिधिम् ।
चन्द्रान्वयेऽतिलोलं तं भजत श्रेयसे विभुम् ॥

श्रीगुरुभ्यो नमः। अविघ्नमस्तु ।

Colophon :

Author :

Remarks—The Ms. is of recent origin. The script is legible.

---

॥ स्यमन्तकम् ॥

No. 1397 B. SYAMANTAKAM.

C. O. L. No. 2344 B.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—2.

6 lines per page and 52 letters per line. Script—Malayaḷam. No. of Granthas—40.

Owner—Same as No. 1397 A.

Subject—The story of the jewel, Syamantaka.

Beginning :

श्रीगणपतये नमः, अविघ्नमस्तु श्रीगुरुभ्यो नमः ।

स्वैरं द्वारवतीपुरे खलु पुरा साकं सुहृद्भिर्वसन्
कृष्णो याचितवान् स्यमन्तकमणिं सत्राजितं कर्हिचित् ।
भारानष्ट सृजन्तमात्मवसतावष्टापदस्यान्वहं
तं पि .... श्रितमित्रलब्धमनर्घं लुब्धस्स नो दत्तवान् ॥

सत्राजित्सहजः कदाचन हयारूढो मृगव्याकुलः
सत्रा कण्ठधृतेन तेन मणिना प्राप प्रसेनो वनम् ।
मांसभ्रान्तिवशान्मणेर्महसि तं सिंहो निजग्राह तं
हत्वादाय मणिं जगाम च गुहां जाल्मेतरो जाम्बवान् ॥

सत्राजिदत्र भ्रातरमदृष्ट्वा भूरितरशोकपावकसन्तप्तमानसस्तदनागमनिदानं मनसा प्रकल्प्य हरिणा हतः सहजो मे हरिणा हृतो हा मणिरिति सत्यमप्यर्थभ्रमवान् मिथ्यापवादं सत्यस्वरूपे सकलभुवनैकनायके श्रीकृष्णे योजयन् विजने स्वजनेभ्यो गूढं निवेदयामास ।

End :

द्वारि द्वारसकन्दरस्य दिवसान्नीत्वाच्युतानिर्गमा-
च्चिन्ताशोकनिमग्ननिःस्पृहनिवृत्तश्रान्तपौरोदितम् ।

श्रुत्वोदन्तमनन्तरं कृतमहामायानिपेत्रावधा-
वायान्तं सह भार्यया मधुरिपुं दृष्ट्वा प्रहृष्टा जनाः ॥

कंसारातिरथ स्यमन्तकमदात् सत्राजिते संसदि
व्रीलानम्रशिराः समेत्य स गृहं स्वागःशमार्थं पुनः ।
गोविन्दाय ददौ सहैव मणिना तां सत्यभामां सुतां
तस्मिन्नेव मणिं निधाय भगवान् रेमे चिरं भामया ॥

श्रीगुरुभ्यो नमः ।

Colophon :

Author :

Remarks—The Ms. begins on Satrājit's bestowal of the jewel, Syamantaka on his brother Prasena and ends with Śrī Kṛṣṇa's wedding with Satyabhāma.

---

## ॥ नारदमोहनम् ॥

No. 1397 C. NĀRADAMOHANAM.

C. O. L. No. 2344 C.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—8. 6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—150.

Owner—Same as No. 1397 A.

Subject—Manifestation of Kṛṣṇa's divine powers.

Beginning :

अविघ्नमस्तु ।

श्रीकृष्णं बहुदारमीक्षितुमनाः श्रीनारदस्त्वेकदा
प्राप्य द्वारवतीं निरीक्ष्य महिते भैष्मीगृहे तं पुरः ।
भामागेहगतं विलोक्य चकितो गत्वा ददर्शाखिलै-
र्वृष्णीन्द्रैः सह कार्यचिन्तनपरं भान्तं सभान्ते हरिम् ॥

तथान्यभार्यानिलयेषु चासौ तत्तत्प्रवृत्तिं प्रसमीक्ष्य कृष्णम् ।
दृष्टोऽधुना तत्र हरिः कथं द्रागत्रागतश्चित्रमिति व्यचिन्तीत् ॥

ततश्च तत्परीक्षाकांक्षी स खलु पारिकाङ्क्षी पुनरपि विश्वोत्कृ-
ष्टरामणीयकं विश्वकर्मनिरति(श)यचातुरीनिकषोपलरीतिमूरीकुर्वाणं
रुग्मिणीभवनं प्रविश्य तत्र च मोघीकृतकोमलमेघपालीलालित्याभि-
मानकान्तिसन्दोहनिकुरुम्बितनिशाकदम्बं भास्वरतरपरार्ध्यमणिग-
णघट्टितमकुटकटककटिसूत्रादिमण्डनप्रकाण्डमण्डनायमानसमस्ताव-
यवं कुन्दधवलिममन्दत्वावहललितहसितकुन्दमिलितैः पुरुदयामृतो-
क्षितैरीक्षितैः शिशिरीकृतभक्तलोकहृदयं प्रद्युम्नादिभिरात्मनो नु सह
रममाणैरात्मजैः सह विहरमाणं अनितरसाधारणनिखिलगुणगणं
दामोदरमामोदभराकुलमतिरालोकयति स्म ।

End :

तदा भविष्यत्यमुमभ्युदीर्य जगत्पतिः स्वं भवनं जगाम ।
मुनिश्च नत्वा हरिमेत्य सत्यास्थितं विधातारमवोचदेतत् ॥

सोऽप्यूचे नहि चित्रमेतदखिलाश्चर्यात्मके केशवे
हे वत्सेश्वरमानिनो वयमहो यन्मायया मोहिताः ।
न त्वं वेत्सि न वेद्मि शम्भुरपि नो वेत्ता तदीहां पुनः
किं (म?त्वा)न्ये तदमुं भजाखिलगुरुं मायानिवृत्त्यै सदा ॥

गायं गायं तदनु स मुनिर्नामधेयानि शौरेः
स्मारं स्मारं सजलजलदश्यामलं कोमलाङ्गम् ।
पायं पायं भवभयहरं तस्य चित्रं चरित्रं
लाभं लाभं प्रमदममितं विष्टपे सञ्चचार ॥

श्रीगुरुभ्यो नमः । अविघ्नमस्तु ।

Colophon :

Author :

Remarks :

---

## ॥ द्रौपदीहरणम् ॥

No. 1397 D. DRAUPADĪHARAṆAM.

C. O. L. No. 2344 D.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—3. 6 lines per page and 48 letters per line. Script—Malayaḷam. No. of Granthas—45.

Owner—Same as No. 1397 A.

Subject—The story of *Draupadīharaṇam.*

Beginning:

श्रीगुरुभ्यो नमः ।

भो भो विख्यातवीर्याः! शृणुत नृपतयो वाक्यमेतन्मदीयं
यो युष्मासु स्वशक्त्या धनुरिदमधुनैवाततज्यं विधाय ।
एतैः शातैः पृषत्कैर्गगनचलमिदं छेत्तुमेतच्छरव्यं
तस्मै वीराय दत्ता निखिलगुणगणस्याकरः सोदरी मे ॥

इति श्रुत्वा वाचं द्रुपदतनयस्य क्षितिभृतः
समञ्चेलुः सर्वे मनसिजशराक्रान्तहृदयाः ।
ममैवेयं कन्येत्यहमहमिकाबद्धहृदया
धनुर्ज्यारोपे युगपदभिपेतुश्च मुदिताः ॥

अस्पृष्ट्वा चापमेके बत निववृतिरे तीव्रसम्मर्दखिन्नाः
केचित् प्रोद्धर्तुकामा मथितभुजबलं सत्रपं सन्निवृत्ताः ।
अन्ये धन्यास्तु कन्यावदनसरसिजं चापदण्डं च दृष्ट्वा
त्यक्तुं धर्तुं न शेकुः किमिह बहुगिरा भग्नदर्पा नरेन्द्राः ॥

End:

तदनु तरलमन्तर्यन्त्रमालोक्य दृष्ट्वा
समसथ घटयित्वा सायकान् पञ्च मौर्व्याम् ।
सुदृढमपि विकर्षन् सोऽयमालोकि लोकैः
पतितमपिच लक्ष्यं लक्षितं तत्क्षणेन ॥

वरयितुमथ कान्तं प्रेर्यमाणा सखीभिः
सपदि सहजया सा लज्जया रुध्यमाना ।

न खलु तमुपयातुं स्थातुमप्यानताङ्गी
क्षणमियमतिलोला पारयामास बाला ॥

यातायातं मुहुरपि हृदा कम्पती सा कथञ्चिद्
बाला मालाविकसितकरा प्राप्य तं वीरमौलिम् ।
अंसे तस्य प्रकृतिसुभगे मालिकामर्पयित्वा
प्रस्विन्नाङ्गी नमितवदना तस्थुषी तत्र रङ्गे ।

Author:

Remarks:

---

॥ शूर्पणखाप्रलापः ॥

No. 1397 E. ŚŪRPAṆAKHĀPRALĀPA.

C. O. L. No. 2344 E.

Substance—Palm leaf. Size—$12\frac{1}{3}'' \times 1\frac{1}{4}''$. Leaves—4. 6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1397 A.

Subject—Śūrpaṇakha's report to Rāvaṇa of the injury suffered at the hands of Lakṣmaṇa.

Beginning—Same as No. 1622 F, DCSMMPL.

End—Same as No. 1658. I, DCSMMPL.

Author—Nārāyaṇa.

Remarks—The concluding stanza bears out that the author was a Brahmin by name Nārāyaṇa who indited this work at the command of Ravi Naṭeśvara.

---

## ॥ सीमान्तिनीचरितम् ॥

### No. 1398 A. SĪMANTINĪCARITAM.

C. O. L. No. 2345 A.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—8. 5 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 1397.

Subject—The story of Śīmantinī.

Beginning etc.—Same as No. 1397 A.

Author :

Remarks :

---

## ॥ नारदमोहनम् ॥

### No. 1398 B. NĀRADAMOHANAM.

C. O. L. No. 2345 B.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—12.

4—6 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—150.

Owner—Same as No. 1397.

Subject etc.—Same as No. 1397 C.

Author:

Remarks:

---

## ॥ शूर्पणखाप्रलापः ॥

## No. 1398 C. ŚŪRPAṆAKHĀPRALĀPA.

C. O. L. No. 2345 C.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—4. 5 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—50.

Owner—Same as No. 1397.

Subject—Same as No. 1397 E.

Beginning:

स्वाभाविकदिव्यसौरभयोगादविरतधारितपारिजातप्रसवैरिव विश्लथीभावे चाशेपतिरोहितशरीरपश्चाद्भागैर्गात्रयष्टावपि जलधरैकदेशदृष्टतटिल्लताप्रतीतिकारिभिः कुटिलविततायताकारतया तरलवीचिभागलुलितसूर्यसुतावारिपूरप्रतीकाशैः केशपाशैर्दिवापि दर्शितक्षपापकार(?)शशिशेखरस्पर्धाभुवा चित्तभुवा ... ... ....

End—Colophon—Same as No. 1397 E.

Author—Nārāyaṇa.

Remarks—The opening portion is missing.

---

## ॥ रामायणप्रबन्धः ॥

No. 1398 D. RĀMĀYAṆAPRABANDHA.

C. O. L. No. 2345 D.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—65. 5—6 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—875.

Owner—Same as No. 1397.

Subject—The story of Śrī Rāma.

Beginning:

तत्र प्रमथितेषु प्रधानयातुधानवीरेषु प्रहस्तमुखेषु प्रथमानरोषो रावणः स्वयमेव मुखनिवहगह्वरनिस्सृतध्वानभेदविह्वलीकृतवलीमुखसार्थः समरभुवमवततार ।

रुन्धन् ब्रह्माण्डभाण्डं कुलशिखरिदरीगर्तवृद्धप्रतिध्वा-
नोद्बुद्धोद्ग्रीवपञ्चाननगलविगलद्घोरहुंकारसान्द्रः ।
शुण्डादण्डोद्धृतायोमुसलगजघटाबृंहिताश्वीयहेषा-
गम्भीरः सञ्जजृम्भे दिशि दिशि सुमहांस्तत्र भेरीनिनादः ॥

अदभ्रतरवाहिनीचलितमेदिनीमण्डलः
क्षणेन च रणाङ्कणे दशमुखो जजृम्भेतराम् ।

व्यलोकि च तदीयकार्मुककिरीटपीते ध्वजे
. . . नटनक्रियां विदधदग्निपुत्राश्चिरात् ॥

ध्वजाग्रे धनुपश्चाग्रे किरीटाग्रे च पावकिम् ।
लक्ष्मणोऽथ हनूमांश्च दृष्ट्वा रामश्च विस्मितः ॥

End :

बाणैरिन्द्रजितं पुरन्दरपुरक्षोभक्रियादुर्मदं
शय्यां वीरजनोचितां रणमुखे न प्रापयिष्यामि चेत् ।
यत्कोपात् खरदूषणत्रिशिरसो नामानुमेयाः कृताः
साक्षाद्दाशरथेरमुष्य सहजो नैवास्म्यहं लक्ष्मणः ।

पूर्वं पञ्चवटीं प्रविश्य तरसा हृत्वा रुरुच्छद्मना
राजंस्त्वं महिषीमसौ निशिचरो दुर्मार्गतो निर्गतः ।
दृष्ट्वा तस्य द.... .... .... ....

Author :

Remarks—The Ms. is incomplete.

---

## ॥ हनूमदपदानम् ॥

### No. 1399. HANŪMADAPADĀNAM.

C. O. L. No. 482.

Substance—Paper. Size—13″ × 9″. Pages — 64. 20 lines per page and 14—22 letters per line. Script—Devanāgarī. No. of Granthas—700.

Owner—C. O.

Subject—The illustrious deeds and adventures of Hanūmān.

Beginning:

या क्षेमंकरवीरप्ररोहपरितुष्टसुरनरवर्गवितीर्णयोर्निजकवलांश-योर्जैवातृकशकलयोरिव यशोङ्कुरयोर्दंष्ट्रयोरशोष्य न(?)रोचिषा रौद्रतररात्रिश्वरविक्रमक्रमानुभूतभङ्गस्याभङ्गुरत्वमनुबुभूषतः स्था-नान्तरालाकाशमानस्येव वासवध्वजस्य पृष्ठप्ररूढस्य लाङ्गूलस्य कान्तिसन्तानेन च किं बहुना—

वीरश्रियः सरसचंक्रमणो(वि?चि)तेन सुस्निग्धरोमचयचर्यसमावृतेन ।
औज्ज्वल्यजं हरगिरेर्हरताभिमानं लोकत्रयं स्वपुष्टा? वपुषा वपुषा रराज ॥

End:

पारस्त्रैणेयपुत्रं नरवरमरुतो विद्धि मां रामदासं
सुग्रीवाख्यस्य भृत्यं रघुवरसुहृदो वानराधीश्वरस्य ।
नाम्ना सोऽहं हनूमानिति दशवदनं सानुगं तेजसि स्वे
हुत्वा भार्यानुजाभ्यामुपगतमिह तं वक्तुमग्रेऽभियातः ॥

इत्यादिवचनामृतैस्तस्य प्रमोदमापाद्य सद्यः समागतस्य राम-चन्द्रस्य बन्धुजनसमागमपुरप्रवेशादिमहोत्सवस्तं विभावितया(?) भासुरसाम्राज्याभिषेकोपक्रमे सागराम्भसमानयनाय वानरवीरेषु नियुक्तेषु वयं..........................लक्षयोजनाभ्यधिकमार्ग ......................समुद्रादुदयात् प्रागेव च युतं(?)जलमानीत-

वान्। पूर्वसागरो योजनशतान्तो, दक्षिणः शतत्रयान्ते पग्रप्राप्तः(?), पञ्चशतान्ते उत्तरो लक्षयोजनान्ते तथाप्ययं श्रीधरे रामचन्द्रे ।

हारं श्रीरामपत्नी गुरुमुरुदययैवावमुच्यात्मकण्ठात् ।

* * * * * * *

मध्येराजन्यरक्षःकपिनिवहमुखैरुज्ज्वलानां जनानां
प्रादादायुश्च कल्पावधि गुणनिधये वायुपु(त्रे च?त्राय) साध्वी ॥

Colophon :

इति हनूमदपदाननाम्नि चम्पूप्रबन्धे कौमारविलसितं नाम प्रथमं विलसितम् ।

Author :

Remarks :

---

(To be continued)

SREE SARADA EDUCATION SOCIETY
RESEARCH CENTRE